
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥ॐ नमः परमात्मने श्रीकृष्णाय नमः॥ ॥ॐ मित्येतदक्षरमित्याद्यष्टाध्यायी छांदोग्योपनिषत् तस्याः संक्षेपतोऽर्थजि
सुभ्य ऋजुविवरणमल्पग्रंथमिदमारभ्यते। तत्र संबंधः। समस्तं कर्माधिगतं प्राणादिदेवताविज्ञानसहितमर्चिरादिमार्गे
ब्रह्मप्रतिपत्तिकारणं। केवलं च धूमादिमार्गेण चंद्रलोकप्रतिपत्तिकारणं। स्वभावप्रवृत्तानां च मार्गद्वयपरिभ्रष्टानां कष्टा
तिरुक्ता। न चोभयोर्मार्गयोरन्यतरस्मिन्नपि मार्गे आत्यंतिकी पुरुषार्थसिद्धिरिति। अतः कर्मनिरपेक्षमद्वैतात्मविज्ञानं सं
तित्रयहेतूपमर्देन वक्तव्यमित्युपनिषदारभ्यते। न चाद्वैतात्मविज्ञानादन्यत्रात्यंतिकी निःश्रेयसप्राप्तिः। वक्ष्यति ह्यथ येऽन्य
दुरन्यराजानस्ते क्षय्यलोका भवंति। विपर्यये च स स्वराड्भवतीति। तथा द्वैतविषयाऽनृताभिसंधस्य बंधनं तस्करस्ये
हणे दाहः संसारदुःखप्राप्तिश्चेति। द्वेउक्त्वाऽद्वैतात्मसत्याभिसंबंधस्यातस्करस्येव तप्तपरशुग्रहणे बंधदाहा
खनिवृत्तिर्मोक्षश्चेति। अत एव न कर्मसहभाव्यद्वैतात्मदर्शनं। क्रियाकारकफलभेदोपमर्देन सदेकमेवाद्वि
मित्येवमादिवाक्यजनितस्य बाधकप्रत्ययानुपपत्तेः। कर्मविधिप्रत्यय इति चेन्न। कर्तृभोक्तृस्वभावविज्ञा
फलरागद्वेषादिदोषवतश्च कर्मविधानात्। अधिगतसकलवेदार्थस्य कर्मविधानाद्द्वैतज्ञानवतो
वृत्तानिवृत्तस्य कर्तृभोक्त्रादिज्ञानस्य स्वाभाविकस्य सदेकमेवाद्वितीयमात्मैवेदं सर्वमित्यनेन

Acc. No - M1437.
Title - छान्दोग्योपनिषद्भाष्य (अपूर्ण)
Author - शंकराचार्य.
Date - ?
Subject - Vedanta
folios - 107
Xerox pages - 208
Acc No. - 457

छां० भा०

५नु५

गुणवत्त्वं सिद्धं। वाङ्मयत्वमोंकारस्य प्राणनिष्पाद्यत्वं च मिथुनेन संसृष्टत्वं। मिथुनस्य कामापयितृत्वं प्रसिद्धमिति दृष्टान्त उच्यते। यथा लोके
मिथुनो मिथुनावयवौ स्त्रीपुंसौ यदा समागच्छतस्तदा ग्राम्यधर्मतया संयुज्यतां यौ तदापयतः प्रापयतः अन्योन्यस्येतरेतरस्य तौ कामं। तथा
स्वात्मानुप्रविष्टेन मिथुनेन सर्वकामाप्तिगुणवत्त्वमोंकारस्य सिद्धमित्यभिप्रायः। तदुपासकोऽप्युद्गाता तद्धर्मा भवतीत्याह। आपयिता ह
वै कामानां यजमानस्य भवति। य एतदक्षरमेवाप्तिगुणवदुद्गीथमुपास्ते। तस्यैतद्यथोक्तफलमित्यर्थः। तं यथा यथोपासते तदेव भवतीति
श्रुतेः। समृद्धिगुणवांश्चोंकारः। कथं। तद्वा एतत्। तदेतत्प्रकृतमनुज्ञाक्षरमनुज्ञा च साक्षरं च तदनुज्ञाक्षरमोमिति ओंकार इत्यर्थः। कथमनुज्ञेत्याह।
श्रुतिरेव। यद्धि किंच यत्किंच लोके ज्ञानं धनं वानुजानाति विद्वान्धनी वा तत्रानुमतिं कुर्वन्नोमित्येव तदाह। तथा च वेदे त्रयस्त्रिंशदित्यो
मिति होवाचेत्यादि। तथा लोकेऽपि तवेदं धनं गृह्णामीत्युक्त ओमित्याह। तदेषा उ एव एषैव समृद्धिः यदनुज्ञा। या अनुज्ञा सा समृद्धिः। तन्मूल
त्वादनुज्ञायाः। समृद्धो ह्योमित्यनुज्ञां ददाति। तस्मात्समृद्धिगुणवानोंकार इत्यर्थः। समृद्धिगुणोपासकत्वात्तद्धर्मा सन्समर्धयिता ह वै का
मानां यजमानस्य भवति। य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यादि पूर्ववत्। अथेदानीमक्षरं स्तौत्युपास्यत्वात्प्ररोचनार्थं। कथं। तेनाक्ष
रेण प्रकृतेनेयमृग्वेदादिलक्षणा त्रयी विद्या। त्रयीविद्याकर्मेत्यर्थः। न हि त्रयी विद्यैवाश्रावणादिभिर्वर्तते। कर्म तु तथा प्रवर्तत इति प्रसि
द्धं। कथं। ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायतीति। लिंगाच्च सोमयाग इति गम्यते। तच्च कर्म तस्यैवाक्षरस्यापचित्यै पूजार्थं। परमा

विहितं२

३

त्म प्रतीकं हि तत्तद्रूपापत्तिः परमात्मन एव सा। स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इति स्मृतेः। महिम्ना रसेन किं वा एतस्यैवाक्ष
रस्य महिम्ना महत्त्वेन ऋत्विग्यजमानादिप्राणैरित्यर्थः। तथैतस्यैवाक्षरस्य रसेन व्रीहियवादिनिर्वृत्तेन हविषेत्यर्थः। यागहोमाद्यक्षरे
ण क्रियते। तच्चादित्यमुपतिष्ठते। ततो वृष्ट्यादिक्रमेण प्राणोऽन्नं च जायते। प्राणैरन्नेन च यज्ञस्तायते। तदुच्यते। अक्षरस्य महिम्ना रसेने
ति। तत्राक्षरविज्ञानवतः कर्म कर्त्तव्यमिति स्थितमाक्षिपति। तेनाक्षरेणोभौ यश्चैतदक्षरमेवं यथाव्याख्यातं वेद। यश्च कर्ममात्रविद
क्षरयाथात्म्यं न वेद। तावुभौ कुरुतः कर्म। तयोश्च कर्मसामर्थ्यादेव फलं स्यात्। किं तत्राक्षरयाथात्म्यविज्ञानेनेति। दृष्टं हि लो
के हरीतकीं भक्षयतोस्तद्रसाभिज्ञेतरयोर्विरेचनं। नैवं। यस्मान्नाना तु विद्या चाविद्या च। भिन्ने हि विद्याविद्ये। तु शब्दः पक्ष
व्यावृत्त्यर्थः। नोंकारस्य कर्मांगमात्रविज्ञानमुद्गीथाद्यंगमात्रविषयमुपासनातिरिक्तं। विज्ञानमेव रसतमाप्तिसमृद्धिगुण
वद्विज्ञानं। किं तर्हि। ततोऽभ्यधिकं। तस्मात्तदंगाधिक्यात्फलाधिक्यं युक्तमित्यभिप्रायः। दृष्टं हि लोके वणिक्शबरयोः पद्मरा
गादिमणिविक्रये वणिजो विज्ञानाधिक्यात्फलाधिक्यं। तस्माद्यदेव विद्यया विज्ञानेन युक्तः सन् करोति कर्म श्रद्धया श्रद्दधानः स
न्नुपनिषदा योगेन युक्तश्चेत्यर्थः। तदेव कर्म वीर्यवत्तरम विद्वत्कर्मणाधिकफलं भवतीति। विद्वत्कर्मणो वीर्यवत्तरवचनादवि
दुषोऽपि कर्म वीर्यवदेव भवतीत्यभिप्रायः। न चाविदुषः कर्मण्यनधिकारः। औषस्त्ये कांडे अविदुषामपि आर्त्विज्यदर्शनात्। रसत

प्रश्नेऽतमचू। नह्यत्र गुंजातिबहुत्वं। कथं डतमच्प्रयोगो नैष दोषः। जातौ परिप्रश्नो जातिपरिप्रश्न इत्येवं विग्रहे जातावृक्साम्नोर्नां
बहुत्वोपपत्तेर्न जातेः परिप्रश्न इति विगृह्यते। ननु जातेः परिप्रश्न इत्यस्मिन्विग्रहे कतमः कठ इत्याद्युदाहरणमुपपन्नं। तत्रापि
= ऋगादिजातावेव व्यक्तिबहुत्वाभिप्रायेण परिप्रश्न इत्यदोषः। यदि जातेः परिप्रश्नः स्यात् कतमा कतमगित्यादावुपसंख्यानं क
र्त्तव्यं स्यात्। विमृष्टं भवति विमर्शः कृतो भवति। विमर्शो हि कृते सति प्रतिप्रवचनोक्तिरुपपन्ना। वागेवर्क्प्राणः साम। वागृचोरे
कत्वेपि नाष्टमत्वव्याघातः। पूर्वस्माद्वाक्यान्तरत्वात्। आप्तिगुणसिद्धये ओमित्येतदक्षरमुद्गीथ इति। वाक्प्राणावृक्सामयोनी इ
ति वागेवर्क्प्राणः सामेत्युच्यते यथाक्रमं। ऋक्सामयोर्वाक्प्राणयोर्ग्रहणे हि सर्वासामृचां सर्वेषां च साम्नामवरोधः कृतः स्या
त्तदवरोधे च सर्वे कामाश्चावरुद्धाः स्युः। ओमित्येतदक्षरमुद्गीथ इति। अ तयारोंकानिवर्त्यते। तद्वै एतदिति मिथुनं नि
र्दिश्यते। किं तन्मिथुनमित्याह। यद्वाक्च प्राणश्च सर्वमृक्सामकारणभूतौ मिथुनं। ऋक्च साम चेति ऋक्सामकारणावृक्साम
शब्दौ का चिदित्यर्थः। ननु स्वतंत्रे ऋक्सामे न मिथुनमन्यथा हि वाक्प्राणश्चैकं मिथुनमृक्साम चापरं मिथुनमिति द्वे मिथुने स्या
तां। तथा च तदेतन्मिथुनमित्येकवचननिर्देशोऽनुपपन्नः स्यात्। तस्माद्दृक्सामयोन्योर्वाक्प्राणयोरेव मिथुनत्वं। तद्वै तत्तदेवं लक्ष
णं मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते। एवं सर्वकामाप्तिगुणविशिष्टं मिथुनमोंकारे संसृष्टं विद्यत इत्योंकारस्य सर्वकामाप्ति

छां० उ०

प्राप्तिसमृद्धिगुणवदक्षरमित्येकमुपासनं मेथ्येव यत्नान्तरदर्शनात्। अनेकैर्हि विशेषणैरनेकधोपास्यत्वात् खल्वेतस्यैव प्रकृतस्योद्गीथाख्यस्याक्षरस्योपव्याख्यानं भवति॥ ॥प्रथमः खंडः॥ ॥देवासुरा देवाश्चासुराश्च देवा दीव्यतेर्द्योतनार्थस्य शास्त्रोद्भासिता इन्द्रियवृत्तयो देवाः। असुरास्तद्विपरीताः स्वेष्वेवासुषु विषयविषयासु प्राणनक्रियासु रमणात् स्वाभाविक्यस्तमआत्मिका इन्द्रियवृत्तय एव। ह वै इति पूर्ववृत्तोद्भासकौ निपातौ। यत्र यस्मिन्निमित्त इतरेतरविषयापहारलक्षणे संयेतिरे सम्पूर्वस्य यततेः संग्रामार्थत्वमिति संग्रामं कृतवन्त इत्यर्थः। शास्त्रीयप्रकाशवृत्त्यभिभवनाय प्रवृत्ताः स्वाभाविकास्तमोरूपा इन्द्रियवृत्तयोऽसुराः। तथा तद्विपरीताः शास्त्रार्थविषयविवेकज्योतिरात्मानो देवाः स्वाभाविकतमोरूपासुराभिभवनाय प्रवृत्ताः। इत्यन्योन्याभिभवोद्भवरूपः संग्राम इव। सर्वप्राणिषु प्रतिदेहं देवासुरसंग्रामोऽनादिकालप्रवृत्त इत्यभिप्रायः। स इह श्रुत्याख्यायिकारूपेण धर्माधर्मोत्पत्तिविवेकविज्ञानाय कथ्यते प्राणविशुद्धिविज्ञानविधिपरतया। उभयेऽपि देवासुराः प्रजापतेरपत्यानि प्राजापत्याः। प्रजापतिः कर्मज्ञानाधिकृतः पुरुषः पुरुष एवोक्थमयमेव महान्प्रजापतिरिति श्रुत्यन्तरात्। तस्य हि शास्त्रीयाः स्वाभाविक्यश्च करणवृत्तयो विरुद्धा अपत्यानीव तदुद्भवत्वात्। तत्रोत्कर्षापकर्षलक्षणनिमित्तं ह देवा उद्गीथमुद्गीथभक्त्युपलक्षितमौद्गात्रं कर्माजह्रुराहृतवन्तः। तेषामपि केवलस्यापहरणासंभवाज्ज्योतिष्टोमाद्याहृतवन्त इत्यभिप्रायः। तत्किमर्थमाजह्रुरित्युच्यते। अनेन कर्मणैनानसुरानभिभवि

४

४

ख्याम इत्येवमभिप्रायः॥ संतो यदा वत उद्गीथं कर्माभिहीर्षवस्तदा ते ह देवा नासिक्यं नासिकायां भवं तं घ्राणं चेतनावंतं प्राणमुद्गी
थकर्तारमुद्गातारमुद्गीथभक्त्या उपासांचक्रिरे कृतवंत इत्यर्थः॥ नासिक्यप्राणदृष्ट्या उद्गीथाख्यं भक्त्यवयवमोंकारमुपासांचक्रिर इत्य
र्थः॥ एवं हि प्रकृतार्थपरित्यागोऽप्रकृतार्थोपादानं च न कृतं स्यात्॥ खल्वेतस्यैवाक्षरस्येत्योंकारो ह्युपास्यतया प्रकृतः॥ ननूद्गीथो
पलक्षितं कर्म कृतवंत इत्यवोचः॥ इदानीमेव कथं नासिक्यप्राणदृष्ट्या ओंकारमुपासांचक्रिर इत्यात्थ। नैष दोषः॥ उद्गीथकर्मण्येवाहि
तकर्तृप्राणदेवतादृष्ट्या उद्गीथभक्त्यवयवश्चोंकार उपास्यत्वेन विवक्षितः॥ न स्वतंत्रोऽतस्तमसौ दृष्ट्या न कर्म हि कृतवंत इत्युक्तमेवो
क्तं। तमेवं देवैर्वृतमुद्गातारं ह असुराः॥ स्वाभाविकतमआत्मानो ज्योतीरूपं नासिक्यं प्राणं देवं स्वोत्थेन पाप्मनाऽधर्मासंगरूपेण विवि
धुर्विद्धवंतः॥ संसर्गं कृतवंत इत्यर्थः॥ स हि नासिक्यः॥ प्राणः॥ कल्याणगंधग्रहणाभिमानासंगाभिभूतविवेकविज्ञानो बभूव। स ते
न दोषेण पाप्मसंसर्गी बभूव। तदिदमुक्तमसुराः॥ पाप्मना विविधुरिति। यस्मादासुरेण पाप्मना विद्धस्तस्मात्तेन पाप्मना प्रेरितो
घ्राणप्राणो दुर्गंधग्राहकः॥ प्राणिनामतस्तेनायं जिघ्रति लोकः॥ सुरभि च दुर्गंधि च पाप्मना ह्येष यस्माद्विद्धः॥ उभयग्रह
णमविवक्षितं। यस्मान्नायं हविरात्मन्नातीति यदेव घ्राणेन प्रतिरूपं जिघ्रतीति समानप्रकरणश्रुतेः॥ मुख्यप्राणस्योपास्यत्वायत
दिविशुद्ध्यालोचनार्थोऽयं विचारः॥ क्रियाप्रवर्तितः॥ न तु चक्षुरादिदेवताः॥ क्रमेण विचार्यासुरेण पाप्मना विद्धा इत्यपोह्यंते। समानमन्यत्॥

छां॰ ना॰

हैव॰

अथ ह वाचं चक्षुः श्रोत्रं मन इत्याद्युक्तार्था अपि अन्या अस्वयसनादिदेवता इष्टव्याः एवमु खल्वेता देवताः पाप्मभिरिति श्रुत्यंतरात्। दासुर
विद्धत्वात् घ्राणादिदेवता अपोह्याथानंतरं य एवायं प्रसिद्धो मुखे भवो मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे। तं हासुराः पूर्ववत्। आसाद्य प्राणं विद
ध्वंसुर्विनष्टा अभिप्रायमात्रेण कृत्वा किं विदपि प्राणस्य। कथं विनष्टा इत्यत्र दृष्टांतमाह। यथा लोकेऽश्मानमाखणं न शक्यं खनितुं कु
द्दालादिभिरपि भेत्तुं न शक्योऽखण एवाखणः तमृत्वा सामर्थ्याद्देलो ष्टः पांशुपिंडः श्रुत्यंतरात् आखणमश्मानं निक्षिप्तोऽश्मभेदनाभिप्रायेण तस्या
श्मनः किंचिदप्यकृत्वा स्वयं विध्वंसते विदीर्यते। एवं विदध्वंसुरित्यर्थः एवं विशुद्धोऽसुरैरधर्षितत्वात् प्राण इत्येवं विदः प्राणात्मभूतस्य

५

दं फलमाह। यथाश्मानमित्येष एव दृष्टांत एवं हिंसिष विध्वंसते विनश्यति। कोऽसावित्याह। य एवं विदि यथोक्तप्राणविदि पापं तनेदे
र्हं कर्तुं कामयते इच्छति। यश्चाप्येनमभिदासति हिनस्ति प्राणविदं प्रत्याक्रोशताडनादि प्रयुंक्ते सोऽप्येवमेव विध्वंसत इत्यर्थः। स यस्मा

५

स एष प्राणवित्प्राणभूतत्वात् अश्माखण इवाश्माखणोऽधर्षणीय इत्यर्थः। ननु नासिक्योऽपि प्राणो वाय्वात्मा यथा मुख्यस्तत्र नासिक्यः
प्राणः पाप्मना विद्धः प्राण एव सन्न मुख्यः कथं। नेष दोषः। नासिक्यस्तु स्थानकरणवैगुण्याद्विद्धो वाय्वात्मापि सन्न मुख्यः स्थानदेवता
बलीयस्त्वान्न विद्धयुक्तं। यथा वास्यादयः शिक्षावत्पुरुषाश्रयाः कार्यविशेषं कुर्वंति नान्यहस्तगतास्तद्वद्दोषवत् घ्राणसचिवत्वाद्घ्रा
विद्धा घ्राणदेवता न मुख्या यस्मान्न विद्धोऽसुरैर्मुख्यस्तस्मान्नैवैतेन सुरभि दुर्गंधि वा विजानाति घ्राणेनैव तदुभयं विजानाति लोके

स्यु
र इति

उ॰घ्रा॰२

ऽनस्य पाप्मकार्यादर्शनादपहतपाप्माऽपहतो विनाशितोऽपनीतः पाप्मा यस्मात्सोऽयमपहतपाप्मा ह्येषौ विशुद्ध इत्यर्थः। यस्माच्चात्मं
नरि स्वः कल्याण्या घ्रासंगवत्त्वाद्धि घ्राणादयो न तथा त्वं नरि मुख्यः। किं तर्हि सर्वार्थः। कथमित्युच्यते। तेन मुख्येन यदश्नाति यत्पिबति
लोके तेनाशितेन पीतेन चेतरान् घ्राणादीनवति पालयति तेन हि तेषां स्थितिर्भवतीत्यर्थः। अतः सर्वान्तरः प्राणो विशुद्धः। कथं
पुनर्मुख्याशितपीताभ्यां स्थितिरेषां गम्यत इति उच्यते। एतं मुख्यं प्राणं मुख्यप्राणस्य वृत्तिमन्नपाने इत्यर्थः। अन्ततोऽन्ते मरणकाले
ऽविन्दाऽलब्ध्वोत्क्रामति। प्राणादिप्राणसमुदाय इत्यर्थः। अप्राणो हि न शक्नोत्यशितुं पातुं वा। तेनोत्क्रान्तिप्रसिद्धा प्राणादिकलापस्य
दृश्यते ह्युत्क्रान्तो। प्राणस्याशिशिषाऽतो व्याददात्येवास्य विदारणं करोतीत्यर्थः। तच्चानालाभे उत्क्रान्तस्य लिङ्गं। तं हाङ्गिराः। तं मुख्यं
प्राणं ह अङ्गिरा इत्येवं गुणमुद्गीथमुपासाञ्चक्रे उपासनं कृतवान् बकोदाल्भ्य इति वक्ष्यमाणेन सम्बध्यते। तथा बृहस्पतिरित्यायास्य
इति चोपासाञ्चक्रे बक इत्येवं संबन्धः कृतवन्तः। केचिदेतमुएवांगिरसं बृहस्पतिमायास्यं प्राणमन्यं तद् इति वदन्ति नाङ्गवत्येवं। यथाश्रुति
संभवे संभवति तु यथाश्रुतमृषिचोदनायामपि। श्रूयते तरं वा तस्मात्वतर्ते विनि इत्यावक्तते एतमेव संतमृषिमपि तथा माध्यमाङ्गु
त्समदो विश्वामित्रो वामदेवो त्रिरित्यादिष्वृषीनेव प्राणमापादयति श्रुतिः। तथेमानप्यृषीन्प्राणोपासकानङ्गिरा बृहस्पतिश्च आ
यास्यान्प्राणं करोति अभेदविज्ञानाय। प्राणो ह पिता प्राणो ह माता इत्यादिवच्च तस्मादृषिरङ्गिरा नाम प्राण एव सन्नात्मानमङ्गिरसं

छां०भा०

णमुद्गीथमुपासांचक्रे इत्येतद्यत्। यस्माल्लोकानां प्राणः सन्रसः। तेनासावांगिरसस्तथा वाचो बृहत्याः पतिस्तेनासौ बृहस्पतिस्तथा
यद्यस्मादास्याद्दयते निर्गच्छति। तेनायास्य ऋषिः प्राण एव सन्नित्यर्थः। तथान्योप्युपासक आत्मानमेवांगिरसादिगुणं प्राणमुद्गीथमु
पासीतेत्यर्थः। न केवलमंगिरः प्रभृतय उपासांचक्रिरे। तं ह बको नाम दल्भस्यापत्यं दाल्भ्यो विदांचकार। यथादर्शितं प्राणं विदि
तवान्। विदित्वा च स ह नैमिषीयानां सत्रिणामुद्गाता बभूव स च प्राणविज्ञानसामर्थ्यादेभ्यो नैमिषीयेभ्यः कामानागायति स्म ह
गीतवान्किलेत्यर्थः। तथान्योप्युद्गाता आगाता ह वै कामानां भवति य एवं विद्वान्यथोक्तगुणं प्राणमक्षरमुद्गीथमुपास्ते तस्यैतद्
दृष्टं फलमुक्तं। प्राणात्मभावस्त्वदृष्टं देवो भूत्वा देवानप्येतीति श्रुत्यंतरात्सिद्धमेवेत्यभिप्रायः। इत्यध्यात्ममेतदात्मविषयमुद्गीथोपा
सनमित्युक्तोपसंहारोऽधिदैवतोद्गीथोपासने वक्ष्यमाणबुद्धिसमाधानार्थः॥२॥ ॥अथानंतरमधिदैवतं देवताविषयमुद्गीथो
पासनं प्रस्तुतमित्यर्थोऽनेकधोपास्यत्वादुद्गीथस्य। य एवासावादित्यस्तपति। तमुद्गीथमुपासीतादित्यदृष्ट्योद्गीथमुपासीतेत्यर्थः।
तमुद्गीथमित्युद्गीथशब्दोऽक्षरवाची सन्कथमादित्ये वर्त्तत इत्युच्यते। उद्यन्नुद्गच्छन्वा एष प्रजाभ्यः प्रजार्थमुद्गायति प्रजानामन्नोत्प
त्त्यर्थं। न ह्यनुद्यति तस्मिन्व्रीह्यादेः निष्पत्तिः स्यात्। अत उद्गायतीवोद्गायति यथैवोद्गातान्नार्थमत उद्गीथः सवितेत्यर्थः। किंचोद्यन्नैशं तमस्त
ज्जं च भयं प्राणिनामपहंति। तमेवं गुणं सवितारं यो वेद सोऽपहंता नाशयिता ह वै भयस्य जन्ममरणादिलक्षणस्यात्मनस्तमसश्च

६

स्विदिति होवाच। अतो वयमपि स्वर्गलोकं सामाभिसंस्थापयामः। स्वर्गलोकप्रतिष्ठं साम जानीम इत्यर्थः। स्वर्गसंस्तावं स्वर्गत्वेन संस्त
वनं संस्तावो यस्य तत्साम स्वर्गसंस्तावं। हि यस्मात्स्वर्गो वै लोकः सामवेद इति हि श्रुतिः। तमितरः शिलकः शालावत्यश्चैकितायनं
दाल्भ्यमुवाचाप्रतिष्ठितमसंस्थितं परोवरीयस्त्वेनासमाप्तगति सामेत्यर्थः। वै इत्यागमं स्मारयति। किलेति। दाल्भ्य ते तव साम यस्य
स हि स्तुः साम विदे तर्ह्येतस्मिन्काले ब्रूयात्कश्चिद्विपरीतविज्ञानमप्रतिष्ठितं साम प्रतिष्ठितमित्येवंवादापराधी नं मूर्द्धा शिरस्ते वि
पतिष्यति विस्पष्टं पतिष्यतीत्येवमुक्तस्यापराधिनस्तथैव तद्विपतेन्न संशयः। न त्वहं ब्रवीमीत्यभिप्रायः। ननु मूर्द्धपाताहं चेदपरा
धं कृतवान् तः परेणानुक्तस्यापि पतेन्मूर्द्धा न चेदपराधं कृतस्यापि नैव पतत्यन्यथा अकृताभ्यागमः कृतनाशश्च स्यातां। नैष दोषः। कृत
स्य कर्मणः शुभाशुभस्य फलप्राप्तेर्देशकालनिमित्तापेक्षत्वात्तत्रैवं सति निमित्तं मूर्द्धपाते निमित्तस्याप्यज्ञानस्य पराभिव्याहारनिमित्ता
पेक्षत्वमित्येवमुक्तो दाल्भ्य आह। हंताहमेतद्भगवत्तो वेदानि यत्प्रतिष्ठं सामेत्युक्तः प्रत्युवाच शालावत्यो विद्धीति होवाचामुष्य लो
कस्य का गतिरिति पृष्टो दाल्भ्येन शालावत्योऽयं लोक इति होवाचायं हि लोको यागदानहोमादिभिरमुं लोकं पुष्यतीत्यतः प्रदानं देवा उ
पजीवंतीति हि श्रुतयः प्रत्यक्षं हि सर्वभूतानां धरिणी प्रतिष्ठेत्यतः साम्नोप्ययं लोकः प्रतिष्ठैवेति युक्तं। अस्य लोकस्य का गतिरित्युक्ते
आह। शालावत्यो न प्रतिष्ठां इमं लोकमतीत्य नयेत्साम कश्चिदतो वयं प्रतिष्ठां लोकं सामाभिसंस्थापयामो यस्मात्प्रतिष्ठासंस्तावं हि प्रति

ष्ठापितेन संस्तुतं सामेत्यर्थः। इयं वै रथंतरमिति श्रुतेः। तमेवमुक्तवंतं ह प्रवाहणो जैवलिरुवाच। अंतवद्वै किल ते शालावत्य सामेत्यादि पूर्ववत्
तः शालावत्य आह। हंताहमेतद्भगवत्तो वेदानीति। विद्धीति होवाचेतरोऽनुज्ञात आह। अस्य लोकस्य का गतिरित्याकाश इति होवाच प्र
वाहण आकाश इति च पर आत्मा आकाशो वै नामेति श्रुतेः। तस्य हि कर्म सर्वभूतोत्पादकत्वं तस्मिन्नेव हि भूतप्रलयस्तत्तेजोऽसृजत तत्तेजः परस्यां
देवतायामिति हि वक्ष्यति। सर्वाणि ह वा इमानि स्थावरजंगमानि भूतान्याकाशादेव समुत्पद्यंते तेजोबन्नादिक्रमेण सामर्थ्यादाकाशं प्रत्य
स्तं यंति प्रलयकाले विपरीतेन क्रमेण। हि यस्मादाकाश एवैभ्यः सर्वेभ्यो भूतेभ्यो ज्यायान्महत्तरोऽयतः स सर्वेषां भूतानां परमयनं परायणं प्र

तिष्ठा त्रिष्वपि कालेष्वित्यर्थः। यस्मात्परं परोवरीयः वरीयसोऽप्येषः परश्च पि वरीयांश्च परोवरीयानुद्गीथः परमात्मा संपन्न इत्यर्थः। अत ए
व स एषोऽनंतोऽविद्यमानांतस्तमेतं परोवरीयांसं परमात्मभूतमनंतं तमेवं विद्वान्परोवरीयांसमुद्गीथमुपास्ते तस्यैतत्फलमाह। परोव
रीयः परं परं विशिष्टतरं जीवनं हास्य विदुषो भवतीति दृष्टं फलमदृष्टं च परोवरीयस उत्तरोत्तरविशिष्टतराने व ब्रह्माकाशांतांल्लोकान्जय
ति। य एतदेवं विद्वानुद्गीथमुपास्ते। किं च तमेतमुद्गीथं विद्वानतिधन्वा नाम तः शुनकस्यापत्यं शौनक उदरशांडिल्याय शिष्यायैतदुद्गी
थदर्शनमुक्त्वोवाच। यावत्ते तव प्रजायां प्रजासंततावित्यर्थः। उद्गीथं वेत्स्यंतीति ज्ञास्यंति। तावंतं कालं परोवरीयो ह एभ्यः प्रसिद्धे
भ्यो लौकिकजीवनेभ्य उत्तरोत्तरविशिष्टतरं जीवनं तेभ्यो भविष्यति। तथा दृष्टेऽपि परलोकेऽमुष्मिन्परोवरीयांल्लोको भविष्यतीत्युक्तवानतिधन्वा शौ

डिल्याया तिधन्वाशौ न कः स्यादेतत्फलं पूर्वेषां महाभाग्यानां नैदं युगीनामित्याशंकानिवृत्तये आह। स यः कश्चिदेतदेवं विद्वानुद्गीथमेतद्वे
पास्ते। तस्याप्येवमेव परोवरीयः एव हास्यास्मिंल्लोके जीवनं भवति। तथामुष्मिंल्लोके लोक इति लोके लोक इति॥ २॥ उद्गीथोपासनप्रसंगे
न प्रस्तावप्रतिहारविषयमप्युपासनं कर्तव्यमितीदमारभ्यते। आख्यायिका सुखावबोधार्था। मटचीहतेषु मटच्योऽशनयस्ताभिर्हते
षु नाशितेषु कुरुषु कुरूसस्येष्वित्यर्थः। ततो दुर्भिक्षे जात आटिक्या अनुपजातपयोधरादिस्त्रीव्यंजनया सह जायया उषस्तिर्ह नाम तः
चक्रस्यापत्यं चाक्रायण इभ्यो हस्ती तमर्हतीतीभ्य ईश्वरो हस्त्यारोहो वा तस्य ग्राम इभ्यग्रामः। तस्मिन्प्रद्राणकोऽन्नालाभाद्द्राकुत्सितां
गतोऽकुत्सितां गतिं गतोऽन्त्यावस्थां प्राप्त इत्यर्थः। उवास उषितवान् कस्यचिद्गृहमाश्रित्य। सोऽन्नार्थमटन्निभ्यं कुल्माषान्खादंतं यदृच्छया तंय
दृच्छयोपलभ्य बिभिक्षे तं याचितवान्। तमुषस्तिं ह उवाचेभ्यो। नेतोऽस्मान्मया भक्ष्यमाणादुच्छिष्टराशेः कुल्माषा अन्ये न विद्यंते यच्च ये रा
शौ मे मम उपनिहिताः प्रक्षिप्ता इमे भाजने किं करोमीत्युक्तः प्रत्युवाचोषस्तिरेतेषां मे तानित्यर्थः मे मह्यं देहीति होवाच। तान्स्मै इभ्यो
स्मा उषस्तये प्रददौ प्रदत्तवान्। अनुपानीयं समीपस्थमुदकं हंत गृहाणानुपानमित्युक्तः प्रत्युवाचोच्छिष्टं वै मम मे स्यादुदकं पीतं स्याद्यदि
पास्यामि इत्युक्त एवं तं प्रत्युवाचेतरः। किं न स्विदेते कुल्माषा अप्युच्छिष्टा इत्युक्त आहोषस्तिर्न वै अजीविष्यन्न जीविष्यामीमान्कुल्माषानखा
दन्न भयतायन्निति होवाच। कामं इच्छातो मम उदकपानं लभ्यत इत्यर्थः। अतश्चैतामवस्थां प्राप्तस्य विद्याधर्मयशोवतः स्वात्मपरोपकार

मे २

छां० भा०

समर्थस्यै तदपि कर्म कुर्वतो नागः स्पर्श इत्यभिप्रायः। तस्यापि जीवितं प्रत्युपायान्तरे सति जुगुप्सितमेतत्कर्म दोषाय ज्ञानावलेपेन कुर्वतो न
रकपातः स्यादेवेत्यभिप्रायः। प्रज्ञानकश्चैवेशब्दश्रवणात्। ताँश्च सखादित्वाऽतिशेषान् अतिशिष्टाञ्जायायै कारुण्यादाजहार। साऽग्र एव कु
ल्माषप्राप्तेः सुभिक्षा शोभनभिक्षा लब्धान्ना इत्येतत् बभूव संवृत्ता। तथापि स्त्रीस्वाभाव्यादनवज्ञाय तान् कुल्माषान् पत्युर्हस्तात् प्रतिगृह्य
निदधौ निक्षिप्तवती। स तस्याः कर्म जानन् प्रातरुषःकाले संजिहानः शयनं निद्रां वा परित्यजन्नुवाच पत्न्याः शृण्वन्त्याः। यद्यद्बतेति खिद्य
मानोऽन्नस्य स्तोकं लभेमहि। तद्भुक्त्वान्नं समर्थो गत्वा लभेमहि धनमात्रां धनस्याल्पं ततोऽस्माकं जीवनं भविष्यति। धनलाभे च कारणमाह।
राजासौ नातिदूरे स्थाने यक्ष्यते यजमानः। स च राजा मां पात्रमुपलभ्य सर्वैरार्त्विज्यैरार्त्विक्कर्मभिः आर्त्विक्कर्मप्रयोजना
येत्यर्थः। वृणीत। एवमुक्तवन्तं जायोवाच। हन्त गृहाण हे पत इम एव ये मद्धस्ते विनिक्षिप्तास्त्वया कुल्माषा इति। तान् खादित्वामुं यज्ञं राज्ञो वित
तं विस्तारितं जगाम। तत्र च गत्वोद्गातॄनुद्गातृपुरुषानागत्य स्तुवन्त्यस्मिन्निति आस्तावस्तस्मिन्नास्तावे स्तोष्यमाणानुपोपविवेश
समीपत उपविष्टस्तेषामित्यर्थः। उपविश्य स ह प्रस्तोतारमुवाच। हे प्रस्तोतरिति आमन्त्र्याभिमुखीकरणाय। या देवता प्रस्तावं प्रस्तावभक्ति
मनुगताऽऽयत्ता तां चेद्देवतां प्रस्तावभक्तेरविद्वान्सन् प्रस्तोष्यसि विदुषो मम समीपे। तत्परोक्षे चेद्विपतेत्तस्य मूर्द्धा। कर्ममात्रविदामनधि
कार एव कर्मणि स्यात्तद्वानिष्टमविदुषां कर्म दर्शनाद्दक्षिणमार्गश्रुतेश्च। अनधिकारे चाविदुषामुत्तर एवैको मार्गः श्रूयेत न च स्मार्त्तं कर्म

१२

निमित्तमेव दक्षिणा॥ पंथा॥ यज्ञेन दानेनेत्यादि श्रुतेः॥ तथोक्तस्य मयेति च विशेषणात्। विद्वत्समक्षमेव कर्मण्यधिकारो न सर्वत्राग्नि
होत्रस्मार्त्तकर्माध्ययनादिषु वानुज्ञायास्तत्र दर्शनात् कर्ममात्रविदामप्यधिकारः॥ सिद्धः॥ कर्मणीति। मूर्द्धा ते विपतिष्यतीत्येवो ज्ञाता
रः प्रतिहर्त्तारमुवाचेत्यादि समानमन्यत्। ते प्रस्तोत्रादयः कर्मभ्यः समारताः उपरताः॥ संतो मूर्द्धपातभयात्तूष्णीमासांचक्रिरे॥ १०॥ अथ
ऊर्वतः॥ १॥ अर्थवादथानंतरं ह एनमुषस्तिं यजमानो राजोवाच भगवंतं वा अहं विविदिषाणि वेदितुमिच्छामीत्युक्ते
उषस्तिरस्मि चाक्रायणस्तवापि श्रोत्रपथमागतो यदीति होवाचोक्तवान्स ह यजमान उवाच सत्यमेवमहं भगवंतं बहुगुणमश्रौषं स
र्वैश्च ऋत्विक्कर्मभिरार्त्विज्यैः पर्येषिषं पर्येषणं कृतवानस्म्यन्विष्य भगवतो वा अहमवित्त्यालाभेनान्यानिमानवृषि वृतवानस्म्यद्यापि भग
वांस्त्वेव मे मम सर्वैरार्त्विज्यैः ऋत्विक्कर्मार्थमस्त्विति। तथेत्याहोषस्तिः॥ किंत्वथैवं तर्ह्येत एव त्वया प्रवृत्ता मया समतिसृष्टाः मयास
म्यक्प्रसन्नेनानुज्ञाताः॥ संतुष्टुवतां। त्वया त्वेतत्कार्यं यावंत्वेभ्यः प्रस्तोत्रादिभ्यः॥ सर्वेभ्यो धनं दद्याः॥ प्रयच्छसि तावन्मम दद्याः॥ इत्यु
क्तस्तथेति ह यजमान उवाच। अथ हैनमौषस्त्यं वचः श्रुत्वा प्रस्तोतोपससाद उषस्तिं विनयेनोपजगाम। प्रस्तोतर्या देवतेत्यादि मामां भ
गवानवोचत्कतमा सा देवता या प्रस्तावमन्वायत्तेति पृष्टः॥ प्राण इति होवाच। युक्तं प्रस्तावस्य प्राणो देवतेति। कथं सर्वाणि ह स्था
वरजंगमानि भूतानि प्राणमेवाभिसंविशंति प्रलयकाले प्राणमनुलक्षयित्वा प्राणात्मना वा जिहते प्राणादेवोद्गच्छंतीत्यर्थः॥ उत्पत्ति

छां०भा० १४

काले शैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रास्तोष्यः प्रस्तवनं प्रस्तावभक्तिं कृतवानसि यदि मूर्द्धा शिरस्ते व्यपतिष्य
न्पतितमभविष्यत्तथोक्तस्य मया तत्काले मूर्द्धा ते व्यपतिष्यतीत्यतः साधु कृतं त्वया मया निषिद्धः कर्मणो यदुपरममकार्षीरित्य
भिप्रायः। तथोद्गातापप्रच्छ कतमा सोद्गीथभक्तिमनुगता या देवतेति पृष्ट आदित्य इति होवाच। सर्वाणीमानि भूतान्यादि
त्यमुच्चैः सन्तं गायन्ति शब्दयन्ति स्तुवन्तीत्यभिप्रायः। उच्छब्दसामान्यादुच्छब्दसामान्यादित्यप्राणः। तः सैषा देवतेत्यादि पूर्ववदेव
मथ हैनं प्रतिहर्तोपससाद। कतमा सा देवता प्रतिहारमन्वायत्ता इति पृष्टोऽन्नमिति होवाच। सर्वाणि ह वा इमानि भूतानि
अन्नमेवात्मानं प्रतिसर्वतः प्रतिहरमाणानि जीवन्ति। सैषा देवता प्रतिशब्दसामान्यात्प्रतिहारभक्तिमनुगता समानमन्यत्तथो
क्तं मयेति प्रस्तावोद्गीथप्रतिहारभक्तीः प्राणादित्यान्नदृष्ट्योपासीतेति समुदायार्थः। प्राणाद्यापत्तिः कर्मसमृद्धिर्वा फलमिति॥११॥
अतीतखण्डेऽन्नाद्यप्राप्तिनिमित्ता कष्टावस्थोक्ता उच्छिष्टोच्छिष्टपर्युषितभक्षणलक्षणा सा मा भूदित्यन्नलाभायाथानन्तरं शौवः श्वभिर्दृष्ट
उद्गीथ उद्गानं साम अतः प्रस्तूयते। तत्र किल बको नाम तः दल्भस्यापत्यं दाल्भ्यो ग्लावो वा नाम तः मित्रायाश्चापत्यं मैत्रेयो वा
शब्दश्चार्थे द्व्यामुष्यायणो ह्यसौ वस्तुविषये क्रियास्विव विकल्पानुपपत्तेः। द्विनामा द्विगोत्र इत्यादि हि स्मृतिर्दृश्यते
वो जयतः पिण्डमात्मनुद्गीथे बद्धचित्तत्वाद्दधावनाद्दाल्भ्यो वा शब्दः स्वाध्यायार्थं स्वाध्यायं ग्रामाद्बहिरुदकान्तं जगाम विवि

कर्तुं

१४

क्रोदेरास्छोदकान्यासींउद्वत्राजप्रतिपालयांचकारेतिवैकवचनाल्लिंगादेकोसाहृषिश्चाज्ञीयीथकालप्रतिपालनाद्दृषेःस्वाध्याय
यकरणमन्नकामतयेतिलब्धेतेऽतिप्रायोऽतःस्वाध्यायेनतोषितादेवताऋषिवोश्वरूपंगृहीत्वाश्वाश्वेतःसतस्माऋषयेतदनुग्र
हणार्थंप्रादुर्बभूवप्रादुश्चकार।तमन्येशुक्लःश्वानंक्षुल्लकाश्वानउपसमेत्याचुःउक्तवंतोऽन्नंनोऽस्मभ्यंभगवानागायत्वागायेनेन
निष्पादयत्वित्यर्थः।सुखंप्राणंवागादयोवाप्राणमन्वन्नतुजःस्वाध्यायपरितोषिताःसंतोऽपिक्षीयुरेनंश्वरूपमादायेतियुक्तमेव
प्रतिपन्नुमन्नानायामबलुंदिताःसमोवेऽत्येवमुक्तवंतःश्वाश्वेतस्माक्षुल्लकान्श्वानइहेवास्मिन्नेवदेशेमामांप्रातःकालउपसमीयात
तिदैर्घ्यंछांदसमीयातेतिप्रमादपाठोवाप्रातःकालकरणंतत्कालएवकर्त्तव्यार्थमन्नदस्यवासवितुरपराह्णेनास्तिमुख्यान्नतत्रैवबक
बकोदाल्भ्योग्लावोवामैत्रेयऋषिःप्रतिपालयांचकार।प्रतीक्षणंकृतवानित्यर्थः।तेश्वानस्तत्रैवावगम्यऋषेःसमक्षंयथैवेह
मणिबहिष्पवमानेनस्तोत्रेणस्तोष्यमाणाउद्गातृपुरुषाःसंरब्धाःसंलग्नाअन्योन्यमेवमेवमुखेनान्योन्यस्यपुच्छंगृहीत्वासरंतउथ
आसृप्रवंतःपरिक्रमणंकृतवंतइत्यर्थः।तएवंसंसृप्यसमुपविश्योपविष्टाःसंतोहिंचक्रुर्हिंकारंकृतवंतः।ॐमदामोपिबामोदेवो
द्योतनाद्वरुणोवर्षणाज्जगतः।प्रजापतिःपालनात्प्रजानांसविताप्रसवितृत्वात्सर्वस्यादित्यउच्यतेएतैःपर्यायैः।सएवंभूतआदित्यो
न्नमस्मभ्यमिहाहरत्वाहरत्विति।तएवंहिंकृत्वापुनरप्यूचुःसत्वंहेअन्नपतेसहिसर्वान्नस्यप्रसवितृत्वात्पतिः।नहितत्पाकेनो

६२

रथंतरे साम्नि प्रसिद्धः २। एवं रथंतरमित्यस्मात् संबंधसामान्याद्धावुकारस्तोभो २

छां॰ ना॰

प्रस्तुतमन्नमणुमात्रमपि जायते प्राणिनामतोऽन्नपतिः। हे अन्नपतेऽन्नमस्मभ्यमिहाहरा हरेत्यभ्यास आदरार्थः। ॐमिति॥१२॥ उक्तविषयोपा
सनं साम्नावयवसंबद्धमित्युक्तः। साम्नावयवांतरस्तोभाक्षरविषयाण्युपासनांतराणि संहतान्युपदिश्यंतेऽनंतरं साम्नावयवसंबंधत्वावि
शेषादयं वाव अयमेव लोको हाउकारः स्तोभोऽयं लोक इत्येवमुपासीत। वायुर्हाइकारो वामदेव्ये साम्नि हाइकारः प्रसिद्धो वायुसंबंधश्च
वामदेव्यस्य साम्नो योनिरित्यस्मात्सामान्याद्धाइकारं वायुदृष्ट्योपासीत। चंद्रमा अथकारः चंद्रदृष्ट्याऽथकारमुपासीत। अन्ने हीदं स्थित
मन्नात्मा चायं चंद्रः। थकाराकारसामान्याच्च। आत्मा इहेति स्तोभः प्रत्यक्षो ह्यात्मा इहेति व्यपदिश्यते इहेति च स्तोभस्तत्सामान्यादग्निरीकारः अग्नी
नि निधनानि चाग्नेयानि सर्वाणि सामान्यग्नेः नीयन्ते तत्सामान्यात्। आदित्य ऊकारः। उच्चैरूर्ध्वं संतमादित्यं गायंत्यूकारश्चायं स्तोभः। आदित्यदैव
त्ये साम्नि स्तोभः ऊ इत्यादित्य ऊकारो निहवमित्याह्वानमेकारः स्तोभ एहीति चाह्वयंतीति तत्सामान्याद्विश्वेदेवा औहोइकारो वैश्वदेव्ये सा
म्नि स्तोभस्य दर्शनात्। प्रजापतिर्हिंकारः। अनिरुक्तत्वाद्धिंकारस्य चाव्यक्तत्वात्। प्राणः स्वरः। स्वर इति स्तोभः प्राणस्य स्वरहेतुत्वसामान्यात्। अ
न्नं या या वा इति स्तोभोऽन्नम् अन्नेन हीदं यातीत्यतस्तत्सामान्यात्। वागिति स्तोभो विराडन्नं। देवताविशेषो वा वैराजे साम्नि स्तोभस्य दर्शनात्। अनिरु
क्तो व्यक्तत्वादिदं वेदं वेति निर्वक्तुं न शक्यत इत्यतः संचरो विकल्प्यमानस्वरूप इत्यर्थः। कोऽसावित्याह हुंकारोऽव्यक्तो ह्ययमतोऽनिरुक्त
विशेष एवोपास्य इत्यभिप्रायः। स्तोभाक्षरोपासनाफलमाह दुग्धेऽस्मै वाग्दोहमित्याद्युक्तार्थं। य एतामेवं यथोक्तलक्षणां साम्नां साम

१५

६

१५

वयवस्तोभाक्षरविषयामुपनिषदं दर्शनं वेद तस्यैतद्यथोक्तं फलमित्यर्थः॥ द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः॥ सामावयवविषयोपास
नाविशेषपरिसमाप्त्यर्थो वेति॥ ॥इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवत्पाद
कृतौ छांदोग्योपनिषद्विवरणे प्रथमः प्रपाठकः समाप्तः॥ ॥ओमित्येतदक्षरमित्यादिना सामावयवस्योपासनमनेकफलमुपदि विषय२
ष्टमनंतरं च स्तोभाक्षरविषयमुपासनमुक्तं सर्वथापि सामैकदेशसंबद्धमेव तदित्यथेदानीं समस्ते साम्नि समस्तसामविषयाण्यु
पासनानि वक्ष्यामीत्यारभते श्रुतिः॥ युक्तं ह्येकदेशोपासनानंतरमेकदेशिविषयमुपासनमुच्यत इति समस्तस्य सर्वावयवविशिष्ट
स्य पांचभक्तिकस्य साप्तभक्तिकस्येत्यर्थः॥ खल्विति वाक्यालंकारार्थः॥ साम्न उपासनं साधु समस्ते साम्नि साधुदृष्टिविधिपरत्वान्न पू
र्वोपासननिंदार्थत्वं साधुशब्दस्य ननु पूर्वत्राविद्यमानं साधुत्वं समस्ते साम्नि विधीयते। न साधु सामेत्युपास्त इत्युपसंहारात्साधुश
ब्दः॥ शोभनवाची॥ कथमवगम्यत इत्याह। यत्खलु लोके साधु शोभनमनवद्यं प्रसिद्धं तत्सामेत्याचक्षते कुशलाः॥ यदसाधु विपरीतं
तदसामेति तत्रैव साध्वसाधुविवेककरण उताप्याहुः॥ साम्नैनं राजानं सामंतं वा उपागाद् उपगतः। तदा कोऽसौ यतोऽसाधुत्वशङ्काभ्या
शं कासदित्यभिप्रायः॥ शोभनाभिप्रायेण साधुनैनमुपागादित्येवं तत्र आहुः लौकिका बंधनाद्यसाधुकार्यमपश्यंतो यत्र पुनर्विपर्ययो
बंधनाद्यसाधुकार्यं पश्यंति तत्रासाम्नैनमुपागादित्यसाधुनैनमुपागादित्येवं तदाहुः॥ अथोताप्याहुः॥ स्वसंवेद्यं साम नोऽस्माकं बतेत्य

छां० ना०

नुकंपयंत॥ संहत्य मित्याङ्करे तत्रै रुक्तं भवति यत्साधु भवति साधु बतेत्येव तदाहुः॥ विपर्यये जातेऽसमानो बतेति यदसाधु भवत्यसाधु बते
त्येव तदाहुः॥ तत्साम साधुशब्दयोरेकार्थत्वं सिद्धमतः॥ स य॥ कश्चित्साधु सामेति साधुगुणवत्सामेत्युपास्ते समस्तं साम साधुगुणवद्विद्वांस्त
स्यै तत्फलमभ्याशो ह क्षिप्रं । यदिति क्रियाविशेषणार्थमेव मुपासकं साधवः शोभनधर्माः॥ श्रुतिस्मृत्यविरुद्धा आ च गच्छेयुरागच्छेयुश्च न के
वलमागच्छेयुरुपनमेयुरुपनमेयुश्च भोग्यत्वेनोपतिष्ठेयुरित्यर्थः॥१॥ कानि पुनस्तानि साधुदृष्टिविशिष्टानि समस्तानि सामान्युपास्यानी
तीमानि तान्युच्यन्ते लोकेषु पञ्चविधमित्यादीनि ननु लोकादिदृष्ट्या तान्युपास्यानि साधुदृष्ट्या चेति विरुद्धं न साधुत्वस्य कारणस्य लोका
दिकार्येष्व[illegible]नुगतत्वान्मृदादिवद्घटादिविकारेषु साधुशब्दवाच्यो धर्मो ब्रह्म वा सर्वथापि लोकादिकार्येष्वनुगतमतो यथा यत्र
घटादिदृष्टिर्मृदादिदृष्ट्यनुगतैव सा तथा साधुदृष्ट्यनुगतैव लोकादिदृष्टिः इमो दिकार्यत्वाल्लोकादीनां यद्यपि कारणत्वमविशिष्टं ब्र
ह्म धर्मयोस्तथापि धर्म एव साधुशब्दवाच्य इति युक्तं साधुकारी साधुर्भवतीति धर्मकार्यविषये साधुशब्दप्रयोगात्र ननु लोकादिकार्ये
षु कारणस्यानुगतत्वादर्थप्राप्तैव तद्दृष्टिरिति साधु सामेत्युपास्त इति न वक्तव्यमनु शास्त्रगम्यत्वात्तद्दृष्टेः सर्वत्र हि शास्त्रप्रापिता एव
धर्मा उपास्या न विद्यमाना अप्यशास्त्रीयाः॥ लोकेषु पृथिव्यादिषु पञ्चविधं पञ्चभक्तिभेदेन पञ्चप्रकारं साधु समस्तं सामोपासीत
कथं पृथिवी हिङ्कारो लोकेष्विति या सप्तमी तां प्रथमात्वेन विपरिणाम्य पृथिवीदृष्ट्या हीङ्कारे पृथिवी हिङ्कार इत्युपासीत व्यत्यस्य वा स

१६

१६

न्तमीक्षतिं लोकविषयां हिंकारादिषु पृथिव्यादिदृष्टिं कृत्वोपासीत तत्र पृथिवी हिंकारः प्राथम्यसामान्यात् अग्निः प्रस्तावो ऽग्नौ हि कर्माणि प्रस्तू-
यन्ते प्रस्तावश्च प्रस्तुतिः अन्तरिक्षमुद्गीथो ऽन्तरिक्षं हि गगनं गकारविशिष्टश्चोद्गीथः आदित्यः प्रतिहारः प्रति प्राण्यन्ति मुखत्वान्मां प्रति मां प्रती
ति द्यौर्निधनं दिवि निधीयन्ते हीतो गता इत्यूर्ध्वगतेषु लोकदृष्ट्या सामोपासनमुक्तम् अथावृत्तेष्ववाङ्मुखेषु पञ्चविधमुच्यते सामोपासनं गत्या-
गतिविशिष्टा हि लोका यथा ते तथादृष्ट्यैव सामोपासनं विधीयते यतो ऽत आवृत्तेषु लोकेषु द्यौर्हिंकारः प्राथम्यादादित्यः प्रस्तावः उदिते ह्या-
दित्ये प्रस्तूयन्ते कर्माणि प्राणिनाम् अन्तरिक्षमुद्गीथः पूर्ववत् अग्निः प्रतिहारः प्राणिभिः प्रतिहरणादग्नेः पृथिवी निधनं तत आगतानामिह नि-
धनात् उपासनफलं कल्पन्ते समर्था भवन्ति हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च गत्यागतिविशिष्टा भोग्यत्वेन व्यवतिष्ठन्त इत्यर्थः य एतदेवं विद्वा-
ल्लोकेषु पञ्चविधं समस्तं साधु सामेत्युपास्त इति सर्वत्र योजना सप्तविधेष्वपि ॥२॥ वृष्टौ पञ्चविधं सामोपासीत लोकस्थितेर्वृष्टिनिमित्तत्वा-
दानन्तर्यं पुरोवातो हिंकारः पुरोवातादि उद्ग्रहणान्ता हि वृष्टिर्यथा साम हिंकारादिनिधनान्तम् अतः पुरोवातो हिंकारः प्राथम्यात् मेघो जाय-
ते स प्रस्तावः प्रावृषि मेघजनने वृष्टेः प्रस्ताव इति हि प्रसिद्धिः वर्षति स उद्गीथः श्रैष्ठ्यात् विद्योतते स्तनयति स प्रतिहारः प्रतिहृतत्वात् उद्गृह्णा-
ति तन्निधनं समाप्तिसामान्यात् फलमुपासनस्य वर्षति हास्मा इच्छातः तथा वर्षयति हासत्यामपि वृष्टौ य एतदित्यादि पूर्ववत् ॥३॥ सर्वास्वप्सु
पञ्चविधं सामोपासीत वृष्टिपूर्वकत्वात्सर्वासामपामानन्तर्यं मेघो यत्संप्लवते एकीभावेनेतरेतरं घनीभवति मेघो यदा उन्नतस्तदा संप्ल-
वत इत्युच्यते मेघस्तदापामारम्भस्स हिंकारो यद्वर्षति स प्रस्तावः आपः सर्वतो व्याप्तुं प्रस्तुताः याः प्राच्यः स्यन्दन्ते स उद्गीथः श्रैष्ठ्यात् याः प्रती

छां॰ भा॰

वयस्स प्रतिहारः प्रतिशब्दसामान्यात् समुद्रो निधनं तन्निधनत्वात् न ह अप्सु प्रैति नेच्छति वेदाः सुमान् भवति फलम् ॥४॥ ॥ ऋतुषु पञ्चविधं सा
मोपासीत ऋतु व्यवस्थाया यथाक्रां बुनिमित्तत्वाद्दान तर्य्यं वसन्तो हिंकारः प्राथम्यात् ग्रीष्मः प्रस्तावो यवादिसंग्रहः प्रस्तूयते हि प्रावृडर्थं वर्षा
उद्गीथः प्राधान्यात् शरत् प्रतिहारो रोगिणां मृतानां च प्रतिहरणात् हेमन्तो निधनं निवाते निधनात् प्राणिनां फलं कल्पन्ते ऋतु व्यवस्थानुरूप
भोग्यत्वेनास्मा उपसकाय तथैव ऋतुमानार्तवैर्भोगैश्च सम्पन्नो भवतीत्यर्थः ॥ पशुषु पञ्चविधं सामोपासीत सम्यग्वृत्तेषु पूर्ववत् पशुषु पराव्यः
काल इत्यानन्तर्य्यमजा हिंकारः प्राधान्यात् प्राथम्याद्वा अजः पशूनामिति श्रुतेरवयः प्रस्तावस्साहचर्य्यदर्शनादजादीनां गाव उद्गीथः श्रे
ष्ठ्यादश्वाः प्रतिहारः प्रतिहरणात् पुरुषाणां पुरुषा निधनं पुरुषाश्रयत्वात् पशूनां फलं भवति हास्य पशवः पशुमान् भवति पशुफलै
श्च भोगत्यागादिभिर्युज्यत इत्यर्थः ॥६॥ प्राणेषु पञ्चविधं परोवरीयः सामोपासीत परं परं वरीयस्त्वगुणवत्प्राणदृष्टिविशिष्टं सामोपासी
तेत्यर्थः प्राणो घ्राणं हिंकारः उत्तरोत्तरं वरीयसां प्राथम्याद्वाक् प्रस्तावो वाचा हि प्रस्तूयते सर्वं वाग्वरीयसी प्राणादप्राप्तमप्युच्यते वाचा प्रा
प्तस्यैव तु गन्धस्य ग्राहकः प्राणो वाचो बहुतरविषयं प्रकाशयति चक्षुरतो वरीयो वाच उद्गीथः श्रैष्ठ्यात् श्रोत्रं प्रतिहारः प्रतिहृतत्वाद्वरीय
श्चक्षुषस्सर्वतः श्रवणात् मनो निधनं मनसि हि निधीयन्ते पुरुषस्य भोग्यत्वेन सर्वेन्द्रियाहृता विषया वरीयस्त्वं च श्रोत्रान्मनसः सर्वेन्द्रिय
व्यापकत्वादतीन्द्रियविषयोऽपि मनसो गोचर एवेति यथोक्तहेतुभ्यः परोवरीयांसि घ्राणादीनि वेतान्येतद्दृष्ट्यादिविशिष्टं परोवरीयस्सामोपा
स्ते परोवरीयो हास्य जीवनं भवतीत्युक्तार्थमिति तु पञ्चविधस्य साम्न उपासनमुक्तमिति सप्तविधे वक्ष्यमाणविषये बुद्धिसमाधाना

१७ २५

र्थं निरपेक्षो हि पंचविधं वक्ष्यमाणं बुद्धिं समाधित्सति ॥ २ ॥ अथानंतरं सप्तविधस्य समस्तस्य साम्न उपासनं साध्विदमारभ्यते । वाचीति स
प्तमी पूर्ववद्वाग्दृष्टिविशिष्टं सप्तविधं सामोपासीतेत्यर्थः । यत्किंच वाचः शब्दस्य हुं इति यो विशेषः स हिंकारो हकारसामान्यात् । यत्प्र इति श
ब्दरूपं स प्रस्तावः प्रसामान्यात् । यदा इति तदादिः आकारसामान्यात् आदिरित्योंकारः सर्वादित्वात् । यदुदिति स उद्गीथ उत्पूर्वत्वादुद्गीथस्य । य
त्प्रतीति स प्रतिहारः प्रतिसामान्यात् । यदुपेति स उपद्रव उपोपक्रमत्वादुपद्रवस्य । यन्नीति तन्निधनं निशब्दसामान्यात् ॥ ३ ॥ दुग्धेऽस्मा इत्याद्युक्ता
र्थं ॥ अवयवमात्रे साम्न्यादित्यदृष्टिः पंचविधे प्रोक्ता प्रथमे चाध्याये । इदानीं खल्वमुमादित्यं समस्ते साम्न्यवयवविभागशोऽध्यस्य सप्तवि
धं सामोपासीत कथं पुनः सामत्वमादित्यस्येत्युच्यते उद्गीथत्वहेतुवदादित्यस्य सामत्वे हेतुः कोऽसौ सर्वदा समो वृद्धिह्रासाभावात्तेन हेतु
ना साम आदित्यो मां प्रति मां प्रतीति तुल्यां बुद्धिमुत्पादयत्यतः सर्वेण समः । अतः साम समत्वादित्यर्थः । उद्गीथभक्तिसामान्यवचनादेव लोको
दिषूक्तसामान्याद्धिंकारादित्वं गम्यत इति हिंकारादित्वे कारणं नोक्तं सामत्वे पुनः सवितुरुक्तं कारणं न सुबोधमिति समत्वमुक्तं तस्मि
न्नादित्येऽवयवविभागश इमानि वक्ष्यमाणानि सर्वाणि भूतान्यन्वायत्तान्यनुगतान्यादित्यमुपजीव्यत्वेनेति विद्यात् । कथं तस्यादित्यस्य यत्पु
रोदयाद्धर्मरूपं स हिंकारो भक्तिस्तत्रेदं सामान्यं यत्तत्तस्य हिंकारभक्तिरूपं तदस्यादित्यस्य साम्नः पशवो रूपमुपजीवन्तीत्यर्थः । यस्मा
देवं तस्मात्ते हिं कुर्वन्ति पशवः प्रागुदयात्तस्मात्ते हिंकारभाजिनो ह्येतस्यादित्याख्यस्य साम्नस्तद्वदस्यादित्याख्यस्य साम्नः प्रस्तावभा
दयोऽन्वायत्तास्तद्भक्तिमुपजीवन्तीत्यर्थः । यस्मादेवं तस्मात्ते हिं कुर्वन्ति पशवः प्रागुदयात्तस्मात्ते हिंकारभाजिनो ह्येतस्यादित्याख्यस्य सा
म्नस्तद्भजनशीला हि ते यतः । तेषु युक्तमेव । अथ यत्प्रथमोदिते सवितृरूपं तदस्य मनुष्या अन्वायत्ताः । पूर्ववत्तस्मात्ते प्रस्तुतिं प्रशंसां का

गवादयोऽन्वायत्ता अनुगतास्तद्भक्तिं ४

छां॰ ना॰

२ नं मादाय्यात्मानमेवालंबनत्वेन गृहीत्वा परिपतंति गच्छंति अतस्त्रआकारसामान्यादादित्यस्तद्भक्तिभाजीनि ह्येतस्य साम्नोथ यत्संप्रतिमध्यंदिने स महामध्यंदिन इत्यर्थः स उद्गीथस्तद्भक्ति
स्तत्तस्य देवा अन्वायत्ता द्योतनातिशयात्तत्काले तस्मात्ते सत्तमा विशिष्टतमाः प्राजापत्यानां प्रजापत्यपत्यानामुद्गीथभाजिनो ह्येतस्य साम्नोथ यदूर्ध्वं मध्यंदिनात्प्रागपराह्णाद्यदू

मयन्ते तस्मात्प्रस्तावभाजिनो ह्येतस्य साम्नोथ यत्संगववेलायां गवां रश्मीनां संगमनं संगमो यस्यां वेलायां गवां वा वत्सैः सा संगववेला
तस्मिन्काले यत्सवितृरूपं स आदिर्भक्तिविशेष ओंकारस्तदस्य वयांसि पक्षिणोन्वायत्तानि यत एवं तस्मात्तानि वयांस्यन्तरिक्षे नारंबणानि
लंबनान्यात्मानं पीत्यर्थः॥ यत॰ प्रतिहारभाजिनो ह्येतस्य साम्नो गर्भा अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्यारण्याः पशवो
न्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा भीताः कक्षं श्वभ्रमरण्यं भयशून्यमित्युपद्रवन्त्युपगच्छन्ति दृष्ट्वोपद्रवाद्रुपद्रवभाजिनो ह्येतस्य साम्नोथ यत्प्रथ
मास्तमिते दर्शनं जिगमिषति सवितरि तन्निधनं तदस्य पितरोन्वायत्तास्तस्मात्तानिदधति पितृपितामहप्रपितामहरूपेण दर्भेषु निक्षिपन्ति
तौंस्तदर्थं पिण्डान्स्थापयन्ति निधनसंबंधान्निधनभाजिनो ह्येतस्य साम्नः॥ पितर एवमवयवशः सप्तधा विभक्तं खल्वमुमादित्यं सप्तविधं
सामोपास्ते तस्य तदापत्तिः फलमिति वाक्यशेषः॥ मृत्युः सादित्याहोरात्रादिकालेन जगत्समापयितृत्वात्तस्यातितरणाय इदं सामोपासनमुप
दिश्यते॥ अथ खल्वनन्तरमादित्यमृत्युविषयसामोपासनस्यात्मसंमितं स्वावयवतुल्यतया संमितं येमात्मतुल्यतया वा संमितमतिमृत्यु मृत्यु
त्ययहेतुत्वाद्यथा प्रथमेध्याये उद्गीथभक्तिनामाक्षराणि उद्गीथ इत्युपास्यत्वेनोक्तानि तथेह साम्नः सप्तभक्तिमतोक्षराणि समाहृत्य त्रिंशि
त्रिंशत्समतया साम्नत्वं परिकल्प्योपास्यत्वेनोच्यन्ते तदुपासनेन मृत्युगोचराक्षरसंख्यासामान्येन मृत्युं प्राप्य तदतिरिक्ताक्षरेण तस्यादित्य
स्य मृत्योरतिक्रमणाय संक्रमं कल्पयति अतिमृत्युः सप्तविधं सामोपासीत मृत्युमतिक्रान्तमतिरिक्ताक्षरसंख्ययेत्यतिमृत्युसाम तस्य प्रथम
भक्तिनामाक्षराणि हिंकार इत्येतत्त्र्यक्षरं भक्तिनाम प्रस्ताव इति च त्र्यक्षरमेव नाम तत्पूर्वेण समम् आदिरिति द्व्यक्षरं सप्तविधस्य साम्नः
संख्यापूरणे ओंकार आदिरित्युच्यते प्रतिहार इति चतुरक्षरं तत इहैकमक्षरमपछिद्याद्यक्षरयोः प्रक्षिप्यते तेन तत्सममेव भवत्य
पंस विस्तुस प्रतिहारस्तदस्य गर्भा अन्वायत्ता अतस्ते सविस्तुप्रतिहारभक्तिरूपेणोर्ध्वं प्रतिहृताः संतो नावपद्यन्ते नावपतन्ति द्वारे सत्य २

१८

गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिस्समं भवत्यक्षरमतिशिष्यतेऽतिरिच्यते तेन वैषम्ये प्राप्ते साम्नस्समत्वकर
णायाह तदेकमपि सदक्षरमिति त्र्यक्षरमेव भवत्यतस्तत्समं निधनमिति त्र्यक्षरं तत्सममेव भवत्येवं त्र्यक्षरसमतया सामत्वं सम्पा
द्य यथाप्राप्तान्येवाक्षराणि संख्यायन्ते तानि ह वा एतानि सप्तभक्तिनामाक्षराणि द्वाविंशतिः तत्रैकविंशत्या संख्ययादित्यमाप्नो
ति मृत्युं यस्मादेकविंश इतोऽस्माल्लोकादसावादित्यस्संख्यया द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंश इ
ति श्रुतेरतिशिष्टेन द्वाविंशेनाक्षरेण परं मृत्योरादित्याज्जयत्याप्नोतीत्यर्थः॥ यच्च तदादित्यात्परं किं तन्नाकं कमिति सुखं तस्य प्रति
षेधोऽकं तन्ना॥ऽकं भवतीति नाकमेवेत्यर्थः॥ मृत्युविषयत्वाद्दुःखस्य विशोकं च तद्विगतशोकं मानसदुःखरहितमित्यर्थः॥ तदाप्नोती
त्युक्तस्यैव पिण्डार्थमाहैकविंशतिसंख्ययादित्यस्य जयमाप्नोति तु परो ह्यस्यैवं विद आदित्यजयान्मृत्युगोचरात्परो जयो भवति द्वा
विंशत्यक्षरसंख्ययेत्यर्थः॥ य एतदेवं विद्वानित्याद्युक्तार्थं तस्यैतद्यथोक्तं फलमिति द्विरभ्यासस्साप्तविध्यसमाप्त्यर्थः॥ विना नामग्र
हणं पञ्चविधस्य सप्तविधस्य च साम्न उपासनमुक्तमथेदानीं गायत्र्यादिनामग्रहणपूर्वकं विशिष्टफलानि सामोपासना
न्तराण्युच्यन्ते यथाक्रमं गायत्र्यादीनां कर्मणि प्रयोगस्तथैव मनो हिंकारो मनसस्सर्वकरणप्रवृत्तीनां प्राथम्यात्तदानन्तर्या
द्वाक्प्रस्तावश्चक्षुरुद्गीथः श्रैष्ठ्याच्छ्रोत्रं प्रतिहारः प्रतिहृतत्वात्प्राणो निधनं यथोक्तानां प्राणे निधनात्स्वापकाले एतद्गायत्रं सा
म प्राणेषु प्रोतं गायत्र्याः॥ प्राणसंस्तुतत्वात्स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवत्यविकलकरणो भवतीत्येतत्सर्वमायु

उत्पत्ते

छां० भा०

तिशतंवर्षाणिसर्वमायुः पुरुषस्येतिश्रुतेर्ज्योग्जीवतिमहान्भवतिप्रजादिभिर्महान्कीर्त्यागायत्र्योपासकस्यैतद्व्रतंभवति
यन्महामनस्त्वमक्षुद्रचित्तः स्यादित्यर्थः॥ अभिमंथतिसहिंकारः॥ प्राथम्याद्धूमोजायतेसप्रस्तावआनंतर्याज्ज्वलति
सउद्गीथोहविःसंबंधाच्छ्रैष्ठ्यंज्वलनस्यांगाराभवंतिसप्रतिहारोऽङ्गाराणांप्रतिहृतत्वादुपशामःसावशेषत्वादग्नेस्सं
मानि॥ शेषोपशमः॥ समाप्तिसामान्यान्निधनमेतद्रथंतरमग्नौप्रोतंमंथनेह्यग्निर्गीयतेसयइत्यादिपूर्ववत्॥ ब्रह्मवर्चसीवृ
त्तस्वाध्यायनिमित्तंतेजोब्रह्मवर्चसंतेजस्तुकेवलंत्विड्भावोन्नादोदीप्ताग्निर्नप्रत्यङ्ङग्नेराचामेन्नभक्षयेत्॥ किंचि
न्ननिष्ठीवेत्श्लेष्मनिरसनंचनकुर्यात्तद्व्रतम्॥ उपमंत्रयतेसंकेतंकरोति प्राथम्यात्सहिंकारोज्ञपयतेतोषयतिसप्रस्ता

१९

वः सहशयनमेकपर्यंकगमनमुद्गीथः श्रैष्ठ्यात्प्रतिस्त्रीशयनंस्त्रीयोनिमुखीनावःप्रतिहारः॥ कालंगच्छतिमैथुनेनपा

१९

रंसमाप्तिंचगच्छतितन्निधनमेतद्वामदेव्यंमिथुनेप्रोतंवायुचाग्निमिथुनसंबंधात्सयइत्यादिपूर्ववत्॥ मिथुनीभवत्यविधु
रोभवतीत्यर्थः॥ मिथुनान्मिथुनात्प्रजायतइत्यमोघरेतस्त्वमुच्यतेनकांचनकांचिदपिस्त्रियंस्वात्मतल्पप्राप्तांनपरिहरे
त्समागमार्थिनींवामदेव्यसामोपासनांगत्वेनविधानादेतस्मादन्यत्रप्रतिषेधस्मृतयोवचनप्रामाण्याद्धर्मावगतेर्नप्र
तिषेधशास्त्रेणास्यविरोधः॥ उद्यन्त्ससवितासहिंकारः॥ प्राथम्याद्दर्शनस्योदितः॥ प्रस्तावः॥ प्रस्तवनहेतुत्वात्कर्मणांम
ध्यंदिनउद्गीथः॥ श्रैष्ठ्याद्अपराह्णः॥ प्रतिहारः॥ पश्वादीनांगृहान्प्रतिहरणादस्तंयन्निधनंरात्रौगृहेनिधानात्प्राणिनामेतद्बृ

३

ह दादित्ये प्रोतं बृहत आदित्यदैवतत्वात्सय इत्यादि पूर्ववत्॥ तपंतं न निंदेत् तद्व्रतम्॥ अभ्राण्य् ब्रुद्वैरणान्मेघ उदकसे ह्यब्
दु क्तार्थमन्यदेतद्वैरूपं नामसाम पर्जन्ये प्रोतमनेकरूपत्वाद् आदित्ति॥ पर्जन्यस्य वैरूप्यं विरूपांश्च सुरूपांश्च ज्ञावीश
न्वतीन्पशून् नवरूपैर्प्राप्नोतीत्यर्थः॥ वर्षंतं न निंदेत् तद्व्रतम्॥ वसन्तो हिंकारः॥ प्राथम्याद्ग्रीष्मः॥ प्रस्ताव इत्यादि पूर्ववत्॥ एतद्वै
राजस्वृतुषु प्रोतं वेद विराजते ॠ वघय त्रैव आर्त्वैर्द्वमै विराजन्ते एवं प्रजादिभिर्विद्वानित्यर्थः ऋतून्न निंदेत् तद्व्रतम्॥ पृथि
वी हिंकार इत्यादि पूर्ववत्॥ शाक्वर्य इति नित्यं बहुवचनं रेवत्य इव लोकेषु प्रोता लोकी भवति लोकफलेन युज्यत इत्यर्थः॥
लोकान्न निंदेत् तद्व्रतम्॥ अजा हिंकार इत्यादि पूर्ववत्॥ पशुषु प्रोता॥ पशून्न निंदेत् तद्व्रतम्॥ लोम हिंकारो देहावयवानां प्राथ
म्यात्त्वक् प्रस्ताव आनंतर्यान्मांसमुद्गीथः॥ अस्थ्या दास्थि प्रतिहारः॥ प्रतिहततत्वान्मज्जा निधनमान्त्यादेतद्यज्ञायज्ञीयं नाम साम
देहावयवेषु प्रोतमंगी भवति समग्रांगो भवतीत्यर्थः॥ नांगेन हस्तपादादिना विह्वर्छति न कुटिली भवति पंगुः कुणिर्वेत्यर्थः॥
संवत्सरं संवत्सरमात्रं मज्ञो मांसानि नाश्नीयान्न लक्षयेद्बहुवचनं मत्स्यादीनामुपलक्षणार्थं मज्ज्ञो नाश्नीयादिति सर्वदे
व वा नाश्नीयादिति वा व्रतम्॥ अग्निर्हिंकारः॥ प्रथमस्थानत्वाद्वायुः प्रस्ताव आनंतर्यात् सामान्यादादित्य उद्गीथः॥ श्रेष्ठ्यान्नक्ष
त्राणि प्रतिहारः॥ प्रतिहततत्वाच्चंद्रमा निधनं कर्मिणां तन्निधनादेतद्राजनं देवतासु प्रोतं देवतानां सद्वीत्तिमत्वाद्धि तत्फलम्॥

मेतासामेवाग्न्यादीनांदेवतानांसलोकतांसमानलोकतांसार्ष्टितांसमानर्द्धित्वंसायुज्यंसयुग्भावमेकदेहदेहित्वमित्येतद्वा
शब्दात्खलुप्तोद्रष्टव्यः॥सलोकतांवेत्यादिभावनाविशेषतः॥फलविशेषोपपत्तेर्गच्छतिप्राप्नोतिसमुच्चयानुष्ठानोपपत्तेश्चब्राह्म
णान्नेनिर्देशत्रुतम्॥एतेदेवाः॥प्रत्यक्षंयद्ब्राह्मणाइतिश्रुतेर्ब्राह्मणनिन्दादेवतानिन्देवेति॥त्रयीविद्याहिंकारोग्न्यादिसाम्नआ
नंतर्यंत्रयीविद्यायाअग्न्यादिकार्यत्वश्रुतेर्हिङ्कारः॥प्राथम्यात्सर्वकर्तव्यानांत्रयइमेलोकास्तत्कार्यत्वादत्रराइतिप्रस्तावोग्न्या
दीनामुद्गीथत्वंश्रेष्ठ्यान्नक्षत्रादीनांप्रतिहर्तत्वासप्रतिहारत्वंसर्पादीनांयकारसामान्यान्निधनत्वमेतत्सामनामविशेषाभावा

त्सामसमुदायः॥सामशब्दः॥सर्वस्मिन्प्रोतंत्रयीविद्यादिहि सर्वत्रयीविद्याहृष्ट्वाहिंकारादिसामलक्षये उपास्यात्अतीतविष
सामोपासनेषुयत्रयत्रप्रोतंयत्सामतद्दृष्ट्वातदुपास्यामितिकर्मगाणांदृष्टिविशेषणाद्भास्येवसंस्कार्यत्वात्सर्वविषय
सामविदः॥फलंसर्वंहभवतिसर्वेश्वरोभवतीत्यर्थः॥निरूपचरितसर्वभावेहिदिग्भ्योबलिप्राप्त्युपपत्तिस्तदेतस्मिन्नर्थे
एषश्लोकोमन्त्रोप्यस्तियानिपञ्चधापञ्चप्रकारेणहिंकारादिविभागेः॥प्रोक्तानित्रीणि॥त्रीणित्रयीविद्यादीनितेभ्यः॥पञ्च
त्रिकेभ्योज्यायोमहत्तरंव्यतिरिक्तमन्यद्वस्त्वन्तरंनास्तिनविद्यतइत्यर्थः॥तत्रैवहिसर्वस्यान्तर्भावोयस्तद्यथोक्तंसर्वात्मकं
सामवेदसवेदसर्वंसर्वज्ञोभवतीत्यर्थः॥सर्वादिशः॥सर्वदिक्स्था अस्माएवंविदेबलिंभोगंहरन्तिप्रापयन्तीत्यर्थः॥सर्वम

स्मि उद्गायामीत्येवमेतत्सामोपासीत तस्यैतद्देवव्रतं द्विरुक्तिः॥ सामोपासनसमाप्त्यर्थी। सामोपासनप्रसङ्गेन गानविशेषादि
सम्पदुद्गातुरुपदिश्यते फलविशेषसम्बन्धाद्विनर्दि विशिष्टो नर्द स्वरविशेषः ऋषभकूजितसमो स्यात्सीति विनर्दि गान
मितिवाक्यशेषः॥ तच्च साम्नस्सम्बन्धि पशुभ्यो हितं पशव्यमग्नेरग्निदेवत्यं चोद्गीथमुद्गानं तदहमेवं विशिष्टं वृणे प्रार्थय इ
ति कश्चिद्यजमान उद्गाता वा मन्यते निरुक्तो मुकसम इत्यविशेषितः॥ प्रजापतेः॥ प्रजापतिदेवत्यस्स गानविशेष आनि
रुक्तः प्रजापतेर्निरुक्तस्स्पष्टस्सोमस्य सोमदेवत्यस्स उद्गीथ इत्यर्थः॥ मृदु श्लक्ष्णं च गानं वायोर्वायुदेवत्यं तत्श्लक्ष्णं ब
लवच्च प्रयत्नाधिक्योपेतमिन्द्रस्यैन्द्रं तद्गानं क्रौञ्चं क्रौञ्चपक्षिनिनादसमं बृहस्पतेर्बार्हस्पत्यं तदपध्वान्तं भिन्नकांस्यस्वर
समं वरुणस्यैतद्गानं तान्सर्वानेवोपसेवेत प्रयुञ्जीत वारुणं त्वेवैकं वर्जयेदन्यत्सर्वं देवेभ्य आगायानि साधयानि स्वधां
पितृभ्य आगायान्याशां मनुष्येभ्य आशां प्रार्थनां प्रार्थितमित्येतत्तृणोदकं पशुभ्यस्स्वर्गं लोकं यजमानायान्नमात्मनि मह्यमा
गायानीत्येतानि मनसा चिन्तयन्ध्यायन्नप्रमत्तः॥ स्वरोष्मव्यञ्जनादिभ्यः॥ स्तुवीत सर्वे स्वरा अकारादय इन्द्रस्य बलकर्मणः॥
प्राणस्यात्मानो देहावयवस्थानीयाः॥ सर्वे ऊष्माणः॥ शषसहादयः॥ प्रजापतेस्सर्गकर्मणो विराजः कश्यपस्य वात्मानस्स
र्वे स्पर्शाः कादयो व्यञ्जनानि मृत्योरात्मानस्तमेवं विद्वांसमुद्गातारं यदि कश्चित्स्वरेषूपालभेत स्वरस्त्वया दुष्टः प्रयुक्त इत्येव

ना

28

छां०भा० सुपालब्ध इन्द्रं प्राणमीश्वरं शरणमाश्रयं प्रपन्नोऽभूवं स्वरान्प्रयुञ्जानोऽहं स इन्द्रो यत्तव वक्तव्यं त्वां प्रति वक्ष्यति स एवं देव उ
त्तरं दास्यतीति ब्रूयादथ यद्येनमूष्मसु तथैवोपालभेत प्रजापतिं शरणं प्रपन्नोऽभूवं स त्वा प्रतिपेक्ष्यति संचूर्णयिष्यतीत्ये
नं ब्रूयादथ यद्येनं स्पर्शेषूपालभेत मृत्युं शरणं प्रपन्नोऽभूवं स त्वा प्रति धक्ष्यति भस्मीकरिष्यतीत्येनं ब्रूयाद्यत इन्द्राद्यात्मानः
स्वरादयोऽतः सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्यास्तथाहमिन्द्रे बलं ददान्यादधानीति तथा सर्व ऊष्माणोऽग्रस्ता अनरस्ता
विवृता अनिरस्ता बहिरप्रक्षिप्ता विवृता विवृतप्रयत्नोपेताः प्रजापतेरात्मानं परिददानि प्रयच्छानीति सर्वे स्पर्शा लेशेन शनकैरनभिनिहिता अनभिनिक्षिप्ता वक्तव्या मृत्योरात्मानं बालानिव शनकैः परिहरन्मृत्योरात्मानं परिहराणीति ॥ ओंकारस्योपासनविध्यर्थं त्रयो धर्मस्कन्धा इत्याद्यारभ्यते नैवं मन्तव्यं सामाद्यवयवभूतस्यैवोद्गीथादिलक्षणस्योंकारस्योपासनात्फ
लं प्राप्यत इति किं तर्हि यत्सर्वैरपि सामोपासनैः कर्मभिश्चाप्राप्यं तत्फलममृतत्वं केवलादोंकारोपासनात्प्राप्यत इति त
त्स्तुत्यर्थं सामप्रकरणे तदुपन्यासः त्रयस्त्रिसंख्याका धर्मस्य स्कन्धा धर्मस्कन्धा धर्मप्रविभागा इत्यर्थः के त इत्याह यज्ञो
ऽग्निहोत्रादिरध्ययनं सनियमस्य ऋगादेरभ्यासो दानं बहिर्वेदि यथाशक्ति द्रव्यसंविभागो भिक्षमाणेभ्य इत्येष प्रथमो ध
र्मस्कन्धो गृहस्थसमवेतत्वात्तन्निर्वर्तकेन गृहस्थेन निर्दिश्यते प्रथम एक इत्यर्थः द्वितीय[illegible]तीय श्रवणा[illegible]द्यार्यस्तप

२९

त्यं

इतिकृच्छ्रचांद्रायणादितप्यस्तापसः परिव्राड्वानब्रह्मसंस्थआश्रमधर्ममात्रसंस्थोब्रह्मसंस्थस्यत्वमृतत्वश्रवणा
द्वितीयोधर्मस्कंधोब्रह्मचार्याचार्यकुलेवस्तुंशीलमस्येत्याचार्यकुलवासीअत्यंतंयावज्जीवमात्मानंनियमैराचार्यकुले
वसादयन्क्षपयन्देहंतृतीयोधर्मस्कंधोत्यंतमित्यादिविशेषणान्नैष्ठिकइतिगम्यतेउपकुर्वाणकस्यस्वाध्यायग्रहणार्थ
त्वान्नपुण्यलोकत्वंब्रह्मचर्येणसर्वएतेत्रयोप्याश्रमिणायथोक्तैर्धर्मैः पुण्यलोकाभवंतिपुण्योलोकोयेषांतइमेपुण्य
लोकाआश्रमिणोभवंतिअवशिष्टस्त्वनुक्तः परिव्राड्ब्रह्मसंस्थोब्रह्मणिसम्यक्स्थितः सोमृतत्वंपुण्यलोकविलक्षणमम
रणमात्यंतिकमेवाप्नोतिनापेक्षिकंदेवाद्यमृतत्ववत्पुण्यलोकात्पृथगमृतत्वस्यविभागकरणाद्यदिचपुण्यलोकातिशय
मात्रममृतत्वमभविष्यत्ततः पुण्यलोकाद्विभक्तंनावक्ष्यद्विभक्तोपदेशाच्चात्यंतिकममृतत्वमितिगम्यते॥ अत्राश्र
मधर्मफलोपन्यासः प्रणवसेवास्तुत्यर्थः नतत्फलविध्यर्थंस्तूयतेचप्रणवसेवायास्तोश्रमधर्मफलविधयेवेतिहि
त्रिद्येतवाक्यंतस्मात्स्मृतिप्रसिद्धाश्रमफलानुवादेनप्रणवसेवाफलममृतत्वंब्रुवन्प्रणवसेवांस्तौतियथापूर्णवर्मणः
सेवाभक्तपरिधानमात्रफलाराजवर्मणस्तुसेवाराजतुल्यफलेतितद्वत्प्रणवस्यतत्सत्यंपरंब्रह्मतत्प्रतीकत्वादेतद्ध्येवा
क्षरंब्रह्मएतद्ध्येवाक्षरंपरमित्याद्याम्नायात्काठकेयुक्तंतत्सेवातोमृतत्वम्॥ अत्राहकेचिच्चतुर्णामाश्रमिणामविशेषेणस्व

छां०भा

कर्मानुष्ठानात्पुण्यलोकत्वे होक्ते ज्ञानवर्जितानां सर्व एते पुण्यलोका भवन्तीति नात्र परिव्राडवशेषितः परिव्राजकस्या
पि ज्ञानं नियमाश्च तप एवेति तप एव द्वितीय इत्यत्र तपःशब्देन परिव्राडप्युपसंगृहीतावतस्तेषामेव चतुर्णां यो ब्रह्मसंस्थः प्र
णवसेवकः सोऽमृतत्वमेतीति चतुर्णामधिकृतत्वाविशेषाद्ब्रह्मसंस्थत्वेऽप्रतिषेधात्स्वकर्मच्छिद्रे च ब्रह्मसंस्थतायाः साम
र्थ्योपपत्तेर्न च यमवराहादिशब्दवद्ब्रह्मसंस्थशब्दः परिव्राजके रूढो ब्रह्मणि स्थितिनिमित्तत्वमुपादाय प्रवृत्तत्वान्न हि रूढि
शब्दा निमित्तमुपाददते सर्वेषां च ब्रह्मणि स्थितिरुपपद्यते यत्र यत्र निमित्तमस्ति ब्रह्मणि स्थितिस्तस्य तस्य निमित्तवतो वा

२२

चकं सन्तं ब्रह्मसंस्थशब्दं परिव्राडेकविषये संकोचे कारणं नास्त्यनिरोधकमयुक्तम् न च पारिव्राज्याश्रमधर्ममात्रेणा
मृतत्वं ज्ञानानर्थक्यप्रसङ्गात्पारिव्राज्यधर्मयुक्तमेव ज्ञानममृतत्वसाधनमिति चेन्नाश्रमधर्मत्वाविशेषाद्धर्मो वा ज्ञानविशि
ष्टोऽमृतत्वसाधनमित्येतदपि सर्वाश्रमधर्माणामविशिष्टं न च वचनमस्ति परिव्राजकस्यैव ब्रह्मसंस्थस्य मोक्षो नान्येषामि
ति ज्ञानान्मोक्ष इति च सर्वोपनिषदां सिद्धान्तस्तस्माद्य एव ब्रह्मसंस्थः स्वाश्रमविहितकर्मवान्सोऽमृतत्वमेतीति न कर्म
निमित्तविद्याप्रत्यययोर्विरोधात्कर्त्रादिकारकक्रियाफलभेदप्रत्ययवत्त्वं हि निमित्तमुपादायेदं कुर्विदं मा कार्षीरिति
कर्मविधयः प्रवृत्तास्तच्च निमित्तं न शास्त्रकृतं सर्वप्राणिषु दर्शनात्सदेकमेवाद्वितीयमात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमिति

२२

शास्त्रजन्यप्रत्ययो विद्यारूपः स्वाभाविकं क्रियाकारकफलभेदप्रत्ययं कर्मविधिनिमित्तमनुपमृद्य न जायते भेदाभेदप्रत्य-
ययोर्विरोधात् न हि तैमिरिकद्विचन्द्रादिभेदप्रत्ययमनुपमृद्य तिमिरापगमे चन्द्राद्येकत्वप्रत्यय उपजायते विद्याविद्याप्रत्य-
ययोर्विरोधात् तत्रैवं सति भेदप्रत्ययमुपादाय कर्मविधयः प्रवृत्ताः ॥ स यस्योपमर्दितस्तदेकमेवाद्वितीयं तत्सत्यं विका-
रभेदोऽनृतमित्येतद्वाक्यप्रमाणजनितेनैकत्वप्रत्ययेन स भेदप्रत्ययस्सर्वकर्मभ्यो निवृत्तो निमित्तनिवृत्तेस्स चानिवृत्तक-
र्मा ब्रह्मसंस्थ इत्युच्यते स च परिव्राडेवान्यस्यासंभवात् अन्यो ह्यनिवृत्तभेदप्रत्ययस्सोऽन्यत्पश्यञ्छृण्वन्मन्वानो विजानन्निद-
ं कृत्वेदं प्राप्नुयामिति हि मन्यते तस्यैवं कुर्वतो न ब्रह्मसंस्थता वाचारम्भणमात्रविकारानृताभिसंधिप्रत्ययवत्त्वान्न चास-
त्यमित्युपमर्दिते भेदप्रत्यये सत्यमिदमनेन कर्तव्यं मयेति प्रमाणप्रमेयबुद्धिरुत्पद्यते आकाश इव तलबुद्धिर्विवेकि-
न उपमर्दितेऽपि भेदप्रत्यये कर्मभ्यो न निवृत्तश्चेत्प्रागिव भेदप्रत्ययोपमर्दनादेकत्वप्रत्ययविधायकं वाक्यमप्रमा-
णीकृतं स्यात् अभक्ष्यभक्षणादिप्रतिषेधवाक्यानां प्रामाण्यवदुक्तमेकत्ववाक्यस्यापि प्रामाण्यं सर्वोपनिषदां तत्पर-
त्वात् कर्मविधीनामप्रामाण्यप्रसंग इति चेन्नानुपमर्दितभेदप्रत्ययवत्पुरुषविषये प्रामाण्योपपत्तेः स्वप्नादिप्रत्यय इ-
व प्राक्प्रबोधात् विवेकिनामकरणात् कर्मविधिप्रामाण्योच्छेद इति चेन्न काम्यविध्यनुच्छेददर्शनात् न हि कामात्मता न प्रशस्तेत्ये-

छां०भा०

वं विज्ञानवद्भिः काम्यानि कर्माणि नानुष्ठीयन्ते इति काम्यकर्मविषयत्वं लिङ्ग्यन्तेऽनुष्ठीयन्त एव कामिभिरिति तथा ब्रह्मसंस्थैर्ब्र
ह्मविद्भिर्नानुष्ठीयन्ते कर्माणीति न तद्विषयत्वं लिङ्ग्यन्ते ब्रह्मविद्भिरनुष्ठीयन्त एवेति परिव्राजकानां भिक्षाचरणादिवाउत्पन्नै
कत्वप्रत्ययानामपि गृहस्थादीनामग्निहोत्रादिकर्मनिवृत्तिरिति चेन्न प्रामाण्यविज्ञानायां पुरुषप्रवृत्तेर्दृष्टत्वात् न हि ना
त्रियरेदिति प्रतिषिद्धमपि पिचरणं कश्चित्कुर्वन्दृष्ट इति शास्त्रोद्धृष्यरहितेनापि विवेकिना भिक्षाचरणं क्रियते न च कर्म वि
धिप्रवृत्तिनिमित्तप्रत्यये ग्निहोत्रादौ प्रवर्त्तकं निमित्तं नास्ति परिव्राजकस्येव भिक्षाचरणादौ बुभुक्षादि प्रवर्त्तकमिहाप्य
करणे प्रत्यवायभयं प्रवर्त्तकमिति चेन्न भेदप्रत्ययवतोऽधिकृतत्वात् भेदप्रत्ययवान् उपमर्दितभेदबुद्धिरविद्यायाः सर्वो हि क
र्मण्यधिकृत इत्यवोचाम यो ह्यधिकृतः कर्मणि तस्यैतदकरणे प्रत्यवायो न निवृत्तो ह्यधिकारस्य गृहस्थस्येव ब्रह्मचारिणो वि
शेषधर्माननुष्ठानं एवं तर्हि सर्वेषां स्वाश्रमस्थानामुत्पन्नैकत्वप्रत्ययः परिव्राडिति चेन्न स्वस्वामित्वभेदबुद्ध्यनुवृत्तेः कर्मार्थत्वा
च्चेतराश्रमाणामथ कर्म कुर्वीयेति श्रुतेस्तस्मात्स्वस्वामित्वाभावाद्भिक्षुरेव परिव्राट् न गृहस्थादिरेकत्वप्रत्यये न विधिनिमि
त्तेन भेदप्रत्ययस्योपमर्दितत्वाद्यमनियमाद्यनुपपत्तिः परिव्राजकस्येति चेन्न बुभुक्षादिनैकत्वप्रत्ययात्प्रच्यावितस्योप
पत्तेर्निवृत्त्यर्थत्वान्न प्रतिषिद्धसेवाप्राप्तिरेकत्वप्रत्ययोत्पत्तेः प्रागेव प्रतिषिद्धत्वान्न हि रात्रौ कूपे कण्टके वा पतित उदितेऽपि

२३

२३

सवितरि पतति तस्मिन्नेव तस्मात्सिद्धं निवृत्ताकर्मा जिज्ञासुक एव ब्रह्मसंस्थ इति यत्पुनरुक्तं सर्वेषां ज्ञानवर्जितानां पुण्यलोकते
ति सत्यमेतद्यथोक्तं तपःशब्देन परिव्राड्युक्त इत्येतदसत्कस्मात्परिव्राजकस्यैव ब्रह्मसंस्थतासंभवात्स एवेहावशेषित इ
त्यवोचाम एकत्वविज्ञानवतो ऽग्निहोत्रादिवद्भेदबुद्धि मत एव हि तपःकर्तृत्वं तास्यादेतेन कर्मच्छिद्रे ब्रह्मसंस्थतासामर्थ्यम
प्रतिषेधश्च प्रत्युक्तस्तथा ज्ञानवानेव निवृत्ताकर्मा परिव्राडिति ज्ञानवैयर्थ्यं प्रत्युक्तं यत्पुनरुक्तं वराहादिशब्दवत्परिव्राज
केन रूढो ब्रह्मसंस्थशब्द इति तत्परिहृतमेतस्यैव ब्रह्मसंस्थतासंभवान्नान्यस्येति यत्पुनरुक्तं यत्पुनरुक्तं। रूढिशब्दो नोपा
दद्यत इति तन्न गृहस्थ तक्षपरिव्राजकादिशब्दं दर्शनाद्गृहस्थितिप्रव्रज्यातक्षणादिनिमित्तोपादाना अपि गृहस्थपरिव्राजका
श्रमिविशेषविशिष्टजातिमति च वर्तन्त इति गृहस्थ इति परिव्राजक इति च रूढा दृश्यन्ते शब्दा न यत्र यत्र तानि निमित्तानि तत्र
प्रवर्त्तन्ते प्रसिद्ध्यभावात्तथेहापि ब्रह्मसंस्थशब्दो निवृत्तसर्वकर्मतत्साधनपरिव्राजकविषये त्याश्रमिणि परमहंसाख्ये
वृत्त इह न विलुमर्हति मुख्यामृतत्वफलश्रवणादतश्चेदमेवैकं वेदोक्तं पारिव्राज्यं न यज्ञोपवीतत्रिदण्डकमण्डल्वादिपरि
ग्रहवान्मुण्डो ऽममो ऽपरिग्रह इति च श्रुतिरत्याश्रमिभ्यः परमं पवित्रमित्यादि च श्वेताश्वतराणां निस्तुतिर्निर्नमस्कार इत्यादिस्मृति
भ्यश्च तस्मात्कर्म न कुर्वीन्नियतयश्च पारदर्शिनस्तस्मादलिंगो धर्मज्ञो ऽव्यक्तलिंग इत्यादिस्मृतिभ्यश्च यत्तु सांख्ये कर्मत्यागो नं

निमित्तं

छां०ना०

पगम्यते क्रियाकारकफलत्वे द्वबुद्धेः सत्यत्वाभ्युपगमात्तन्मृषायत्वबौद्धैः शून्यं च। ताभ्युपगमादकर्तृत्वमभ्युपगम्यते तदप्य
सदभ्युपगन्तुः स्वात्माभ्युपगमाद्यज्ञेषु त्वं ज्ञैरलसतया ऽकर्तृत्वाभ्युपगमः सोऽप्यसत्कारकबुद्धेरनिवर्तितत्वात्प्रमाणेन तस्माद्वे
दान्तप्रमाणजनितैकत्वप्रत्ययवत एव कर्मनिवृत्तिलक्षणं पारिव्राज्यं ब्रह्मसंस्थत्वं चेति सिद्धम् एतेन गृहस्थस्यैकत्वविज्ञाने
सति पारिव्राज्यमर्थसिद्धं न चग्न्युत्सादनदोषः ताकस्मात्परिव्रजतः वीरहा वा एष देवानां योऽग्निमुद्वासयत इति श्रुतेर्न वेदनेनै
वोत्सादितत्वादुत्सन्न एव हि स एकत्वदर्शने जायते ऽपागादग्नेरग्नित्वमिति श्रुतेरतो न दोषः गृहस्थः परिव्रजन्निति। यत्संस्थो

२४

ऽमृतत्वमेति तन्निरूपणार्थमाह। प्रजापतिर्विराट् कश्यपो वा लोकानुद्दिश्य तेषु सारजिघृक्षया दंभ्यतपदभितापं कृतवान्ध्यानं
तपः कृतवानित्यर्थः। तेभ्यो ऽभितप्तेभ्यः सारभूता त्रयी विद्या संप्रास्रवत्प्रजापतेर्मनसि प्रत्यभादित्यर्थः। तामभ्यतपत्पूर्ववत्तस्या
अभितप्ताया एतान्यक्षराणि संप्रास्रवन्त व्याहृतयस्तान्यक्षराण्यभ्यतपत्तेभ्यो ऽभितप्तेभ्य ओंकारः संप्रास्रवत्तद्ब्रह्म किं कीदृशं
रूपमित्याह तद्यथा शंकुना पर्णनालेन सर्वाणि पर्णानि पत्रावयवजातानि संतृण्णानि विद्धानि व्याप्तानीत्यर्थः। एवमोंकारे
ण ब्रह्मणः परमात्मनः प्रतीकभूतेन सर्वा वाक् शब्दजातं संतृण्णोंकारो वै सर्वा वागिति श्रुतेः परमात्मविकारश्च नामधेयमा
त्रमित्यत ओंकार एवेदं सर्वमिति द्विरभ्यास आदरार्थो लोकादिविनिस्पंदकथनमोंकारस्तुत्यर्थमिति। सामोपासनप्र

२४

संयोगेन कर्मगुणभूतत्वान्निवर्त्त्योंकारं परमात्मप्रतीकत्वायामृतत्वहेतुकत्वेन महीकृत्य प्रकृतस्यैव यज्ञस्यांगभूतानि सा
महोममंत्रोत्थानान्युपदिदिक्षन्नाह ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातःसवनं प्रसिद्धं तद्वसूनां तैः प्रातःसवनसंबद्धोयं लोको
वशीकृतः तस्सवनेशानैस्तथा रुद्रैर्माध्यंदिनसवनेशानैरंतरिक्षलोक आदित्यैश्च विश्वैर्देवैश्च तृतीयसवनेशानैस्तृतीय
लोको वशीकृत इति यजमानस्य लोको न्यः परिशिष्टो न विद्यते तत्कतर्हि यजमानस्य लोको यदर्थं यजते न कश्चिल्लोकोस्ती
त्यभिप्रायः॥ लोकाय वै यजते यो यजत इति श्रुतेः॥ लोकाभावे कथं यजमानस्य लोकस्वीकरणोपायं सामहोममंत्रोत्थान
लक्षणं न विद्यान्न विजानीयात्सोज्ञः कथं कुर्याद्यज्ञं न कथंचन तस्य कर्तृत्वमुपपद्यत इत्यर्थः॥ सामादिविज्ञानस्तुतिपरत्वा
न्नाविदुषः कर्तृत्वं कर्ममात्रविदः प्रतिषिध्यते स्तुतये च सामादिविज्ञानस्याविद्वत्कर्तृत्वप्रतिषेधाय चेति हि निघ्येतवाक्यम
ह्येवैष स्यकाण्डे विदुषोपि कर्मास्तीति हेतुमवोचाम॥ अथेतद्वक्ष्यमाणं सामाद्युपायं विद्वान् कुर्यात्किं तद्वेद्येमित्याह॥ पुरा
प्रातरनुवाकस्योपाकरणात् जघनेन गार्हपत्यस्य पश्चादुदङ्मुखः सन्नुपविश्य स वासवं वसुदेवत्यं सामाभिगा
यति लोकद्वारमस्य पृथिवीलोकस्य प्राप्तये द्वारमपावृणु हे अग्ने तेन द्वारेण पश्येम त्वा राज्याय येत्यथानन्तरं जुहोत्यनेन मन्त्रे
ण नमोग्नये प्रक्षीभूतास्तुत्यं वयं हे पृथिवीक्षिते पृथिवीनिवासाय पृथिवीलोकनिवासायैत्ते यं लोकं मे मह्यं यजमानाय

मा॰ क॰ दि॰ ते॰

छांना॰

विंदलजस्वैष वैमम यजमानस्य लोक मेता गन्तास्म्यत्रास्मिं लोके यजमानोह मायुषः परस्तादूर्ध्वं मृतस्सन्निन्त्यर्थः स्वाहेति
जुहोत्यपजहि परिघं लोकद्वारार्गलमित्येतं मंत्रमुक्त्वोत्तिष्ठति एवमेतैर्वसुभ्यः प्रातःसवनसंबद्धो लोको निष्क्रीतः स्या
त्ततस्ते प्रातस्सवनं वसवो यजमानाय संप्रयच्छंति तथाग्नीध्रियस्य दक्षिणाभिमुखे[illegible]नेनो दङ्मुख उपविश्य स रौद्रं सामाभिगा
यति यजमानो रुद्रदैवत्यं वैराज्यायांतरिक्षक्षितं इत्यादिसमानं तथाहवनीयस्योदङ्मुख उपविश्य स आदित्यदैवत्यमादि
त्यं वैश्वदेवं च सामाभिगायति क्रमेण स्वाराज्याय साम्राज्यायादि विद्धिक्षि इत्येवमादिसमानमन्यद्धिदत्तापहतेति बहुवच
नमात्रविशेषो यजमानं त्वेतदेतामन्यत्र यजमान इत्यादिलिंगादेष ह वै यजमान एवंविद्यथोक्तस्य सामादेर्विद्वान्यज्ञस्य मा
त्रां यज्ञयाथात्म्यं वेद यथोक्तं य एवं वेद य एवं वेदेति ॥ द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥ ॥ इति श्रीगोविंदभगवत्पूज्यपाद
शिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ छांदोग्ये चतुर्थः प्रपाठकः ॥ ॥ असौ वा आदित्य इत्याद्या
ध्यायारंभसंबंधो तीतानंतराध्यायान्ते उक्तो यज्ञस्य मात्रां वेदेति यज्ञविषयाणि च सामहोममंत्रोत्थानानि विशिष्टफल
प्राप्तये यज्ञांगभूतानि उपदिष्टानि सर्वयज्ञानां च कार्यनिर्वृतिरूपस्स सविता महत्या श्रियादीप्यते स एष सर्वप्राणिकर्मफ
लभूतः प्रत्यक्षं सर्वैरुपजीव्यते ततो यज्ञव्यपदेशानंतरं तत्कार्यभूतसवितृविषयमुपासनं सर्वपुरुषार्थेभ्यः श्रेष्ठतमफ

२५

२५

२२

लविधास्यामीत्येवमारभ्यते श्रुतिरसौ वा आदित्यो देवमध्वित्यादि देवतानां मोदनान्मध्विव मध्वसावादित्यो वस्वादीनां च मोदन
हेतुत्वं वक्ष्यति सर्वयज्ञफलरूपत्वादादित्यस्य कथं मधुत्वमित्याह तस्य मधुनो द्यौरेव ॰ मंस्येव मधु नास्ति रश्चीना श्चासौ वं
शश्चेति तीरश्चीनवंशस्तिर्यग्गतेव हि द्यौर्लक्ष्यते तस्मिन्हि वंशे मधुपूपो ह्यवंशे लग्नस्सल्लंबत इवातो मधुनः अपूपसामान्यादन्तरिक्षं
मध्वपूपो मधुनः सवितुराश्रयत्वाद्भ्रमरीचयो रश्मयो रश्मिस्था आपो भौमास्सवित्राकृष्टास्ताएता वा आपः वराजयन्मरीच
य इति हि विज्ञायते ता अन्तरिक्षमध्वपूपस्था रश्म्यन्तर्गता बाङ्कुमरबीजभूताः पुत्रा इव हिता लक्ष्यन्त इति पुत्रा इव पुत्रा मध्व
पूपनाड्यन्तर्गता हि भ्रमरपुत्रास्तस्य सवितुर्मध्वाश्रयस्य मधुनो ये प्राञ्चः प्राच्यां दिशि गता रश्मयस्ता एवास्य प्राच्यः प्राग्
वनान्मधुनो नाड्यो मधुनाड्य इव मध्वाधारच्छिद्राणीत्यर्थः तत्र ऋच एव मधुकृतो लोहितरूपं सवित्राश्रयं मधु कुर्वन्तीति म
धुकृतो भ्रमरा इव यतो रसानादाय मधु कुर्वन्ति तत्पुष्पमिव पुष्पमृग्वेद एव तत्र ऋ २ ब्राह्मणे वेदसमुदायस्यर्ग्वेदाख्यत्वाच्छ
ब्दमात्रार्थयोग्यरूपपरसनिस्रवासम्भवादृग्वेदशब्देनात्र ऋग्वेदविहितं कर्मातो हि कर्मफलभूतमधुरसनिस्रावसम्भवादृग्न्न
ग्वेदशब्दे मधुकारेरिव पुष्पस्थानीयादृग्वेदविहितात्कर्मण आप आदाय ऋषिमधु निर्वर्त्यन्ते कास्ता आप इत्याह ताः कर्मणि
प्रयुक्ताः सोमाज्यपयोरूपा अग्नौ प्रक्षिप्ताः तत्पाकनिर्वृत्ता अमृता अमृतार्थत्वाद्रत्यन्तरसवत्य आपो भवन्ति तद्रसो नादाय ता

२

छां॰भा॰

२२

एवतास्य वः॥ पुष्पेभ्यो रसमाददाना इव भ्रमरा ऋच एत ऋग्वेदविहितं कर्म पुष्पस्थानीयमभ्यतपन्नभितापं कृतवत्य इवैता ऋ
च कर्मणि प्रयुक्ता ऋग्भिर्हि मन्त्रैः॥ शस्त्राद्यंगभावमुपगतैः॥ क्रियमाणं कर्म मधुनिर्वर्तकं संमुचत्त्रीत्युपपद्यते पुष्पाणीव भ्रमरै
राकृष्यमाणानि तदेतदाह तस्य ऋग्वेदस्याभितप्तस्य कोसौ रसो य ऋग्भिर्मधुकराभितापनिःसृत इत्यपेच्यते यशो विश्रुतत्वं तेजो दे
हगता दीप्तिरिन्द्रियं सामर्थ्योपितै रिन्द्रियै रवैकल्यं वीर्यं सामर्थ्यं बलमित्यर्थः॥ अन्नाद्यमन्नं च तदाद्यं च येनोपयुज्यमानेनाह
न्यहनि देवानां स्थितिस्स्यात्तत्तदाद्यमेष रसोजायत तया गादिलक्षणात्कर्मणो यश आद्यन्नाद्यपर्यन्तं यदेतद्रसविशेषेणादौ र

२६

दगाम ऽस्रवत्तदादित्यमभितः पार्श्वतः पूर्वभागं सवितुरश्रयदाश्रितवदित्यर्थः॥ अमुष्मिन्नादित्ये संचितं कर्मफलाख्यं
मधु भोक्ष्यामहे इत्येवं हि यश आदित्ये लक्षणफलप्राप्तये कर्माणि क्रियन्ते मनुष्यैः मधुपुष्पैः केदारनिष्पादनमिव कर्षकैस्त
त्प्रत्यक्षं प्रदर्श्यते श्रद्धाहेतोः स्तद्वा एतत्किं तदादित्यस्योत्पद्यते दृश्यते रोहितं रूपम्॥ अथ येस्य दक्षिणा रश्मय इत्यादि समा
नं यजूंष्येव मधुकृतो यजुर्वेदविहिते कर्मणि प्रयुक्तानि पूर्ववन्मधुकृत इव यजुर्वेदविहितं कर्म पुष्पस्थानीयं पुष्पमित्युच्यते
ता एव सोमाद्या अमृता आपस्तानि वा एतानि यजूंष्येतं यजुर्वेदमभ्यतपन्नित्येवमादि सर्वं समानं मध्वेतदादित्यस्य शुक्लं रूपं।
शुक्लं
अथ येस्य प्रत्यञ्चो रश्मय इत्यादि समानम्। तथा साम मध्वेतदादित्यस्य कृष्णं रूपं। अथ येस्योदञ्चो रश्मय इत्यादि समानमथ

२६

वांगिरसोथर्वणांगिरसा च दृष्टा मंत्रा अथर्वांगिरसः संश्च कर्मणि प्रयुक्ता मधुकृत इतिहासपुराणं पुष्पं तयोश्चेतिहासपुराणयोरश्व
मेधे पारिप्लवासु रात्रिषु कर्मांगत्वेन विनियोगः सिद्धो मध्वितितदादित्यस्यपरं कृष्णं रूपमतिशयेन कृष्णमित्यर्थः अथ ये स्यो
ह्वा इत्यादि पूर्ववत् गुह्या गोप्या रहस्या एवादेशा लोकद्वारीयादि विधय उपासनानि च कर्मांगविषयाणि मधुकृतो ब्रह्मैव शब्दा
धिकारात्प्रणवाख्यं पुष्पं समानमन्यत् मध्यं क्षोभत इव तदादित्यस्य मध्ये क्षोभत इव समाहितदृष्टेर्दृश्यते संचलतीव ते वा एते यथोक्ता
रोहितादिरूपविशेषा रसानां रसाः केषां रसानामित्याह वेदा हि यस्माल्लोकनिष्यंदत्वात्सारा इति रसास्तेषां रसानां कर्मभाव
मापन्नानां रसा नाम एते रोहितादिविशेषा रसा अत्यन्तरसा इत्यर्थः तथामृतानाममृतानि वेदा ह्यमृता नित्यत्वात्तेषामे
तानि रोहितादीनि रूपाण्यमृतानि रसानां रसा इत्यादि कर्मस्तुतिरेषा यस्यैवं विशिष्टान्यमृतानि फलमिति तत्तत्र यत्प्रथ
ममृतं रोहितरूपलक्षणं तद्वसवः प्रातःसवनेशाना उपजीवन्त्यग्निना मुखेनाग्निना प्रधानभूतेनाग्निप्रधानाः सन्त उप
जीवन्तीत्यर्थः अन्नाद्यं रसोजायत इति वचनात् केवलं [illegible] समश्नन्तीति प्राप्तं तत्प्रतिषिध्यते न देवा अश्नन्ति न पिबन्तीति कथं
तर्ह्युपजीवन्तीत्युच्यते एतदेव हि यथोक्तममृतं रोहितरूपं दृष्ट्वोपलभ्य सर्वकरणैरनुभूय तृप्यन्ति दृशेः सर्वकरणद्वारोपल
ब्ध्यर्थत्वात् ननु रोहितं रूपं दृष्ट्वेत्युक्तं कथमन्येन्द्रियविषयत्वं रूपस्येति न यशआदीनां श्रोत्रादिगम्यत्वात् श्रोत्रग्राह्यं यशस्तेजो रूप

40
४१

छां॰ भा॰ चाक्षुषमिंद्रियं विषयग्रहणकार्यानुमेयं करणं सामर्थ्यं वीर्यं बलं देहगतउत्साहः प्राणवत्ता अन्नाद्यं प्रत्यहमुपजीव्यमानं शा
रीरस्थितिकरं यद्भवति रसोन्नाद्यं एवमात्मकः सर्वो यं दृष्ट्वा तृप्यन्ति देवा दृष्ट्वा तृप्यन्ति एतत्सर्वं स्वकरणैरनुभूय तृप्यन्तीत्यर्थः॥ आ
दित्यसंश्रयाः सन्तो वैगंध्यादिदेहकरणदोषरहिताश्च किं ते निरुद्यमा अमृतमुपजीवन्ति न कथं तर्हि एतदेव रूपमभिलक्ष्याभु
नाभोगावसरो नास्माकमिति बुद्ध्वाभिसंविशन्ति उदासते यदा वै तस्यामृतस्य भोगावसरो भवेत्तदा एतस्मादमृताद्रूपात्तद्भोगनिमि
त्तमित्यर्थः एतस्मादुद्यन्ति उत्साहवन्तो भवन्तीत्यर्थः न ह्यनुत्साहवतामननुतिष्ठतामलसानां भोगप्राप्तिर्लोके दृष्टा स यश्च
श्चिदेतदेवं यथोक्तमेवममृतं मधुकरतापरससंक्षरणमृग्वेदविहितकर्मपुष्पात्तस्य चादित्यसंश्रयणं रोहितरूपत्वं चामृत
स्य प्राच्यां दिशि तत्रस्थरश्मिनाडीसंस्थितिं वसुदेवभोग्यतां तद्विदश्च वसुभिस्सहैकतां गत्वाग्निना मुखेनोपजीवनं दर्शनमात्रेण
ततस्तृप्तिं स्वस्य भोगावसरे उद्यमनं तत्कालापाये च संवेशनं वेद सोऽपि वसुवत्सर्वं तथैवानुभवति॥ कियन्तं कालं विद्वांस्तदमृ
तमुपजीवतीत्युच्यते स विद्वान्यावदादित्यः पुरस्तात्प्राच्यां दिश्युदेता पश्चात्प्रतीच्यामस्तमेता तावद्वसूनां भोगकालस्ताव
न्तमेव कालं वसूनामाधिपत्यं स्वाराज्यं पर्येता परितो गन्ता भवतीत्यर्थः न तथा यथा चन्द्रमण्डलस्थः केवलकर्मी परतन्त्रो देवाना
मन्नभूतः किं तर्हि अयमाधिपत्यं स्वाराज्यं चाधिगच्छति॥ अथ यद्द्वितीयममृतं तद्रुद्रा उपजीवन्तीत्यादि समानम्॥ स यावदादित्यः

२७ २७

सूर्यादि पौराणिकैरुक्तं मानसोत्तरस्य मूर्द्धनि मेरोः प्रदक्षिणावृत्तेस्तत्कल्प ॥

पुरस्तादुदेता पश्चादस्तमेता द्विस्त्वावृत्ततो द्विगुणं कालं दक्षिणात उदेतोत्तरतोऽस्तमेता रुद्राणां तावद्भोगकालस्तथा पश्चादुत्तरत
ऊर्ध्वमुदेता विपर्ययेणास्तमेता पूर्वस्मात्पूर्वस्मात्तु द्विगुणोत्तरोत्तरेण कालेनेत्यपौराणां कालदर्शनं स विद्वस्थत्तदुद्दिश्य मिद्दिय
मवरुणसोमपुरीश्च दयास्तमयकालस्य तुल्यत्वादित्यत्रोक्तः परिहार आचार्यैरमरावत्यादीनां पुरीणां द्विगुणोत्तरोत्तरेण का
लेनो ह्रासस्स्यादुदयपथश्च नामसवितुस्तन्निवासिप्राणिनां चक्षुर्गोचरापत्तिस्तदुदयः पश्चास्तमनेन परमार्थतः उदयास्तमने स्तस्त
न्निवासिनां च प्राणिनामभावे तात्पर्यति तेनैव मार्गेणागच्छन्नपि नैवोदेता नास्तमेते ति चक्षुर्गोचरापत्तेस्तदत्ययस्याभावात्तथा
मरावत्या द्विगुणं कालं सांयमनीपुरीं वसत्यतस्तन्निवासिनः प्राणिनः प्रति दक्षिणत उदेति उत्तरतोऽस्तमेतीत्युच्यतेऽस्मद्बु
द्धिं चापेक्ष्य तथोत्तराश्चापि पुरीषु योजना। सर्वेषां च मेरुरुत्तरतो भवति। यदामरावत्यां मध्याह्नगतश्च सविता तदा सांयमिन्यामुद्य
दृश्यते तत्र मध्याह्नगोचरो वारुण्यामुद्य दृश्यते तथोत्तरस्याः प्रदक्षिणावृत्तेस्तुल्यत्वादिलावृत्तनिवासिनां सर्वतः पर्वतप्राकारनि
वारितादित्यरश्मीनां सविता ऊर्ध्व उदेता वर्गास्तमेता दृश्यते पर्वतोर्ध्वछिद्रप्रवेशात्स वितृप्रकाशस्य तथ्यगर्गाद्यमृतोपजीविना
ममृतानां च बुद्धिगुणोत्तरवीर्यबलमनुमीयते भोगकालद्वैगुण्यलिंगेनाद्य मनस्सवेशनादि देवानां रुद्रादीनां चक्षुविद्रुपञ्चस
मानं कृत्वैवमुदयास्तमनेन प्राणिनां स्वकर्मफलभोगनिमित्तमनुग्रहं तत्कर्मफलभोगत्रयतानि प्राणजातान्यालभ्यनि संहत्यापि

२८

ततस्तस्मादनंतरप्राणानुग्रहकालादूर्ध्वस्स्वात्मन्युदेत्युद्गम्य यान्युदेतितेषां प्राणिनामनात्मत्वात्मैवोदेता नास्तमेतैक
लो द्वितीयोनवयवो मध्ये स्वात्मन्यवस्थाता तत्र कश्चिद्विद्वान्समाचरणो रोहिताद्यमृतभोगभागी यथोक्तक्रमेण स्वमात्मानं सवि
तारमात्मत्वेनोपेत्य समाहितस्सन्नेतं मंत्रं दृष्ट्वोत्थितोन्यस्मै पृष्टवते जगाद यतस्त्वमागतो ब्रह्मलोकात्किं तत्राप्यहोरात्राभ्यां परिवर्त्त
मानस्सविता प्राणिनामायुः क्षपयति यथेहास्माकमित्येवं पृष्टः प्रत्याह तन्न तत्र यथा पृष्टे यथोक्ते चार्थे एष श्लोको भवति तेनोक्तो
योगिनेति श्रुतेर्वचनमिदं न वै तत्र यतोहं ब्रह्मलोकादागतस्तस्मिन्न वै तदस्ति यत्पृच्छसि न हि तत्र निम्लोचन नास्तमगमत्सवि
ता न चोदयायोद्गतः कुतश्चित्कदाचन कस्मिंश्चिदपि काले दे॥ मित्युक्तः शपथमिमं प्रतिपेदे दे हे देवाः साक्षिणो यूयं शृणुत य
था मयोक्तं सत्यं वचस्तेन सत्येनाहं ब्रह्मणा ब्रह्मस्वरूपेण × उदयास्तमयवर्जितो ब्रह्मलोक इत्युपपन्नं × मा विराधिषि मा न
मा विरुध्येयमप्राप्तिर्ब्रह्मणो मम मा भूदित्यर्थः। सत्यं तेनोक्तमित्याह श्रुतिर्न ह वा अस्मै यथोक्तब्रह्मविदे नोदेति न निम्लोच
ति नास्तमेति किंतु ब्रह्मविदेऽस्मै सकृद्दिवा सदैवाहर्भवति स्वयंज्योतिष्ट्वाद्य एतां यथोक्तां ब्रह्मोपनिषदं वेदगुह्यं वेद एवं तंत्रे
णवंशादित्रयं प्रत्यग्रतं संबंधं चयुञ्जान्यवोचामेवं जानातीत्यर्थः। विद्यानुदयास्तमयकालापरिच्छेद्यं नित्यब्रह्म भवतीत्यर्थः।
तद्धैतन्मधुज्ञानं ब्रह्मा हिरण्यगर्भो विराजे प्रजापतय उवाच स मनवे मनुरिक्ष्वाक्वाद्याभ्यः प्रजाभ्य इति विद्यां स्तौति। ब्रह्मा

२८

दिविशिष्टक्रमागतेति। किं च तद्वै तन्मधुविज्ञानमुद्दालकायारुणये पिता ब्रह्मविज्ञानं ज्येष्ठाय पुत्राय प्रोवाचेदं वाव तज्ज्येष्ठे
क्रमन्योऽपि ज्येष्ठाय पुत्राय सर्वप्रियायार्हाय ब्रह्म प्रब्रूयात्तृणाय्याय वाऽयोग्यायांतेवासिने शिष्याय नान्यस्मै कस्मैचन ब्रूया
त्तीर्थद्वयमनुज्ञातमनेकेषां प्राप्तानां तीर्थानामाचार्यादीनां कस्मात्पुनस्तीर्थसंकोचनं विद्यायाः कृतमित्याह। यद्यप्यस्मा
आचार्याय इमां कश्चित्पृथिवीमद्भिः परिगृहीतां समुद्रपरिवेष्टितां समस्तामपि दद्यादस्या विद्याया निष्क्रयार्थमाचार्याय
धनस्य संपूर्णां संपन्नां भोगोपकरणैर्नासावस्य निष्क्रयाय यस्मात्ततोऽपि ज्ञानादेतदेव यन्मधुविद्यादानं भूयो बहु
तरफलमित्यर्थः। द्विरभ्यास आदरार्थः। यत एवमतिशायफलैषा ब्रह्मविद्या तस्मात्प्रकारान्तरेणापि वक्तव्येति गायत्री
वा इत्याद्यारभ्यते गायत्रीद्वारेण चोच्यते ब्रह्म सर्वविशेषरहितस्य नेति नेतीत्यादिविशेषप्रतिषेधगम्यस्य दुर्बोधत्वात्सत्स्व
प्यनेकेषु छन्दःसु गायत्र्या एव च ब्रह्मज्ञानद्वारत्वेनोपादानं प्राधान्यात्सोमाहरणादितरच्छन्दो[illegible]हरणेन तरच्छन्दोव्या
प्त्या च सर्वसवनव्यापकत्वाच्च यज्ञे प्राधान्यं गायत्र्याः गायत्रीसारत्वाद्यथोक्तं ब्राह्मणस्य मातरमिव हित्वा गुरुतरां गायत्रीं त
तोऽन्यद्गुरुतरं न प्रतिपद्यते यथोक्तं ब्रह्मापीति तस्यामत्यन्तगौरवस्य प्रसिद्धत्वादतो गायत्रीमुखेनैव ब्रह्मोच्यते गायत्री वा इ
त्यवधारणार्थो वैशब्दः। इदं सर्वं भूतं प्राणिजातं यत्किंचित्स्थावरं जंगमं वा तत्सर्वं गायत्र्येव तस्माच्छन्दोमात्रायाः सर्वं भूतं त्व

३

छां० भा०

न३

मनुपपन्नमिति गायत्री कारणं वा वं शब्दरूपामापादयति गायत्री वाग्वै गायत्रीति वाग्वा इदं सर्वं भूतं यस्माद्वाक्छब्दरूपास
ती सर्वं भूतं गायति शब्दयति वासौ गौरसावश्व इति च त्रायते च रक्षति अमुष्मान्मा भैषीः किं ते भयमुत्थितमित्यादिना सततो
भयान्निवर्त्यमानो वाचा त्रातः स्याद्यद्वाग्भूतं गायति च त्रायते च गायत्र्येव तद्गायति त्रायते च वाचोंयत्वाद्गायत्र्या गाना
त्राणाच्च गायत्र्या गायत्रीत्वं या वै सा बलक्षणा सर्वभूतरूपा गायत्री इयं वाव सा येयं पृथिवी कथं पुनरियं पृथिवी गायत्रीत्यु
च्यते सर्वभूतसंबंधात् कथं सर्वभूतसंबंधोस्याः पृथिव्यां हि यस्मात्सर्वं स्थावरजंगमं च भूतं प्रतिष्ठितमेतामेव पृथिवीं ना

२९ गायत्र्या ६ २९

तिशीयते नातिवर्त्तते इत्येतद्यथा गानत्राणाभ्यां भूतसंबंधो गायत्र्या एवं भूतप्रतिष्ठानाद्भूतसंबंधात्पृथिव्यतो गायत्री पृ
थिवी या वै सा पृथिवी गायत्रीयं वाव सा तत्किं यदिदमस्मिन्पुरुषे कार्यकरणसंघाते जीवति शरीरं पार्थिवत्वाच्छरीरस्य कथं
शरीरस्य गायत्रीत्वमित्युच्यते अस्मिन् हीमे प्राणा भूतशब्दवाच्याः प्रतिष्ठिता अतः पृथिवीवद्भूतशब्दवाच्यप्राणप्रतिष्ठाना
च्छरीरं गायत्र्येतदेव यस्माच्छरीरं नातिशीयन्ते प्राणा यद्वै तत्पुरुषे शरीरं गायत्री कथमित्याह अस्मिन् हीमे प्राणाः प्रतिष्ठिता अ
तः शरीरवद्गायत्री हृदयमेतदेव च नातिशीयन्ते प्राणो हि पिता प्राणो माता न हिंसन्सर्वा भूतानीति श्रुतेर्भूतशब्दवाच्याः
प्राणाः सैषा चतुष्पदा षडक्षरपादा छन्दोरूपा सती भवति गायत्री षड्विधा वाग्भूतपृथिवीशरीरहृदयप्राणरूपा सती
द वा वत घरिदं मस्मिन्नंतर्मध्ये पुरुषे हृदये पुंडरीकाख्यमेतद्गायत्री ३

व

षड्विधा भवति वाक्प्राणयोरन्नार्थे निर्दिष्टयोरपि गायत्रीप्रकारत्वमन्यथा षड्विधसंख्यापूरणानुपपत्तेस्तदेतस्मिन्नर्थ
एतस्यां गायत्र्याख्यं ब्रह्म गायत्र्यनुगतं गायत्रीमुखेनोक्तमृचापि मंत्रेणाभ्युक्तं प्रकाशितं तावानस्य गायत्र्याख्यस्य ब्रह्म
णः समस्तस्य महिमा विभूतिविस्तारो यावांश्चतुष्पात्षड्विधश्च ब्रह्मणो विकारलक्षणः पादो गायत्रीति व्याख्यातोऽतस्त
स्माद्विकारलक्षणाद्गायत्र्याख्याद्वाचारम्भणमात्रात्ततो ज्यायान्महत्तरश्च परमार्थसत्यभूतो विकारास्पृष्टरूपः पुरुषः पुरुष
सर्वपूरणात्पुरिशयनाच्च तस्यास्य पादः सर्वाणि भूतानि तेजोबन्नादीनि सस्थावराणि जंगमानि त्रिपात्त्रयः पादा अस्य
सोऽयं त्रिपादमृतं पुरुषाख्यं समस्तस्य गायत्र्यात्मनो दिवि द्योतनवति स्वात्मन्यवस्थितमित्यर्थः इति यद्वै तत्त्रिपादमृतं
गायत्रीमुखेनोक्तं ब्रह्मेतीदं वाव तदिदमेव तद्योऽयं प्रसिद्धो बहिर्द्धा बहिः पुरुषादाकाशो भौतिको यो वै स बहिर्द्धा
पुरुषादाकाश उक्तोऽयं वाव स योऽयमन्तः पुरुषे शरीर आकाशो यो वै सोऽन्तः पुरुष आकाशोऽयं वाव स योऽयमन्तर्हृद
ये हृदयपुण्डरीक आकाशः कथमेकस्य सत आकाशस्य त्रिधा भेद इत्युच्यते बाह्येन्द्रियविषये जागरितस्थाने नभ
सि दुःखबाहुल्यं दृश्यते ततोऽन्तः शरीरे स्वप्नस्थाने भूते मन्दतरं दुःखं भवति स्वप्नान्पश्यतो हृदयस्थे पुनर्नभसि न कं
चन कामं कामयते न कंचन स्वप्नं पश्यति अतः सर्वदुःखनिवृत्तिरूपमाकाशं सुषुप्तस्थानमतो युक्तमेकस्यापि त्रिधा

ना० न्ते दाह्याख्यातं बहिर्द्धापुरुषादाकाशस्य हृदये संकोचकरणं चेतःसमाधान॰॰र्थं न स्तुतये । यथा त्रयाणामपि लोका
नां कुरुक्षेत्रं विशिष्यते । अर्द्धं तत्खलु कुरुक्षेत्रमर्द्धं तत्खलु पृथूदकमिति तद्वद्दहराकाशस्थं ब्रह्म पूर्णं सर्वगतं तत्र हृदयमा
त्रपरिच्छिन्नमिति मन्तव्यं यद्यपि हृदयाकाशे चेतस्समाधीयते । अप्रवर्त्तिनं कुतश्चित्क्वचित्प्रवर्त्तितुं शीलमस्येत्यप्रवर्त्तित
दनुच्छित्तिधर्मकं यथान्यानि भूतानि परिच्छिन्नान्युच्छित्तिधर्मकाणि न तथा हार्द्दं नभः । पूर्णमप्रवर्त्तिनीमनुच्छेदात्मिकां श्रि
यं विभूतिगुणफलं लभते य एवं यथोक्तं पूर्णाप्रवर्त्तिगुणं ब्रह्म वेद जानाति इहैव जीवंस्तद्भावं प्रतिपद्यत इत्यर्थः । तस्य ह ३०
वा एतस्येत्यादिना गायत्र्याख्यस्य ब्रह्मण उपासनांगत्वेन द्वारपालादिगुणविधानार्थमारभ्यते यथा लोके द्वारपाला
राज्ञ उपासनेन वशीकृता राज्ञः प्राप्त्यर्था भवन्तीति तथेहापीति तस्येति प्रकृतस्य हृदयस्येत्यर्थः । एतस्यान्तरनिर्द्दिष्टस्य
पंच पंच संख्याका देवानां सुषयो देवसुषयः स्वर्गलोकप्राप्तिद्वारच्छिद्राणि देवैः प्राणादित्यादिभी रक्ष्यमाणानी
त्यतो देवसुषयस्तस्य स्वर्गलोकभवनस्य हृदयस्यास्य यः प्राङ् सुषिः पूर्वाभिमुखं स्येरवप्रागतं यच्छिद्रं द्वारं स प्राणस्त
स्थस्तेन द्वारेण यः संचरति वायुविशेषः स प्राणः प्रागादीनीति प्राणस्तेनैव संबद्धमव्यतिरिक्तं तच्चक्षुस्तथैव स आदित्यश्च
आदित्यो ह वै बाह्यः प्राण इति श्रुतेश्चक्षुरूपप्रतिष्ठाक्रमेण हृदि स्थितः स आदित्यश्चास्मिन्प्रतिष्ठितश्चक्षुषी । तदि

वाजसनेयके वायुप्राणः देवैतेवह्येका चक्षुरादित्यश्चसहाश्रयेण वक्ष्यति चप्राणायस्वाहेतिजुह्वतं हविस्सर्वमेतत्तर्पयतीतित
देतत्प्राणाख्यं सुवर्लोकद्वारपत्वाद्ब्रह्मस्वर्गलोकं प्रतिपित्सुस्तेजस्वि॰ तच्चक्षुरादित्यस्वरूपेणान्नाद्यत्वाद्ब्रह्मसवितुस्तेजोन्नाद्य
मित्याद्युपासीततत्तेजस्व्यन्नादश्चामयाविवरहितोभवतिएवंवेद तस्यैतद्गुणफलमुपासनेनवशीकृतोद्वारपः स्वर्ग
लोकप्राप्तिहेतुर्भवतीतिमुख्यं च फलं। अथयोस्य दक्षिणः सुषिस्तत्स्थोवायुविशेषः सवीर्यवत्कर्मकुर्वन्विगृह्य वाप्राणापानौ
नानावानितीतिव्यानस्तत्संबद्धमेवच तच्छ्रोत्रमिन्द्रियंतथासचंद्रमाः श्रोत्रेणसृष्टादिशश्चचंद्रमाश्चेतिश्रुतेः सहाश्रयः श्री
र्वयत्तदेतच्छ्रीश्चविभूतिः श्रोत्रचंद्रमसोर्ज्ञानान्नहेतुत्वमतस्ताभ्यांश्रीत्वज्ञानान्नवत्त्व यशः ख्यातिर्भवतीतियशोहेतुत्वा
च्चरात्मत्वमतस्ताभ्यांगुणाभ्यामुपासीतेत्यादिसमानं। अथयोस्यप्रत्यङ्सुषिः पश्चिमोवायुविशेषः समूत्रपुरीषाद्यपनयन्नधोऽ
नीतीत्यपानः सतथासावाकत्संबद्धा तथाग्निस्तदेतद्ब्रह्मवर्चसं संवृत्तस्वाध्यायनिमित्तंतेजोग्निसंबंधाद्वृत्तस्वाध्याय
स्यान्नग्रसनहेतुत्वादपानस्यान्नाद्यत्वंसमानमन्यत्। अथयोस्योदङ्सुषिरुदग्गतः सुषिस्तत्स्थोवायुविशेषस्सोशितपीतेस
मंनयतीतिसमानस्तत्संबद्धंमनोन्तःकरणंयस पर्जन्योवृष्ट्यात्मकोदेवः पर्जन्यनिमित्ताश्चापइतिमनसासृष्टाआपश्चवरु
णश्चेतिश्रुतेस्तदेतत्कीर्तिश्चमनसोज्ञानस्यकीर्तिहेतुत्वादात्मपरोक्षंविश्रुतत्वं। कीर्तिर्यशः स्वकरणसंवेद्यंविश्रुतत्वंव्युष्टि

नि

छां०भा०

श्चान्निर्देहगतंलावण्यंततस्थ्यकीर्त्तिसंज्ञवाकीर्त्तिश्चेतिसमाननमन्यत्र। अथयोस्योदङ्ः सुषिः सउदानआपादतलादारभ्यो
र्ध्वमुत्क्रमणादुत्कर्षार्थंचकर्मकुर्वन्नितीत्युदानस्सवायुस्तदाधारश्चाकाशस्तेदतद्धायूकाशयोरोजोहेतुत्वादोजोबलंम
हत्वाद्वामहइतिसमाननमन्यत्र। तेवैएतेयथोक्ताःपंचसुषिसंबंधात्पंचब्रह्मणोहार्दस्यपुरुषाराजपुरुषाइवद्वारस्था
स्वर्गस्यहार्दस्यलोकस्यद्वारपालाएतैर्हिचक्षुःश्रोत्रवाङ्मनःप्राणैर्बहिर्मुखप्रवृत्तैर्ब्रह्मणोहार्दस्यप्राप्तिद्वाराणिनिरु
द्धानिप्रत्यक्षं ह्येतदजितकरणतया। बाह्यविषयासंगानृतप्रतिरुद्धत्वान्नहार्देब्रह्मणिमनस्तिष्ठति। तस्मात्सत्यमुक्तं
मेतेपंचपुरुषास्स्वर्गस्यलोकस्यद्वारपाइतिअतस्तानेवंयथोक्तगुणविशिष्टान्स्वर्गस्यलोकस्यद्वारपान्वेदोपास्ते
उपासनयावशीकरोतिसराजद्वारपानिवोपसनेनवशीकृतैरनिवारितःप्रतिपद्यतेस्वर्गलोकराजानमिवहार्दंब्रह्म
किंचास्यविदुषःकुलेवीरःपुत्रोजायतेवीरपुरुषसेवनात्तस्यचऋणापाकरणेनब्रह्मोपासनप्रवृत्तिहेतुत्वंततश्चस्वर्ग
लोकप्रतिपत्तयेपारंपर्य्येणभवतीतिस्वर्गलोकप्रतिपत्तिरेवैकंफलं। अथयदासौविद्वान्स्वर्गेलोकवीरपुरुषसेव
नात्प्रतिपद्यतेयथोक्तंत्रिपादस्यामृतंदिवीतितद्दृष्टलिंगेनचक्षुःश्रोत्रेंद्रियगोचरमापादयितव्यंयथाग्न्यादिधूमादि
लिंगेनतथाह्येवमेवेदमितियथोक्तेर्थेदृढाप्रतीतिस्स्यादन्यनेत्वेनानिश्चयइत्यतआहयदतातममुष्माद्दिवोद्युलोकात्परः

३२

परमिति लिंगव्यत्ययेन ज्योतिर्दीप्यते स्वयंप्रभं सदा प्रकाशत्वात् दीप्यत इव दीप्यत इत्युच्यते अग्न्यादिवज्ज्वलनलक्षणाया दीप्तेर
संभवात् विश्वतः पृष्ठेष्वित्यस्य व्याख्यानं सर्वतः पृष्ठेष्विति संसारादुपरीत्यर्थः संसारिण एव हि सर्वो संसारिण एकत्वानि
र्देशाद्वा अनुत्तमेषु तत्पुरुषसमासाशंकानिवृत्त्यर्थमाह उत्तमेषु लोकेष्विति सत्यलोकादिषु हिरण्यगर्भादिकार्यरूपे परस्ये
श्वरस्यासन्नत्वादुच्यते उत्तमेषु लोकेष्विति इदं वाव तद् यदिदं पुरुषे अन्तर्मध्ये ज्योतिश्चक्षुःश्रोत्रग्राह्येण लिंगेनोपलभ्यमानश
ब्देन यावगम्यते यत्वाचार्यस्पर्शरूपेण गृह्यते तच्चक्षुषेव दृष्टं प्रतीतिकरत्वात् चक्षुषोऽविनाभूतत्वाच्च रूपस्पर्शयोः कथं पुनस्त
स्य ज्योतिषो लिंगं त्वग्दृष्टिगोचरत्वमापद्यत इत्याह यत्रैतस्मिन् काल एतदिति क्रियाविशेषणं अस्मिञ्छरीरे तद्यथा हस्तेना
लभ्य संस्पर्शेनोष्णिमानं रूपसहभाविनमुष्णस्पर्शं तावद्विजानाति सह्युष्णिमा नामरूपव्याकरणाय देहमनुप्रविष्टस्यैत
न्यात्मज्योतिषो लिंगमव्यभिचारात् नहि जीवमात्मानमुष्णिमा व्यभिचरति उष्ण एव जीविष्यन् शीतो मरिष्यन्निति हि विज्ञायते म
रणकाले च तेजः परस्यां देवतायामिति परेणाविभागत्वोपगमात् अतोऽसाधारणं लिंगमौष्ण्यमग्नेरिव धूमः अतस्तस्य परस्यैषा दृष्टि
स्साक्षादिव दर्शनं दर्शनोपायं इत्यर्थः तथा तस्य ज्योतिष एषा श्रुतिः श्रवणोपायोऽप्युच्यमानो यत्र यदा पुरुषो ज्योतिषो लिंगं शु
श्रूषति श्रोतुमिच्छति तदेतत् कर्णावपिगृह्य छद्दः क्रियाविशेषणमपिगृह्यापिधायेत्यर्थः अंगुलीभ्यां प्रोर्णुत्य निनदमिव रथ

50

49

स्यैव घोषो निनदस्तमिव शृणोति नदथुरिव ऋषभकूजितमिव शब्दो यथा वाऽग्नेर्बहिर्ज्वलत एवं शब्दमन्तःशरीर उपशृणो
ति तदेतज्ज्योतिर्दृष्टिश्रुतिलिंगत्वाद्दृष्टं च श्रुतं चेत्युपासीत तथोपासनाच्चक्षुष्यो दर्शनीयः श्रुतो विश्रुतश्च यत्स्पर्शगुणोपा
सननिमित्तं फलं तद्रूपेण संपादयति चक्षुष्य इति रूपस्पर्शयोः सहचारित्वदिष्टत्वाच्च दर्शनीयतायाः एवं च विद्यायाः फलमु
पपन्नं स्यान्न तु मृदुत्वा स्पर्शवत्त्वे ये एवं यथोक्तौ गुणौ वेद स्वर्गलोकप्रतिपत्तिस्तु उक्तमदृष्टं फलं द्विरभ्यास आदरार्थः॥ पु
नस्तस्यैव त्रिपादमृतस्य ब्रह्मणोऽनन्तगुणवतोऽनन्तशक्तेरनेकभेदोपास्यस्य विशिष्टगुणशक्तिमत्त्वेनोपासनं विधित्सन्ना
ह सर्वं स्तं समस्तं खल्विति वाक्यालंकारार्थो निपात इदं जगन्नामरूपविकृतं प्रत्यक्षादिविषयं ब्रह्म कारणं वृद्धतमत्वाद्ब्र
ह्म कथं सर्वस्य ब्रह्मत्वमित्यत आह तज्जलानिति तस्माद्ब्रह्मणो जातं तेजोबन्नादिक्रमेण सर्वमतस्तज्जं तथा जननक्रमेण
प्रतिलोमतया तस्मिन्नेव ब्रह्मणि लीयते तदात्मतया श्लिष्यत इति तल्लं तथा तस्मिन्नेव स्थितिकाले अनिति प्राणिति चेष्टत इ
ति तदनं इत्येवं ब्रह्मात्मतया त्रिषु कालेष्वविशिष्टं तद्व्यतिरेकेणाग्रहणात्तदेवेदमतो जगद्यथा चेदं तदेवैकमद्वितीयं तथा
षष्ठे विस्तरेण वक्ष्यामो यस्माच्च सर्वमिदं ब्रह्मातः शान्तो रागद्वेषादिदोषरहितः संयतः सन् तत्सर्वं ब्रह्म तद्वक्ष्यमाणैर्गुणैरुपासी
त कथमुपासीत स क्रतुं कुर्वीत क्रतुर्निश्चयोऽध्यवसाय एवमेव नान्यथेत्यविचलः प्रत्ययस्तं क्रतुं कुर्वीतोपासीतेत्यने

51

न व्यवहिते न संबन्धः। किं पुनः। क्रतुकरणेन कर्तव्यं प्रयोजनं कथं वा क्रतुः कर्तव्यः क्रतुकरणं वाभिप्रेतस्यार्थस्य सिद्धिसाधनं
कथमित्यस्यार्थस्य प्रतिपादनार्थं स क्रतुं कुर्वीतेत्यादि ग्रन्थः। अथ खल्विति हेत्वर्थो यस्मात्क्रतुमयः क्रतुप्रायोऽध्यवसायात्मकः पुरुषो जीवो
यथाक्रतुर्यादृशः क्रतुरस्य सोऽयं यथाक्रतुर्यथाध्यवसायो यादृग्निश्चयोऽस्मिँल्लोके जीवन्निह पुरुषो भवतीति तथेतोऽस्माद्दे
हात्प्रेत्य मृतो भवति क्रत्वनुरूपफलात्मको भवतीत्यर्थः। एवं ह्येतच्छास्त्रतो दृष्टं यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरमित्यादि
यत एवं व्यवस्था शास्त्रदृष्टा अतः स एवं जानन्क्रतुं कुर्वीत यादृशं क्रतुं वक्ष्यामस्तं यत एवं शास्त्रप्रामाण्यादुपपद्यते क्रत्वनुरू
पं फलमतः स कर्तव्यः क्रतुः कथं मनोमयो मनःप्रायो मनुतेऽनेनेति मनस्तत्स्ववृत्त्या विषयेषु प्रवृत्तं भवति तेन मनसा त
न्मयस्तथा प्रवृत्त इव तत्प्रायो निवृत्त इव वा तत एव शरीरः प्राणो लिङ्गात्मा विज्ञानक्रियाशक्तिद्वयसंमूर्छितो यो वै प्राणः सा प्रज्ञा
या वा प्रज्ञा स प्राण इति श्रुतेः स शरीरं यस्य स प्राणशरीरः प्राणशरीरनेतेति च श्रुत्यन्तराद्भारूपो भा दीप्तिश्चैतन्यलक्षणा
रूपं यस्य स भारूपः सत्यसंकल्पः सत्या अवितथाः संकल्पा यस्य सोऽयं सत्यसंकल्पो न यथा संसारिण इवानैकान्तिकफलः सं
कल्प ईश्वरस्येत्यर्थोऽनृतेन मिथ्याफलहेतुना प्रतिरुद्धत्वात्संकल्पस्य मिथ्याफलत्वं वक्ष्यत्यनृतेन हि प्रत्यूढा इति आकाशात्माकाश
इवात्मा स्वरूपं यस्य स आकाशात्मा सर्वगतत्वं सूक्ष्मत्वं रूपादिहीनत्वं चाकाशतुल्यतेश्वरस्य सर्वकर्मा सर्वं विश्वं तेनेश्वरेण क्रिय

न२ भाग५

नतु कामो स्मीत्यत्र वचनात्

छां०भा०

त इति जगत्सर्वं कर्मास्य स सर्वकर्मा सहि सर्वस्य कर्तेति श्रुतेः सर्वकामः सर्वे कामा दोषरहिता अस्येति सर्वकामो धर्माविरुद्धो
भूतेषु कामोस्मीति वचनादिह बहुव्रीहिर्न संभवति सर्वकाम इति न कामस्य कर्तव्यत्वाच्छब्दादिवत्पारार्थ्यप्रसंगाच्च देवस्य त
स्माद्यथेह सर्वकाम इति बहुव्रीहिस्तथा कामोस्मीति स्मृत्यर्थो वाच्यः सर्वगंधः सर्वे गंधाः सुखकरा अस्य सोयं सर्वगंधः पुण्यो
गंधः पृथिव्यामिति स्मृतेस्तथा रसा अपि विज्ञेया अपुण्यगंधरसग्रहणस्य पाप्मसंबंधनिमित्तश्रवणात्तस्मात्तेनो गंध इति श्रुतेः

३५ न हि पाप्मनास्य संबंधोस्ति अविद्यादिदोषस्य विद्वत्सु अनुपपत्तेः सर्वमिदं जगदभ्यात्तोभिव्याप्तः

५६ अततेर्व्याप्तिकर्मणः कर्तरि निष्ठा अवाकी उच्यतेनयेति वाग्वाग्वाकोयद्वा वचेर्घञ्तस्य करणे वाकः स यस्य विद्यते स वाकीन ३३
वाकी अवाकी वाकप्रतिषेधश्चात्र श्रोत्राद्युपलक्षणार्थो गंधरसादिश्रवणात्प्राप्तानि घ्राणादीनि करणानि गंधादिग्रहणाय तो
वाक्प्रतिषेधेन प्रतिषिध्यंते अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यादिमंत्रवर्णादनादरोसंभ्रमो प्रा
प्तो हि संभ्रमः स्यादनाप्तकामस्य नत्वाप्तकामत्वान्नित्यतृप्तस्येश्वरस्य संभ्रमोस्ति क्वचिदेष यथोक्तगुणो मे मम आत्मांतर्हृदये
हृदयपुंडरीकस्यांतर्मध्ये णीयानणुतरो व्रीहेर्वा यवाद्वेत्यादि अतः सूक्ष्मत्वप्रदर्शनार्थं श्यामाकाद्वा श्यामाकतंडुलाद्वेति परिच्छि
न्नपरिमाणादणीयानित्युक्तेणुपरिमाणत्वं प्राप्तमाशंक्यातस्तत्प्रतिषेधायारभत एष म आत्मांतर्हृदये ज्यायान्पृथिव्या इत्यादि

नाज्यायः परिणामाज्ज्यायस्त्वं दर्शयन्ननंतपरिमाणत्वं दर्शयति मनोमय इत्यादिना ज्यायानेभ्यो लोकेभ्य इत्यंतेन
यथोक्तगुणलक्षण ईश्वरो ध्येयो न तु तद्गुणविशिष्ट एव यथा राजपुरुषमानय चित्रगुं वेत्युक्ते न विशेषणस्यापानयने व्या
प्रियते तद्वदिहापीति प्राप्तमतस्तन्निवृत्त्यर्थं पुनः सर्वकर्मेत्यादिवचनं तस्मान्मनोमयत्वादिगुणविशिष्ट एवेश्वरो ध्येयोऽत ए
व षष्ठसप्तमयोरिव तत्त्वमस्यात्मैवेदमिति नेह स्वाराज्येऽभिषिञ्चत्येष म आत्मा तद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मीति लिंगा
न्न चात्मशब्देन प्रत्यगात्मैवेष्यते न म इति षष्ठ्याः संबंधार्थप्रत्यायकत्वादेतमभिसंभवितास्मीति च कर्मकर्तृत्वनिर्द्देशान्ननु षष्ठे
ऽथसंपत्स्यते इति संपत्तेः कालान्तरितत्वं दर्शयति नारब्धसंस्कारशेषस्थित्यर्थपरत्वान्न कालांतरितार्थता ऽन्यथा तत्त्वमसीत्येतस्यार्थस्य
बाधप्रसंगास्य त्मशब्दस्य प्रत्यगर्थत्वे सर्वसर्वं खल्विदं ब्रह्मेति प्रकृतमेष आत्मा तद्धृदय एतद्ब्रह्मेत्युच्यते तथाप्यंतर्द्धानमीषदपरि
त्यज्यैवैतमात्मानमितोऽस्माच्छरीरात्प्रेत्याभिसंभवितास्मीत्युक्तं यथाक्रतुरूपस्यात्मनः प्रतिपत्तास्मीति यस्यैवंविदः स्यादद्धा वेदद्धा
सत्यमेवं स्यामिति न च विचिकित्सास्तीत्येतस्मिन्क्रतुफलसंबंधे स तथैवेश्वरभावं प्रतिपद्यते विद्वानित्येवमाह स्मोक्तवान्किल
शांडिल्यो नामर्षिर्द्विरभ्यास आदरार्थः अस्य कुले वीरो जायत इत्युक्तं न वीरजन्ममात्रं पितुस्त्राणाय तस्मात्पुत्रमनुशिष्टं लोक्यमा
हुरिति श्रुत्यंतरादतस्तद्दीर्घायुष्ट्वं कथं स्यादित्येवमर्थं कोशविज्ञानारंभोऽभ्यर्हितविज्ञानव्यासंगादनन्तरमेव नोक्तं तदिदानीमि

भूमिर्बुध्नो २

छां० भा०

३५

वारयते । अंतरिक्षमुदरमंतःसुषिरं यस्य सोयमंतरिक्षोदरः कोशः कोश इवानेकधर्मसादृश्यात्कोशः स च भूमिबुध्नो भूमिर्बुध्नो मूलं यस्य स
भूमिबुध्नो न जीर्यति न विनश्यति त्रैलोक्यात्मकत्वात्सहस्रयुगकालावस्थायी हि स दिशो ह्यस्य स्रक्तयः कोणा द्यौरस्य कोशस्योत्तरमूर्ध्वं
बिलं यस्य स एष यथोक्तगुणः कोशो वसुधानो वसु धीयतेस्मिन्प्राणिनां कर्मफलाख्यमतो वसुधानस्तस्मिन्नंतर्विश्वं समस्तं प्राणिकर्म
फलं तत्साधनैरिंद्रियैः सह यत्प्रत्यक्षादिप्रमाणैः श्रितं माश्रितमास्थितमित्यर्थः । तस्यास्य प्राची दिग्गतो भागो जुहूर्नाम जुह्वतेस्यां
दिशि कर्मिणः प्राङ्मुखाः संत इति जुहूर्नाम सहमाना नाम सहंतेस्यां पापकर्मफलानि यमपुर्यां प्राणिन इति सहमाना नाम द
क्षिणा दिक् तथा राज्ञी नाम प्रतीची पश्चिमा दिग्राज्ञी नाम सा राज्ञा वरुणेनाधिष्ठिता संध्यारागयोगाद्वा सुभूता नाम भूतिमद्भिरीश्वरकु
बेरादिभिरधिष्ठितत्वात्सुभूता नामोदीची तासां दिशां वायुर्वत्सो दिग्जत्वाद्वायोः पुरोवात इत्यादिदर्शनात्स यः कश्चित्पुत्रस्य दीर्घजी
वितार्थी एवं यथोक्तगुणं वायुं दिशां वत्सममृतं वेद स न पुत्ररोदं पुत्रनिमित्तं रोदनं न रोदिति पुत्रो न म्रियत इत्यर्थः । यत एवं विशिष्टं
कोशदिग्वत्सविषयविज्ञानमतः सोहं पुत्रजीवितार्थी एवमेतं वायुं दिशां वत्सं वेद जाने ऽतो मा मा पुत्ररोदं पुत्रमरणनिमित्तो रोदो
मम मा भूदित्यर्थः । अरिष्टमविनाशिनं यथोक्तं कोशं प्रपद्ये प्रपन्नोस्मि पुत्रायुषे ऽमुनामुनेति त्रिर्नाम गृह्णाति पुत्रस्य तथा प्राणं प्रप
द्येमुनामुनामुना तथा भूः प्रपद्येमुनामुनामुना भुवः प्रपद्येमुनामुनामुना स्वः प्रपद्येमुनामुनामुना सर्वं प्रपद्य इति त्रिर्नाम गृह्णा

नामुर

३४

सर्व

तिपुनः पुनः स यदवोचं प्राणं प्रपद्य इति व्याख्यानार्थमुपन्यासः। प्राणो वा इदं सर्वं जगद्यथा वा अरा नाभाविति वक्ष्यति मतस्त-
मेव तत्वेन प्राणप्रतिपादनेन सापात्सिप्रपन्नो भवेत्तथा भूः प्रपद्ये इति त्रीँल्लोकान्भूरादीन्प्रपद्य इति तदवोचमथ यदवोच-
म्भुवः प्रपद्य इत्यग्न्यादीन्प्रपद्य इति तदवोचमथ यदवोचं स्वः प्रपद्य इत्यृग्वेदादीन्प्रपद्य इत्येव तदवोचमिति। उपरिष्टान्मन्त्रा-
ञ्जपेत्पूर्वोक्तमजरं कोशं सदिग्वत्सं यथावद्ध्यायेद्द्विर्वचनमादरार्थं॥ पुत्रायुष उपासनमुक्तं जपश्चाथेदानीमात्मनो दीर्घजी-
वनायेदमुपासनं जपं च विदधदाह। जीवन्हि स्वयं पुत्रादिफलेन युज्यते नान्यथेत्यात्मानं यज्ञं संपादयति पुरुषः। पुरुषो जीवन-
विशिष्टः कार्यकरणसंघातो यथाप्रसिद्ध एव वा वशब्दोऽवधारणार्थः। पुरुष एव यज्ञ इत्यर्थः। तथा हि सामान्यैः संपादयति
यज्ञत्वं कथं तस्य पुरुषस्य यानि चतुर्विंशतिवर्षाण्यायुषस्तत्प्रातःसवनं पुरुषाख्यस्य यज्ञस्य केन सामान्येनेत्याह। चतुर्विंशत्य-
क्षरा गायत्री छन्दो गायत्रं छंदस्कं हि विधियज्ञस्य प्रातःसवनमतः प्रातःसवनसंपन्नेन चतुर्विंशतिवर्षायुषा युक्तः पुरुषोऽतो वि-
धियज्ञसादृश्याद्यज्ञस्तथोत्तरयोः छदायुषोः सवनद्वयसंपत्तिस्त्रिष्टुब्जगत्यक्षरसंख्यासामान्यतो वाच्या किंच तदस्य पुरुषस्य यज्ञ-
स्य यज्ञस्य प्रातःसवनं विधियज्ञस्येव वसवो देवा अन्वायत्ता अनुगताः सवनदेवतात्वेन स्वामिन इत्यर्थः। पुरुषयज्ञेऽपि विधियज्ञ इवा-
ग्न्यादयो वसवो देवताः प्राप्ता इत्यतो विशिनष्टि। प्राणा वाव वसवो वागादयो वायवश्चैते हि यस्मादिदं पुरुषादिप्राणिजातमेते वास-

ॐ

छा०भा० यंति हि प्राणेषु हि देहेषु वसत्सु सर्वमिदं वसतीत्यर्थे त्यतो वसनाद्वासनाद्वा वसवस्ते वै यज्ञसंपादितमेतस्मिन्प्रातःसवनसं
पन्ने वयसि किंचिद्व्याध्यादिमरणाशंकारणमुपतपेद्दुःखमुत्पादयेत्स न तदायुः संपादी पुरुष आत्मानं यज्ञं मन्यमानो
ब्रूयाज्जपेदित्यर्थः इमं मंत्रं प्राणा वा वसवो हीदं मे प्रातःसवनं मम यज्ञस्य वर्त्तते तन्माध्यंदिनं सवनमनुसंतनुतेति
माध्यंदिनसवनेनायुषा संहितं मे कीर्त्तं संततं कुरुतेत्यर्थः माहं यज्ञो युष्माकं प्राणानां वसूनां प्रातःसवनेशानां मध्ये
विलोप्सीय विलोपेयं विच्छिद्येयमित्यर्थः इति शब्दो मंत्रपरिसमाप्त्यर्थः स तेन जपेन ध्यानेन च ततस्तस्मादुपतापादुदे
३५ त्यगच्छति उद्गम्योद्गम्य विमुक्तस्सन्नगदो हानुपतापो न भवत्येवाथ यानि चतुश्चत्वारिंशद्वर्षाणीत्यादि समानं रुदंति रोदयं ३५
तीति प्राणा रुद्राः क्रूरा हि ते मध्यमे वयस्यतो रुद्रास्तथादित्याः प्राणास्ते हीदं शब्दादिजातमाददतेऽत आदित्यास्तृतीयसव
नं मायुषोडशोत्तरं वर्षशतं समापयतानुसंतनुत यज्ञं समापयतेत्यर्थः समानमन्यत् निश्चिता हि विद्याफलायेत्येतद्द
र्शयन्नुदाहरत्येतद्ध स्म दर्शनं ह स्म वै किल तद्विद्वानाह महिदासो नाम त इतराया अपत्यमैतरेयः किं कस्मान्मे मामेत
दुपतदुपतपसि स त्वं हे रोगयो हं यज्ञोनेन त्वत्कृतेनोपतापेन न प्रेष्यामि न मरिष्यामि अतो वृथा तव परिश्रम इत्यर्थः इत्ये
वमाहस्मेति पूर्वेण संबंधः स एवं निश्चयः सन्षोडशं वर्षशतमजीवदन्योप्येवं निश्चयः षोडशं वर्षशतं प्रजीवति यथोक्त

यज्ञसंपादनं वेद जानाति स इत्यर्थः। स यद् अशिशिषति इत्यादि यज्ञसामान्यनिर्देशः। पुरुषस्य पूर्वेणैव संबध्यते। यद् अशि-
शिषति अशितुमिच्छति तथा पिपासति पातुमिच्छति यन्न रमते इष्टाद्यप्राप्तिनिमित्तं यदेवं जातीयकं दुःखमनुभवति ता अस्य दी-
क्षा दुःखसामान्याद्धि विधियज्ञस्येव। अथ यदश्नाति यत्पिबति यद्रमते रतिं चानुभवति इष्टादिसंयोगात्तदुपसदैः समानतामेति
उपसदां च पयोव्रतत्वनिमित्तं सुखमस्ति अल्पभोजनीयानि आहारादीनि आसन्नानि इति प्रश्वासोऽतोऽशनादीनामुपसदां
च सामान्यम्। अथ यद्धसति यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव तत्समानतामेति शब्दवत्त्वसामान्यात्। अथ यत्तपो दान-
मार्जवमहिंसा सत्यवचनमिति ता अस्य दक्षिणा धर्मपुष्टिकरत्वसामान्यात्। यस्माद्यज्ञपुरुषस्तस्मात्तं जनयिष्यति माता
यदा तदाहुरन्ये सोष्यतीति तस्य मातरं यदा च प्रसूता भवति तदा असोष्ट पूर्णिकेति विधियज्ञ इव सोष्यति सोमं देवदत्तः असोष्ट सो-
मं यज्ञदत्त इति। अतः शब्दसामान्याद्वा पुरुषो यज्ञः पुनरुत्पादनमेवास्य तत्पुरुषाख्यस्य यज्ञस्य सोष्यत्यसोष्टेति शब्दसं-
बन्धित्वं विधियज्ञस्येव किं च तन्मरणमेवास्य पुरुषस्य यज्ञस्यावभृथः समाप्तिसामान्यात्। तद्धैतद्यज्ञदर्शनं घोरो नामत आङ्गिर-
सो गोत्रतः कृष्णाय देवकीपुत्राय शिष्यायोक्त्वोवाच तदेतत्त्रयमित्यादिव्यवहितेन संबन्धः। स चैतद्दर्शनं श्रुत्वा अपिपासोऽन्या-
भ्यो विद्याभ्यो बभूव इत्थं च विशिष्टेयं विद्या यत्कृष्णस्य देवकीपुत्रस्यान्यविद्यां प्रति तृड्विच्छेदकरीति पुरुषयज्ञविद्यां स्तौति। घो-

छां०ना०

रआंगिरसः कृष्णायोक्त्वेमां विद्यां किमुवाचेति तदाह। स एवं यथोक्तयज्ञविदं तवेलायां मरणकाले एतन्मंत्रत्रयं प्रतिपद्येत ज-
पेदित्यर्थः। किं तदक्षितमसि अक्षीणमक्षितं वासीत्येकं यजुः सामर्थ्यादादित्यस्थं प्राणं चैकीकृत्वाह तथा तमेवाह अच्युतं स्वरू-
पादप्रच्युतमसीति द्वितीयं यजुः प्राणसंशितं सम्यक्तनूकृतं च सूक्ष्मं तत्त्वमसीति तृतीयं यजुस्तत्रैवास्मिन्नर्थे विद्यास्तुति-
परे द्वे ऋचौ मंत्रौ जपवतो न जपार्थे त्रयं प्रतिपद्येतेति त्रित्वसंख्याबाधनात् पंचसंख्या हि तदा स्यात्। आ इत् इदित्यत्राकारस्यानुबं-
धस्तकारो नर्थक इच्छब्दश्चाप्रयत्नस्याविरंतनस्य पुराणस्येत्यर्थः। रेतसः कारणस्य बीजभूतस्य जगतः सदाख्यस्य ज्योतिः

३६

प्रकाशं पश्यंति आ छद्वृत्तस्यष्टानुबंधः पश्यन्तीत्यनेन संबध्यते किं तज्ज्योतिः पश्यन्ति वासरं महरहरिव तत्सर्वतो व्याप्तं
ब्रह्मणो ज्योति निवृत्तचक्षुषो ब्रह्मविदो ब्रह्मचर्यादि निवृत्तिसाधनैः शुद्धांतःकरणा आसमंततो ज्योतिः पश्यन्तीत्यर्थः। परः
परमिति लिंगव्यत्ययेन ज्योतिः परं खवा यद्दिव्यते दीप्यते दिविद्योतनवति परस्मिन् ब्रह्मणि वर्तमानं येन ज्योतिषेद्धः सवि-
ता तपति चंद्रमा भाति विद्युद्विद्योतते ग्रहतारागणा विभासन्ते किं च ऋचो मंत्रदृगाह यथोक्तं ज्योतिः पश्यन् वयं तमसो
ज्ञानलक्षणात्परि परस्तादिति शेषः। तमसोपायनेत्यय ज्योतिरुत्तरमादित्यस्थं परि पश्यन्तो वयमुदगन्मेति व्यवहितेन सं-
बंधः। तज्ज्योतिः स्वं स्वमात्मीयमस्मद्धृदि स्थितमादित्यस्थं च परिपश्यन्तस्तदेकं ज्योतिर्यदुत्तरमुत्कृष्टतरमूर्ध्वतरं वापरं

३६

धा५

ज्योतिरपेक्ष्य परस्यन्तः उदगान्म वयं कमुदगन्मेत्याह देवं द्योतनवन्तं देवत्रा देवेषु सर्वेषु सूर्यं रसानां रश्मीनां प्राणानां च जग
तईरणा सूर्यस्तमुदगान्म गतवन्तो ज्योतिरुत्तमं सर्वज्योतिर्भ्य उत्कृष्टतममहो प्राप्तावयमित्यर्थः॥ इदं तज्ज्योतिर्यदृग्भ्यां स्तुतं
यद्यजुरक्षरैयेण प्रकाशितं द्विरभ्यासो यज्ञकल्पनासमाप्त्यर्थः॥ मनो मय ईश्वर उक्त आकाशात्मेति च गुणैकदेशेनार्थ इदानीं
मन आकाशयोः॥ समस्तब्रह्मदृष्टिविधानार्थमारंभो मनो ब्रह्मेत्यादि॥ मनो मनुतेनेनेत्यन्तःकरणं तद्ब्रह्म परमित्युपासीते
त्येतदात्मविषयं दर्शनमध्यात्ममथाधिदैवतं देवताविषयमिदं वक्ष्याम आकाशो ब्रह्मेत्युपासीतेत्येवमुभयमध्यात्माधिदैवं चो
भयं ब्रह्मदृष्टिविषयमादिष्टमुपदिष्टं भवत्याकाशमनसोः॥ सूक्ष्मत्वान्मनसोपलभ्यत्वाच्च ब्रह्मणो योग्यं मनो ब्रह्मदृष्टेराका
शश्च सर्वगतत्वात्सूक्ष्मत्वादुपाधिहीनत्वाच्च तदेतन्मन आख्यं चतुष्पाद्ब्रह्म चत्वारः॥ पादा अस्येति कथं चतुष्पात्त्वं मनसो ब्रह्म
ण इत्याह वाक्पादः॥ प्राणश्चक्षुः॥ श्रोत्रमेत्येते चत्वारः॥ पादा इत्यध्यात्ममथाधिदैवतमाकाशस्य ब्रह्मणोऽग्निः पादो वायुरादित्यो
दिश इत्येतदेवमुभयमेव चतुष्पाद्ब्रह्मादिष्टं भवतीत्यध्यात्ममथाधिदैवतं च तत्र वाग्वै ब्रह्मणश्चतुर्थः पाद इतरपादत्रया
पेक्षया वाचा हि पादेनेव गवादि वक्तव्यविषयं प्रतितिष्ठत्यतो मनसः॥ पाद इव वाक् तथा प्राणो घ्राणः॥ पादस्तेनापि गंधविषयं
प्रति चंक्रमीति तथा चक्षुः॥ पादः॥ श्रोत्रं पाद इत्येवमध्यात्मं चतुष्पात्त्वं मनसो ब्रह्मणः॥ अथाधिदैवतमग्निर्वाय्वादित्यदिश

छां० शा०

आकाशस्य उदर इव गोः पादा विलग्ना उपलभ्यन्ते तेन तस्याकाशस्याग्न्यादयः पादा उच्यन्ते इत्येवमुभयमध्यात्मं चैवाधिदै
वतं चतुष्पात्त्वाद्दिष्टं भवति तत्र वागेव मनसो ब्रह्मणश्चतुर्थः पादः सोऽग्निनाधिदैवतेन ज्योतिषा भाति च दीप्यते तपति च
संतापं चौष्ण्यं च करोति अथवा तैलघृताद्याग्नेयाद्यशनेनेद्धा वाग्भाति च तपति च वदनोत्साहवती स्यादित्यर्थः विद्वत्फ
लं भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं यथोक्तं वेद तथा प्राण एव च ब्रह्मणश्चतुर्थः पादः स वायुना गन्धा
य भाति च तपति च तथा चक्षुरादित्येन रूपग्रहणाय श्रोत्रं दिग्भिः शब्दग्रहणाय विद्याफलं समानं सर्वत्र ब्रह्मसंपत्तिर
दृष्टं फलं य एवं वेद द्विरुक्तिर्दर्शनसमाप्त्यर्थम्॥ आदित्यो ब्रह्मणः पाद उक्त इति तस्मिन्सकलब्रह्मदृष्ट्यर्थमिदमारभ्यते।
आदित्यो ब्रह्मेत्यादेश उपदेशस्तस्योपव्याख्यानं क्रियते स्तुत्यर्थम्। असदव्याकृतनामरूपमिदं जगदशेषं प्रागवस्थायामु
त्पत्तेरासीन्न त्वसदेव कथमसतस्सज्जायेत तत्सत्कार्यत्वस्य प्रतिषेधान्नन्विहासदेवेति विधानाद्विकल्पः स्यान्न क्रियास्वि
व वस्तुनि विकल्पानुपपत्तेः कथं तर्हीदमसदेवेति नन्ववोचामाव्याकृतनामरूपत्वादसदिवासदिति नन्वेवशब्दोऽवधा
रणार्थस्सत्यमेवं न तु सत्त्वाभावमवधारयति किं तर्हि नामरूपव्याकृतविषये सच्छब्दप्रयोगो दृष्टस्तच्च नामरूपव्याकरणमा
दित्यायत्तं प्रायशो जगतस्तदभावे ह्यन्धं तम इदं न प्रज्ञायेत किंचनेत्यतस्तत्स्तुतिपरे वाक्ये सदपीदं प्रागुत्पत्तेर्जगदसदेवेत्यादि

३२

१

त्वंस्यादिति ब्रह्मदृष्ट्यर्हत्वायादित्यनिमित्तो हि लोके सदिति व्यवहारो यथा सदेवेदं राजकुलं सर्वगुणसंपन्ने पूर्णवर्मिणि
राजनि सती ति तव सत्व मसत्वं वा हजगतः प्रतिपिपादयिषितमादित्यो ब्रह्मेत्यादेशपरत्वाडुपसंहरिष्यत्यंतेआदि
त्यं ब्रह्मेत्युपास्त इति तत्सदासीत्तदसच्छब्दवाच्यं प्रागुत्पत्तेस्तिमितं निष्पंदमसदिवसत्कार्याभिमुखमीषडुपजातप्रवृ
त्ति सदासीत्ततो लब्धपरिस्पंदं तत्समभवदल्पतरनामरूपव्याकरणेनांकुरीभूतमिव बीजं ततोपि क्रमेण स्थूलीभव
दद्भ्योंडं समवर्तत संवृत्तमांडमिति दैर्घ्यं छांदसं तदंडं संवत्सरस्य कालस्य प्रसिद्धमात्रं परिमाणमभिन्नस्वरूपमेवाशयत
स्थितं बभूव तत्संवत्सरपरिमाणात्कालादूर्ध्वं निरभिद्यत निर्भिन्नं वयसामिवांडं तस्य निर्भिन्नस्यांडस्य कपाले द्वे रजतं
सुवर्णं चाभवतां संवृत्ते तत्तयोः कपालयोर्यद्रजतं कपालमासीत्सेयं पृथिवी पृथिव्युपलक्षितमधोंडकपालमित्यर्थः यद
त्सुवर्णं कपालं सा द्यौर्द्युलोकोपलक्षितमूर्ध्वकपालमित्यर्थः यज्जरायु गर्भवेष्टनं स्थूलमंडस्य द्विशकलीभावकाले आसी
त्ते पर्वता बभूवुः यदुल्बं यत्सूक्ष्मं गर्भपरिवेष्टनं तत्सह मेघैः समेघा नीहारो बभूवेत्यर्थः या गर्भस्य जातस्य देहे धमनय
स्सिरास्ता नद्यो बभूवुः यत्तस्य वास्तेयमुदकं स समुद्रोथ यत्तदजायत गर्भरूपं तस्मिन्नंडे सोसावादित्यस्तमादित्यं
जायमानं घोषाः शब्दा उलूलव उरवो विस्तीर्णा रवा उदतिष्ठन्नुत्थितवंत ईश्वरस्येव ह प्रथमपुत्रजन्मनि सर्वाणि स्थाव

ग ५

छां० भा०

रङ्गमानि च भूतानि सर्वे। च एतेषां भूतानां कामाः काम्यन्त इति विषयाः स्त्रीवस्त्रान्नादयो यस्मादादित्यजन्मनिमित्तं भूतका
मोत्पत्तिस्तस्माद्धेतोः पितुस्यादित्यस्योदयं प्रति प्रत्यायनं प्रत्यस्तगमनं प्रत्यथवा पुनः पुनः प्रत्यागमनं प्रत्यायनं तत्प्रति
निमित्तीकृत्येत्यर्थः सर्वाणि च भूतानि सर्वे च कामा घोषा उल्लवश्चोत्तिष्ठन्ति प्रसिद्धं ह्येतदुद्यादित्यादौ सवितुः स यश्चश्चिदेत
मेवं यथोक्तं महिमानं विद्वानसन्नादित्यं ब्रह्मेत्युपास्ते स तद्भावं प्रतिपद्यत इत्यर्थः। किं च दृष्टं फलमस्याभ्याशः क्षिप्रं तद्धि दो यदि नि
क्रियाविशेषणमेनमेवं विदं साधवः शोभना घोषाः साधुत्वं घोषादीनां यदुपभोगे पापानुबन्धाभाव आ च गच्छेयुरागच्छेयु
निम्रोपश्च निम्रेडेरन्नुपनिम्रेडेरंश्च न केवलमागममात्रं घोषाणामुपसुखयेयुश्चोपसुखं च कुर्युरित्यर्थः। द्विरभ्यासोऽध्याय
परिसमाप्त्यर्थ आदरार्थश्च॥ ॥इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य शंकरभगवतः कृतौ
छान्दोग्योपनिषद्भाष्यविवरणे पञ्चमः प्रपाठकः॥ ॥वायुप्राणयोर्ब्रह्मणः पादद्वयाध्यासः पुरस्ताद्वर्णितोऽथेदानीं तयोः सा
क्षाद्ब्रह्मत्वेनोपास्यत्वायोत्तरमारभ्यते आख्यायिकया जानश्रुतिर्जनश्रुतस्यापत्यं जानश्रुतिः ह इत्यैतिह्यार्थः पुत्रस्य पौत्रः पौ
त्रायणः स एव श्रद्धादेयः श्रद्धापुरःसरमेव ब्राह्मणादिभ्यो देयमस्येति श्रद्धादेयो बहुदायी प्रभूतं दातुं शीलमस्येति बहुदायी
बहुपाक्यो बहु पक्तव्यमहन्यहनि गृहे यस्यासौ बहुपाक्यो भोजनार्थिभ्यो बहु अन्नं पच्यत इत्यर्थः एवं गुणसंपन्नो सोऽ

३८

सुखावबोधार्था आख्यायिका विद्यादानग्रहणविधिप्रदर्शनार्था च श्रद्धान्नदानानुद्धतत्वादीनां च विद्याप्राप्तिसाधनत्वं
प्रदर्शयति ३

निरु

नश्रुतिः पौत्रायणो विशिष्टे देशे काले च कस्मिंश्चिदासह बहुत्वस्य हसर्वतः सर्वासु दिक्षु ग्रामेषु नगरेषु चावसथानेत्य वस
न्ति येष्वित्यावसथास्तान्समापयां चक्रे कारितवानित्यर्थः सर्वत एव मे ममान्नं तेष्वावसथेषु वसन्तो ऽत्स्यन्तीत्योदनाद्यैवमन्निप्रायः तत
त्रैवं तिराजं तस्मिन्धर्मकाले हर्म्यतलस्थे प्यद्य ह हंसा निशायां राजावतिपेतुः ऋषयो देवता वा राज्ञोन्नदानगुणैस्तोषिताः सन्तो
हंसरूपा भूत्वा राज्ञो दर्शनगोचरे निपेतुः पतिः पतितवन्तस्तस्मिन्काले तेषां पाततां हंसानामेकः पृष्ठतः पतन्नग्रतः पततं हंस
मन्यकप्रवादान्यकवाहो होयी तिसंबोध्य जल्लाक्ष जल्लाक्ष इत्यादरं दर्शयति यथा परस्याश्चर्यमिति तद्भल्लाक्ष इति मंदद्दष्टित्वं स्त
वयन्नाहाथवा सम्यग्दर्शनविरहलक्षणाभिमानबलात्स्यात्सक्रुदुपालब्धस्तेनपीड्यमानो मर्षतया तत्सूचयति जल्लाक्ष इति जान
श्रुतेः पौत्रायणस्य समं तुल्यं वा द्युलोकेन ज्योतिःप्रभास्वरमन्नदानादिजनितप्रभावजमातं तं व्याप्तं द्युलोकस्पृगित्यर्थो दिवा
ज्ञो वा समं ज्योतिरित्ये तन्मा प्रसाङ्क्षीः संजनं शैक्षिस्तेन ज्योतिषा संबंधं माकार्षीरित्यर्थः तत्संजनेन तज्ज्योतिष्ट्वा त्वां प्रधाङ्क्षीर्मा
दहत्वित्यर्थः पुरुषव्यत्ययेन मा प्रधाङ्क्षीदिति तमेवमुक्तवन्तं परइतरो ऽग्रगामी प्रत्यवाचारे निकृष्टो ऽयं राजा वराकस्तं कमु
सन्तं केनमाहात्म्येन युक्तं सन्तमिति रु त्सय त्वेनमेवं सबहुमानं तैमेतद्वचनमात्थ रैक्वमिव सयुग्वानं सह युग्वया गब्व न्तं तइ
सयुग्वा रैक्व स्तमिवात्थेनमननुरूपमस्मिन्नयुक्तमीदृशं वक्तुं रैक्व इवेत्युक्ते प्राय स्तमितर आहायो नु कथं चयो त्वयोच्यते सयुग्वा रै

स

क

श्या

64

68

छां०भा०

मं२

क्व इत्युक्तवन्तं जल्हासमाह शृणु यथैष रैक्वो यथा लोके कृतायः कृतो नामायो द्यूतसमये प्रसिद्धश्चतुरंकः स यदा जीयते द्यू-
ते प्रवृत्तानां तस्मै विजिताय तदर्थमितरे त्रिद्व्येकांका अधरेयास्त्रेताद्वापरकलिनामानः संयन्ति संगच्छन्ति ते तर्जवन्ति चतुरंके कृते आये
त्रिद्व्येकांकानां विद्यमानत्वादन्तर्भवन्तीत्यर्थः यथायं दृष्टान्त एवमेनं रैक्वं कृतायस्थानीयं त्रेताद्यायस्थानीयं सर्वं तदभिसमे-
ति अन्तर्भवति रैक्वे किं तद्यत्किंच लोके सर्वाः प्रजाः साधु लोके शोभनं धर्मजातं कुर्वन्ति तत्सर्वं रैक्वस्य धर्मेऽन्तर्भवति तस्य च फलं सर्व-
[illegible] न प्राणिधर्मफलमन्तर्भवतीत्यर्थः तथान्योऽपि कश्चिद्यस्तद्वेद्यं वेद किं तद्यद्वेद्यं यत्स रैक्वो वेद तमपि सर्वप्राणिधर्मजातं तत्फ-
लं वा रैक्वमिवाभिसमेतीत्यनुवर्तते तथा स एवंभूतो रैक्वो मया विद्वानेतदुक्त एवमुक्तो रैक्वः वत्स एव कृतायस्थानीयो भवतीत्यभि-
प्रायः तदु ह तदेतदीदृशं हंसवाक्यमात्मनः कुत्सारूपमन्यस्य विदुषो रैक्वादेः प्रशंसारूपमुपशुश्राव श्रुतवान् हर्म्यतलस्थो रा-
जा जानश्रुतिः पौत्रायणस्तच्च हंसवाक्यं स्मरन्नेव पौनःपुन्येन रात्रिशेषमतिवाहयामास ततः स बंदिभी राजा स्तुतियुक्ताभिर्वाग्भि-
ः प्रतिबोध्यमान उवाच क्षत्तारं स जिहान एव शयनं निद्रां वा परित्यजन्नेव हे अंग वत्सारे ह सयुग्वानमिव रैक्वमात्थ किं मां स एव स्तुत्यर्हो
नाहमित्यभिप्रायः अथवा सयुग्वानं रैक्वमात्मगत्वा मम तद्दिदृक्षां तद्वेदयेत्यवधारणार्थोऽनर्थको वा वाचः स च क्षत्ता प्रत्याह वा च रै-
क्वायनं न कामो राज्ञोऽभिप्रायः कोनु कथं सयुग्वा रैक्व इति राज्ञैवं प्रोक्त आनेतुं तद्विह्नं ज्ञातुमिच्छन्नाह कथं सयुग्वा रैक्व इत्युवाच वचनं स च क्ष-

३९

३९

ह्लादवचनमेवावोचत्तत्स्मरन्नुत्तानगरंग्रामंवागत्वान्विष्यरैक्वंनाविदंनव्यज्ञासिषमितिप्रत्येयायप्रत्यागतवांस्तंहोवाचक्ष
त्तारमरेयत्रब्राह्मणस्यब्रह्मविदएकान्तेरण्येनदीपुलिनादौविविक्तेदेशेन्वेषणानुमार्गणंभवतितत्रैनंरैक्वंमृच्छगच्छतत्रमा
र्गणंकुर्वित्यर्थः॥३॥ इत्युक्तः४ क्षत्तान्विष्यतंविजनेदेशेधस्ताच्छकटस्यगंत्र्यापामानंकषमाणंकण्डूयमानंदृष्ट्वायंसन्नंरैकइतितस
मीपउपोपविवेशविनयेनोपविष्टवांस्तंचरैक्वंहाभ्युवादाभ्युक्तवांस्त्वमसिहेभगवोभगवन्सयुग्वारैक्व इत्येवंपृष्टोहमस्मिहि
अराअरेइतिहानादरएवप्रतिजज्ञेभ्युपगतवान्सतंविज्ञायाविदंविज्ञातवानस्मीतिप्रत्येयायतत्रत्राषगार्हस्थ्यंप्रत्यभि
प्रायंबुद्ध्वाधनार्थितांचहउएवंजानश्रुतिःपौत्रायणः४षट्शतानिगवांनिष्कंकण्ठहारमश्वतरीरथमश्वतरीभ्यांयुक्तंरथंत
दादायधनंगृहीत्वाप्रतिचक्रमेरैक्वंप्रतिगतवांस्तंचगत्वाभ्युवादहाभ्युक्तवानहेरैक्वषट्शतानीमानिगवांतुभ्यंमयानीतानिअ
यंचनिष्कोश्वतरीरथश्चायमेतद्धनमादत्स्वभगवोनुशाधिचमांयांदेवतांत्वमुपास्सेएतद्देवतोपदेशेनमामनुशाधीत्यर्थः॥१॥रा
जानंप्रत्युवाच रेरैक्व अहेत्ययंनिपातोविनिग्रहार्थीयोन्यत्रहेत्वनर्थकएवशब्दस्यपृथक्प्रयोगात्हारेत्वाहारेणयुक्ताइत्वागं
त्रीसायंहारेत्वागोभिस्सहतवैवास्तुतवैवतिष्ठतुनममापर्याप्तंनकर्मार्थमनेनप्रयोजनमित्यभिप्रायः॥हेशूद्र इतिननुराजा
सोक्षत्तृसंबंधात्सहक्षत्तारमुवाचेत्युक्तंविद्याग्रहणायब्राह्मणसमीपोपगमाच्छूद्रस्यचानधिकारात्कथमिदमननुरूपंरैक्वे

छां०भा०

णोऽयं तेऽस्त्विह इति तत्राहाचार्यो हंसवचःश्रवणानुगेनं मा विवेरतेना सोऽश्वत्र्याक्षत्ता बाढं वदतीति त्वाषि रात्मनः परोक्षज्ञतां दर्श
यन्नाहेत्याहेति शूद्र एव बाधने नैनं विद्याग्रहणायोपजगाम न शुश्रूषया नतु जात्येति शूद्र इत्यपरे पुनराहुः स्वल्पधनमाहृतमिति रुषैवे
न शूद्रेत्याह इति लिंगं च बहूपहरणमुपादानं धनस्येति तदु ह धर्मितं ज्ञात्वा पुनरेव जानश्रुतिः पौत्रायणो गवां सहस्रमधिकं जा
यां चाभिमतां दुहितरमात्मनस्तदादाय प्रतिचक्रमे क्रान्तवान् रैक्वं इदं सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जायार्थं जायामस्मदुहि
तरं च ग्रामो यस्मिन्नास्से तिष्ठसि स च त्वदर्थं मया कल्पितस्तदेतत्सर्वमादायानुशाध्येव मा मा हि भगवन्निति तस्य ह जायार्थमानीतां ४०
या राज्ञो दुहितुर्मुखमेव मुखं द्वारं विद्याया दानतीर्थमुपोद्गृह्णन् जानन्नित्यर्थः ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियो विद्याया वा
विद्यां यः प्राह तानि तीर्थानि षण्मम इति विद्यायावचनं विज्ञायते ह्येवं जानन्नुपोद्गृह्णन्नुवाचोक्तवान् आजहाराहृतवान् भगवान्यदिमा गा
वोयच्चान्यद्धनं तत्साध्विति वाक्यशेषः शूद्रेति पूर्वोक्तानुक्तिमात्रं न तु कारणान्तरापेक्षया पूर्ववदनेनैव मुखेन विद्याग्रहणतीर्थेनाला
पयिष्यथा आलापयसि मां भाणयसीत्यर्थः ते हैते ग्रामा रैक्वपर्णा नाम विख्याता महावृषेषु देशेषु यत्र येषु ग्रामेषु वासो षितवान् रै
क्वस्तान् सोऽग्रामानदात्तस्मै रयिक्षाय राजा तस्मै स धनं दत्तवते ह किलोवाच विद्यां स रैक्वः वायुर्वाव संवर्गो वायुर्बाह्यो वावेत्यवधारणार्थः ।
संवर्गः संवर्जनात् संग्रहणात् संग्रसनात् संवर्गो वक्ष्यमाणा अग्न्याद्या देवता आत्मभावमापादयतीत्यतः संवर्गः संवर्जनाख्यो गुणो ध्येयो

४०

॥ वायुवत्कृतायान्तर्गविद्दृष्टान्तात्कथं संवर्गत्वं वायोरित्याह यदा यस्मिन्काले वै अग्निरुद्वायत्युद्वासनं प्राप्नोत्युपशाम्यति तदा सोऽग्निर्वायु
मेवाप्येति वायुस्वाभाव्यमपिगच्छति तथा यदा सूर्योऽस्तमेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायुमेवाप्येति ननु कथं सूर्याचंद्रमसोः स्व
रूपावस्थितयोर्वायावपिगमनं नैष दोषः सूर्यास्तमनेऽदर्शनप्राप्तेर्वायुनिमित्तत्वाद्वायुना ह्यस्तं नीयते सूर्यश्चालनस्य वायुकार्य
त्वादथवा प्रलये सूर्याचंद्रमसोः स्वरूपभ्रंशे तेजोरूपयोर्वायावेवापिगमनं स्यात्तथा यदाऽऽप उच्छुष्यन्ति उच्छोषमापद्यन्ते तदा वा
युमेवापियन्ति वायुर्हि यस्मादेवैतानग्न्यादीन्महाबलान्संवृङ्क्ते ऽतो वायुः संवर्गगुण उपास्य इत्यर्थः इत्यधिदैवतं देवतासु संवर्गद
र्शनमुक्तमथानन्तरमध्यात्ममात्मनि संवर्गदर्शनमिदमुच्यते प्राणो मुख्यो वाव संवर्गः स पुरुषो यदा यस्मिन्काले स्वपिति प्राणमे
व वागप्येति वायुमिवाग्निः प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः प्राणो हि यस्मादेवैतान्वागादीन्सर्वान्संवृङ्क्त इति तौ वा एतौ द्वौ संवर्जन
गुणौ संवर्गौ वायुरेव देवेषु संवर्गः प्राणः प्राणेषु वागादिषु मुख्योऽथैतयोः स्तुत्यर्थमाख्यायिकारभ्यते ह इत्यैतिह्यार्थः शौनकं च शौ
नकस्यापत्यं कापेयं कपिगोत्रमभिप्रतारिणं च नामतः कक्षसेनस्यापत्यं काक्षसेनिं भोजनाय पविष्टौ परिविष्यमाणौ सूपकारैर्ब्रह्म
चारी ब्रह्मविच्छौंडो बिभिक्षे भिक्षितवान्ब्रह्मचारिणो ब्रह्मविन्मानितां बुद्ध्वा तं जिज्ञासमानौ उ ह तस्मै भिक्षां न ददतुर्न दत्तवन्तौ हैकिम
यं वक्ष्यतीति स होवाच ब्रह्मचारी महात्मनश्चतुर इति द्वितीयाबहुवचनमग्न्यादीन्वायुर्वागादीन्प्राणः कः सः प्रजापतिर्जगार ग्रसि

छां० भा० ४१

तवास्कः सो जागारेति प्रश्नमेके भुवनस्य भवन्त्यस्मिन्भूतानीति भुवनं भूरादिः सर्वो लोकस्तस्य गोपा गोपायिता रक्षिता गोप्तेत्यर्थः तं कं
प्रजापतिं हे कापेय नाभिपश्यन्ति न जानन्ति मर्त्या मरणधर्माणो विवेकिनो वा हे अभिप्रतारिन्बहुधाध्यात्माधिदेवताधिभूतप्रकारैर्व
सन्तं यस्मै वा एतदहरहन्यहन्यन्नमदनाय ह्रियते संस्क्रियते चैव तस्मै प्रजापतय एतदन्नं न दत्तमिति तदु ह ब्रह्मचारिणो वचनं शौनकः का
पेयः प्रतिमन्वानो मनसालोकयन्ब्रह्मचारिणं प्रत्युवाचाजगाम गत्वा चाह यं त्वमवोचो न पश्यन्ति मर्त्या इति तं वयं पश्यामः कथम
त्मा सस्य सर्वस्य स्थावरस्य जंगमस्य च किं च देवानामग्न्यादीनात्मनि संहृत्य ग्रसित्वा पुनर्जनिता उत्पादयिता वायुरूपेणाधिदेवमध्या
त्मं च प्राणरूपेण वागादीनां प्रजानां च जनिता अथवा आत्मा देवानामग्निवागादिदेवानां जनिता प्रजानां स्थावरजंगमानां हिरण्यदंष्ट्रो
ऽमृतदंष्ट्रोऽभग्नदंष्ट्र इति यावत् बभसो भक्षणशीलो नसूरिर्मेधावी नसूरिस्तत्प्रतिषेधोऽनसूरिः सूरिरेवेत्यर्थः महान्तमतिप्रमाणमप्र
मेयमस्य प्रजापतेर्महिमानं विभूतिमाहुर्ब्रह्मविदो यस्मात्स्वयमन्यैरनद्यमानोऽनद्यमानोऽभक्ष्यमाणो यदन्नमग्निवागादिदेवता
रूपमत्ति भक्षयतीति वै इति निरर्थको वयं हि हे ब्रह्मचारिन् आ इदमेवं यथोक्तलक्षणं ब्रह्म वयं आ उपास्महे वयमिति व्यवहितेन
संबन्धोऽन्ये न वयमिदमुपास्महे किं तर्हि परमेव ब्रह्मोपास्महे इति वर्णयन्ति दत्तास्मै भिक्षामित्युवाच भृत्यं तस्मै उ ह ददुस्ते हि भिक्षां ते
वै ये ग्रस्यन्तेऽग्न्यादयो यश्च तेषां ग्रसिता वायुः पञ्चान्ये वागादिभ्यश्च तथान्ये ते पञ्च अध्यात्मं वागादयः प्राणश्च ते सर्वे दश भवन्ति स

४१

कोन्य

ख्ययादशासन्त स्त कृतं भवति ते वा एकं कृ एक आयएवं चत्वारश्च कायवत्त्रयो परे द्वौ कायवद्वावन्यावेकांकायवत् इत्येवं दशा
न्त स्तत्कृतं भवति यत एवं तस्मात्सर्वासु दिक्षु दशस्व प यन्याद्या वागाद्याश्च दशसंख्या सामान्यादन्नमेव दशाक्षरा विराडन्नमि
ति हि श्रुतिः। ततोऽन्नमेव दशसंख्यात्वात् तत एव दशाकृते कृतेन्तर्भावाच्चतुरायत्वेनेत्यवोचाम सैषा विराड्दशसंख्या सत्यन्नं चान्ना
दिनी च कृतत्वेन कृते हि दशसंख्या विद्यते तत्र्‍ ताऽतोन्नमन्नादिनी च तत सा तथा विद्वान्दशदेवतात्मभूतः सन्विराट्त्वेन द
शसंख्यायान्नं दशसंख्ययान्नान्नादीत्वेन च मिदं सर्वं जगद्दशादि कृत्स्नं दृष्टं कृतसंख्यायां भूततयोपलब्धमेवं विदोऽस्य सर्वं कृतसं
ख्याभूतस्य दशादिकसंबंधदृष्टमुपलब्धं भवति किं चान्नादश्च भवति य एवं वेद यथोक्तदर्शी द्विरभ्यास उपासनसमाप्त्यर्थः ॥४॥
सर्वं वागाद्यग्न्यादि चान्नान्नादत्वसंस्तुतं जगदेकीकृत्य षोडशधा प्रविभज्य तस्मिन्ब्रह्मदृष्टिर्विधातव्येत्यारभ्यते श्रद्धातप
सोर्ब्रह्मोपासनांगत्वदर्शनार्थाख्यायिका सत्यकामो ह नाम तह शब्द ऐतिह्यार्थः ॥ जाबालाया अपत्यं जाबलो जबालां स्वां
मातरमामंत्रयांचक्र इति आमंत्रितवान् ब्रह्मचर्यं स्वाध्यायग्रहणाय हे भवति विवत्स्याम्याचार्यकुले किंगोत्रोऽहं किमस्यामे
मगोत्रं सोऽहं किंगोत्रो न्वहमस्मीति एवं पृष्टा जबाला सा हैनं पुत्रमुवाच नाहमेतत्तव गोत्रं वेद हे तात यद्गोत्रस्त्वमसि कस्मान्न वे
त्सीत्युक्ता आह बह्वहं चरंती गृहे परिचर्याजातमतिथ्यभ्यागतादि चरंत्यहं परिचरंती तेन परिचरणचित्ततया गोत्रादिस्मरणे मम

छां०भा०

४२

मनोनात्र यौवने चंत कालेत्वामलब्धवत्यस्मि तदैवते पितोपरतो नाथाहं साहमेतन्न वेद यद्गोत्रस्त्वमस्मि जबाला तु नामाहम
स्मि सत्यकामो नाम त्वमसि स सत्यकाम एव हं जाबालोस्मीत्याचार्याय ब्रुवीथाः यदाचार्येण पृष्ट इत्यभिप्रायः स ह सत्यकामो हा
रिद्रुमतं हारिद्रुमतोपत्यं हारिद्रुमतं गौतमं गोत्रत एत्य गत्वोवाच ब्रह्मचर्यं भगवति ज्ञावति वियवत्स्याम्यत उपेयामुपगच्छेयं शिष्य
तया भगवन्तमित्युक्तवन्तं होवाच गौतमः किंगोत्रो नु सोम्यासीति विज्ञातकुलगोत्रः शिष्य उपनेतव्य इति पृष्टः प्रत्याह सत्यकामः
स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्मि किं त्वपृच्छं पृष्टवानस्मि मातरं सा पृष्टा मां प्रत्यब्रवीन्माता बह्वहं चरन्तीत्यादि पूर्ववत्
साहं वचः स्मरामि सोहं सत्यकामो जाबालोस्मि भो इति तं होवाच गौतमो नैतद्वचोऽब्राह्मणो विशेषेण वक्तुमर्हत्यार्जवार्थसंयु
क्तमृजवो हि ब्राह्मणा नेतरे स्वभावतो यस्मान्न ब्राह्मणजातिधर्मादगा नापगतवानस्यतो ब्राह्मणं त्वामुपनेष्ये ततः संस्कारार्थं होमा
य समिधं सोम्याहरेत्युक्त्वा तमुपनीय कृशानामबलानां गवां [illegible] निराकृत्यापकृष्य चतुःशता चत्वारि शतानि गवामुवाचेमा गा
स्सोम्यानुसंव्रजानुगच्छेत्युक्तस्ता अरण्यं प्रत्याभिरुच्छापयन्नुवाच नासहस्रेणापूर्णेन नावर्तेयं न प्रत्यागच्छेयमेवमुक्त्वा गा अरण्यं
तृणोदकबहुलं द्वन्द्वरहितं प्रावेश्य स ह वर्षगणं दीर्घं प्रोवास प्रोषितवान्नाम [illegible] ता यदा यस्मिन्काले सहस्रं संपेदुस्संपन्ना
बभूवुस्तमेनं श्रद्धातपोभ्यां सिद्धं वायुर्देवता दिक्संबन्धिनी तुष्टा सत्यर्षभमनुप्रविश्यर्षभापन्ना उपहायाथ हैनमृषभोऽभ्युवादाभ्य

४२

क्त्वा सत्यकाम३ इति भो भगव इति प्रतिशुश्राव प्रतिवचनं दत्तवानित्यर्थः। प्राप्ताः सोम्य सहस्रं स्मः पूर्णा तव प्रतिज्ञा। तः प्रापय नोऽस्मा
नाचार्यकुलं किं चाहं ब्रह्मणः परस्य ते तुभ्यं पादं ब्रवाणि कथयामीत्युक्तः। प्रत्युवाच ब्रवीतु कथयतु मे मह्यं भगवानित्युक्तः ऋषभ
स्तस्मै सत्यकामायोवाच प्राची दिक्कला ब्रह्मणः पादस्य चतुर्थो भागस्तथा प्रतीची दिक्कला तथा दक्षिणा दिक्कलोदीची दिक्कलेष वै सोम्य
ब्रह्मणः पादश्चतुष्कलश्चतस्रः कला अवयवा यस्य पादस्य सोऽयं चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम प्रकाशवानित्येवं नामाभिधानम
स्य तथोत्तरेऽपि पादाश्चतुष्कला ब्रह्मणस्स यः कश्चिदेवं यथोक्तमेतं ब्रह्मणश्चतुष्कलं पादं विद्वान्प्रकाशवानित्यनेन गुणेन विशिष्टमुपा
स्ते तस्येदं फलं प्रकाशवानस्मिँल्लोके भवति प्रख्यातो भवतीत्यर्थः। तथादृष्टं प्रकाशवतो ह लोकान्देवादिसंबंधिनो मृतस्सञ्जयति प्राप्नो
ति य एतमेवं विद्वांश्चतुष्कलं पादं पादं ब्रह्मणः प्रकाशवानित्युपास्ते सोऽग्निष्टे पादं वक्तेत्युपरराम ऋषभः स सत्यकामो ह श्वोभूते परेद्युर्नै
त्यकं कृत्वा गा अभिप्रस्थापयांचकाराचार्यकुलं प्रति ताः शनैश्चरन्त्य आचार्यकुलाभिमुख्यः प्रस्थिता यत्र यस्मिन्काले देशे अभिसायं
निशायां बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङ्मुख उपविवेश स ऋषभवचो ध्यायंस्तमग्निर
भ्युवाद सत्यकाम३ इति संबोध्य तमसौ सत्यकामो भगव इति ह प्रतिशुश्राव प्रतिवचनं ददौ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्र
वीतु मे भगवानिति तस्मै होवाच पृथिवी कला अन्तरिक्षं कला द्यौः कला समुद्रः कला। त्वा अभगोचरमेव दर्शनमग्निरब्रवीदेष वै सोम्य

छां॰ भा॰

चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम स य कश्चिद्यथोक्तं पादमनन्तवत्त्वेन गुणेनोपास्ते स तथैव तद्गुणो भवति अस्मिंल्लोके मृतश्चा-
नन्तवतो ह लोकाञ्जयति य एतमेवमित्यादि पूर्ववत् ॥ सोऽग्निर्हंसस्ते पादं वक्तेत्युक्त्वोपरराम हंस आदित्यः शौक्ल्यात्पतनसामान्याच्च
स ह श्वो भूत इत्यादि समानम् ॥ अग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कलेत्येषु वै सौम्येति ज्योतिर्विषयमेव च दर्शनं प्रोवाचातो हंस-
स्यादित्यत्वं प्रतीयते विद्वत्फलं ज्योतिष्मान्दीप्तियुक्तोऽस्मिंल्लोके भवति चन्द्रादित्यादीनां ज्योतिष्मत एव च भूत्वा लोकाञ्जयति समान-
मुत्तरम् ॥ हंसोऽपि मद्गुष्टे पादं वक्तेत्युक्त्वोपरराम मद्गुरुदकचरः पक्षी स चाप्सम्बन्धात्प्राणः स ह श्वो भूत इत्यादि पूर्ववत् ॥ स च मद्गुः प्रा-
णः स्वविषयमेव च दर्शनमुवाच प्राणः कलेत्याद्यायतनवानित्येव नामायतनं मनः सर्वकरणोपहृतानां भोगानां तद्यस्मिन्नित्यादि वि-
द्यत इत्यायतनवान्नाम पादस्तं पादं तथैवोपास्ते यः स आयतनवानाश्रयवानस्मिंल्लोके भवति तथायतनवत एव सा-
वकाशांल्लोकान्मृतो जयति य एतमेवमित्यादि पूर्ववत् ॥ स एवं ब्रह्मवित्सन्प्राप ह प्राप्तवानाचार्यकुलं तमाचार्योऽभ्युवाद सत्यकाम ३ इ-
ति भगव इति ह प्रतिशुश्राव ब्रह्मविदिव वै सोम्य भासि प्रसन्नेन्द्रियः प्रहसितवदनश्च निश्चिन्तः कृतार्थो ब्रह्मविद्भवत्यत आचार्य आह ब्र-
ह्मविदिव भासीति को न्वित्ति वितर्कयन्ननुवाच कस्त्वामनुशशासेति स चाह सत्यकामोऽन्ये मनुष्येभ्यो देवा मामनुशिष्टवन्तः को न्वो
भगवच्छिष्यं मां मनुष्यः सन्ननुशासितुमुत्सहेतेत्यभिप्रायः अतो मनुष्येभ्य इतीह प्रतिजज्ञे प्रतिज्ञातवान् भगवांस्त्वेव मे कामे ममेच्छा

४३

यां ब्रूयात्किमन्ये रुक्ते न रुक्तेन नाहं तज्ज्ञणयामीत्यानिप्रायः॥ किं च श्रुतं हि यस्मान्मम विद्यत एवास्मिन्नर्थे भगवद्दृशेभ्यो भगवत्सदृ
मेभ्य ऋषिभ्य आचार्याद्धैव विद्या विदिता साधिष्ठं साधुतमत्वं प्राप्नोत्यतः प्रदिति प्राप्नोत्यतो भगवानेव ब्रूयादित्युक्त आचार्योब्रवी
त्तस्मै तमेव दैवतैरुक्तां विद्यामत्र न किं चन षोडशकलविद्यायाः॥ किं चिदेकदेशमात्रमपि न वीयाय नेविगतमित्यर्थः॥ द्विरभ्या
सो विद्यापरिसमाप्त्यर्थः॥ पुनर्ब्रह्मविद्यां प्रकारान्तरेण वक्ष्यामीत्यारभ्यते गतिं च तद्विदोग्निविद्यां चाख्यायिकापूर्वं वक्ता। श्रद्धात
पसोर्ब्रह्मविद्यासाधनत्वप्रदर्शनार्था। उपकोशलो ह वै नाम तः कमलस्यापत्यं कामलायनः सत्यकामे जाबाले ब्रह्मचर्य
मुवास तस्य हाचार्यस्य द्वादशवर्षाण्यग्नीन्परिचचाराग्नीनां परिचरणं कृतवान्स ह स्माचार्योन्यान्ब्रह्मचारिणः स्वाध्यायं ग्राहयि
त्वा समावर्त्तयंस्तमेवोपकोशलमेकं न समावर्त्तयति स्म ह तमाचार्यं जायोवाच तप्तो ब्रह्मचारी कुशलं सम्यगग्नीन्परिचचारीत्
परिचरितवान्स भगवांश्चाग्निषु भक्तं न समावर्त्तयत्यतोस्मद्भक्तं न समावर्त्तयतीति त्वा वाग्नयो मा परिप्रवोचन्गर्हां तव मा कुर्युर
तः प्रब्रूह्यस्मै विद्यामिष्टामुपकोशलायेति तस्मा एवं जायया को हाप्रोच्यैवानुक्त्वैव किं चित्प्रवासां चक्रे प्रवसितवान्स होपकोश
लो व्याधिना मानसेन दुःखेनानशितुमनशनं कर्त्तुं दध्रे कृतवान्मनस्तं ह स्मीमन्यागारेवस्थितमाचार्यजायोवाच हे ब्रह्मचारिन्न शान
त्तुं न्न किं तु कस्मात्कारणान्नाश्नासीति स होवाच बहवो नेकेस्मिन्पुरुषेऽकृतार्थे प्राकृते कामा इच्छाः कर्त्तव्यं प्रतिनोनात्ययोतिगमनं
च्या

छां॰ जा॰

४४

येषां व्याधीनां कर्त्तव्यमिति तानांतेनानात्यया व्याधयः कर्त्तव्यं प्रति प्राप्तिनिमित्तानि विचित्राणि दुःखानीत्यर्थः। तैः प्रतिपूर्णोस्म्यतो नाशि-
ष्यामीत्युक्तवत्यां तूष्णीं भूते ब्रह्मचारिण्यथ हाग्नयः शुश्रूषया वर्ज्जिताः कारुण्याविष्टाः सन्तस्त्रयोपि समूदिरे संभूयोक्तवन्तो हन्तेदानीम-
स्मै ब्रह्मचारिणे स्वभक्ताय दुःखिताय तपस्विने श्रद्दधानाय सर्वे तु प्रब्रवाम ब्रह्मविद्यामित्येवं संप्रधार्य ते तस्मै होचुरुक्तव-
न्तः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति स होवाच ब्रह्मचारी विजानाम्यहं यद्भवद्भिरुक्तं प्रसिद्धपदार्थकत्वाद्विजानाम्यहं प्राणो ब्रह्मेति
यस्मिन्सति जीवनं तदपगमे च न भवति तस्मिन्वायुविशेषे लोके रूढो ऽतो युक्तं ब्रह्मत्वं तस्य तेन प्रसिद्धपदार्थत्वाद्विजानाम्यहं
यत्प्राणो ब्रह्मेति कं च तु खं च न विजानामीति ननु कंखंशब्दयोरपि सुखाकाशविषयत्वेन प्रसिद्धपदार्थकत्वमेव कस्माद्ब्रह्मचा-
रिणोऽज्ञातं ननु सुखस्य कंशब्दवाच्यस्य क्षणप्रध्वंसित्वात् खंशब्दवाच्यस्य चाकाशस्याचेतनस्य कथं ब्रह्मत्वमिति मन्यते भगव-
तां वाक्यमप्रमाणं स्यादित्यतो विजानामीत्याह तमेवमुक्तवन्तं ब्रह्मचारिणं ते होचुरग्नयः यद्वाव यदेव वयं कमवोचाम तदेव खम-
काशमित्येवं खेन विशेष्यमाणं कं विषयेन्द्रियसंयोगजात्सुखान्निवर्तितं स्यान्नीलेनेव विशेष्यमाणमुत्पलं रक्तादिभ्यो यदेव ख-
मित्याकाशमवोचाम तदेव च कं सुखमिति जानीह्येवं च सुखेन विशेष्यमाणं खं भौतिकादचेतनात्खान्निवर्त्तितं स्यान्नीलोत्पल-
वदेव सुखमाकाशस्थं न तु लौकिकमाकाशं च सुखाश्रयं नेतराद्भौतिकमित्यर्थः ननु चाकाशं चेत्सुखेन विशेषयितुमिष्टं मस्त्वन्य-

४४

कथैव

तरदेव विशेषणं यद्भावकं तदेव खमित्यतिरिक्तमितरद्यदेव खं तदेव कमिति पूर्वविशेषणं वा ननु सुखाकाशयोरुक्तयोरपि लौ
किकसुखाकाशाभ्यां व्यावृत्तिरिष्टैवेत्यवोचाम सुखेनाकाशो विशेषितो व्यावृत्तिरुक्तयोरर्थप्राप्तैवेति चेत्सत्यमेवं किंतु सुखेन विशे
षितस्यैवाकाशस्य ध्येयत्वं विहितं न त्वाकाशगुणस्य विशेषणस्य सुखस्य ध्येयत्वं विहितं स्याद्विशेषणोपादानस्य विशेष्य
नियंतृत्वेनैवोपक्षयात् अतः खेन सुखमपि विशेष्यते ध्येयत्वाय कुतश्चैतन्निश्चीयते कशब्दस्यापि ब्रह्मशब्दसंबंधात्कं ब्रह्मेति
यदि हि सुखगुणविशिष्टस्य खस्य ध्येयत्वमभिविवक्षितं स्यात्कं खं ब्रह्मेति ब्रूयुरग्नयः प्रथमं न चैवमुक्तवंतः किं तर्हि कं ब्रह्म खं ब्र
ह्मेत्यतो ब्रह्मचारिणो मोहापनयनाय कंखंशब्दयोरितरेतरविशेषणविशेष्यत्वनिर्देशो युक्त एव यद्भावकमित्यादिस्तदेतदग्निभि
रुक्तं वाक्यार्थमस्मद्वाबोधाय श्रुतिराह प्राणं हास्मै ब्रह्मचारिणे तस्य आकाशं तदाकाशः प्राणस्य संबंधाश्रयत्वेन हार्दाकाश इत्य
र्थः सुखगुणवत्त्वनिर्देशात् तच्चाकाशं सुखगुणविशिष्टं ब्रह्म तत्स्थं प्राणं ब्रह्मसंपर्कादेव ब्रह्मेत्युक्तवंतः प्राणं चाकाशं च समुच्चि
त्य ब्रह्मणी ऊचुरग्नय इति संहत्याग्नयो ब्रह्मचारिणे ब्रह्मोक्तवंतोऽथानंतरं प्रत्येकं स्वविषयां विद्यां वक्तुमारेभिरे अथ हैनं ब्रह्मचा
रिणं गार्हपत्योऽग्निरनुशशास पृथिव्यग्निरन्नमादित्य इति मम एतास्तनवः तनवस्त्रय आदित्य एष पुरुषो दृश्यते सोऽहमस्मि गा
र्हपत्याग्निः यश्च गार्हपत्योऽग्निः स एवाहमादित्ये पुरुषोऽस्मीति पुनः परावृत्त्य स एवाहमस्मीति वचनं पृथिव्यन्नयोरिव भोज्यत्वलक्ष

छां०भा०

णयोस्संबंधोनगार्हपत्यादित्ययोरत्तृत्वपक्तृत्वप्रकाशकत्वधर्मा अविशिष्टा इत्यत एकत्वमेवानयोरत्यन्तं पृथिव्यन्नयोस्तु भोज्य
त्वेनावाय्योस्संबंधः। यः कश्चिदेतं यथोक्तं गार्हपत्यमग्निमन्नान्नादत्वेन चतुर्द्धा प्रविभक्तमुपास्ते सोऽपहते विनाशयति पापकृत्यां
पापकर्म लोकी लोकवांश्चास्मदीयेन लोकेनाग्नेयेन तद्वान्भवति यथावयमिह च लोके सर्वं वर्षशतमायुरेति प्राप्नोति ज्योगुज्वलं
जीवति नाप्रख्यातः इत्येतन्नास्यावराश्च ते पुरुषाश्चास्य विदुषः सन्ततिजा इत्यर्थः। क्षीयन्ते सन्तत्युच्छेदो न भवतीत्यर्थः। किं च तं वयमु
पभुंजामः पालयामोऽस्मिंश्च लोके जीवन्तममुष्मिंश्च परलोके य एतमेवं विद्वानुपास्ते यथोक्तं तस्यैतत्फलमित्यर्थः। अथ हैनमन्वाहा

४५

र्यपचनोऽनुशशास दक्षिणाग्निरापो दिशो नक्षत्राणि चन्द्रमा इत्येता मे मम च तनवस्तनवश्चतुर्द्धाहमन्वाहार्यपचन आत्मानं प्रविभज्याव
स्थितस्तत्र य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति पूर्ववदन्नसंबंधाज्ज्योतिष्ट्वसामान्याच्चान्वाहार्यपचनचन्द्रमसोरे
कत्वं दक्षिणादिक्संबंधादपां नक्षत्राणां च पूर्ववदन्नत्वेनैव संबंधो नक्षत्राणां च चन्द्रमसो भोग्यत्वप्रसिद्धे रपामन्नोत्पादकत्वादन्नत्वं
दक्षिणाग्नेः पृथिवीवद्गार्हपत्यस्य समानमन्यत्। अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति ममाप्येताश्चतस्रस्त
नवो य एष विद्युति पुरुषो दृश्यते सोऽहमस्मीत्यादि पूर्ववत्सामान्याद्दिवाकाशयोस्त्वाश्रयविषयत्वाद्विद्युदाहवनीययोर्भोग्यत्वेनैव
संबंधः। समानमन्यत्। ते पुनस्समूयोचुर्हे उपकोशल एष सोम्य ते तवास्मद्विद्याग्निविद्येत्यर्थः। आत्मविद्या पूर्वोक्ता प्राणो ब्रह्म कं ब्रह्म

४५

खंब्रह्मेतिवाचार्यस्तुतआत्मगतिंवक्ताविद्याफलप्राप्तयइत्युक्त्वोपरेमुरग्नयआजगामहास्याचार्यःकालेनतंचशिष्यमाचार्योऽभ्युवा
दोपकोसलाइतिभगवइतिहप्रतिशुश्रावब्रह्मविदइवसोम्यतेमुखंप्रसन्नंभातिकोनुत्वानुशशासेत्युक्तःप्रत्याहकोनुमानुशिष्या
दनुशासनंकुर्याद्भोभगवंस्त्वयिप्रोषितइतिहापवनिह्नुतेपनिह्नुतइवेतिव्यवहितेनसंबंधः।नचापनिह्नुतेनचयथावदग्नि
भिरुक्तंब्रवीत्यभिप्रायः।कथमिमेऽग्नयोमयापरिचरिताउक्तवन्तोनूनंयतस्त्वांदृष्ट्वावेपमानाइवेदृशादृश्यन्तेपूर्वमन्यादृशाःसन्तइ
तिइहाग्नीनभ्यूदेइत्युक्तवानुक्वाग्नीन्दर्शयन्किंनुसोम्यकिलतेतुभ्यमवोचन्नग्नयइतिपृष्टइतिएवमिदमुक्तवन्तइत्येवंहप्रतिजज्ञेप
तिज्ञातवान्प्रतीकमात्रंकिंचिकिंचिन्नसर्वंयथोक्तमग्निभिरुक्तमवोचन्।आचार्योलोकान्वावपृथिव्यादीन्हेसोम्यकिलतोवाचन्
ब्रह्मसाकल्येनाहंतेतुभ्यंतद्ब्रह्मयदिच्छसित्वंश्रोतुंतद्वक्ष्यामीशृणुतस्यमयोच्यमानस्यब्रह्मणोज्ञानमाहात्म्यंयथापुष्करपल
शेपद्मपत्रेआपोनश्लिष्यन्तेएवंयथावक्ष्यामिब्रह्मैवंविदिपापंकर्मनश्लिष्यतेनसंबध्यतइत्येवमुक्तवत्याचार्यआहोपकोसलोब्र
वीतुमेभगवानितितस्मैसहोवाचाचार्योयएषोऽक्षिणिपुरुषोदृश्यतेनिवृत्तचक्षुर्भिर्ब्रह्मचर्यादिसाधनसंपन्नैःशान्तैर्विवेकिभि
र्दृष्टाचक्षुषश्चक्षुरितिहिश्रुत्यन्तरान्नन्वग्निभिरुक्तंवितथंयतआचार्यस्तेगतिंवक्तेतिगतिमात्रस्यवक्तेत्यवोचन्नविद्याद्विषयाप
रिज्ञानंचाग्नीनांनैषदोषःसुखाकाशस्यैवाक्षिणिदृश्यतइतिद्रष्टुरनुवादादेषआत्माप्राणिनामितिहोवाचैवमुक्तेनतद्यदेवा

छां०ना०

८

४ अयंग्रंथोग्रिमपत्रेनंकष्टेनवत्सपंक्तौ द्रष्टव्यः

मतत्त्वमवोचाम्येतदमृतमभयमरणधर्म्यविनाशमतएवातदभयंयस्यहिविनाशाशंकातस्याभयोपपत्तिस्तदभावादभयमतएवैतद्ब्रह्म
बृहदनन्तमितिकिंवास्यब्रह्मणोऽक्षिपुरुषस्यमाहात्म्यंतत्रपुरुषस्यस्थानेऽक्षिणियद्यपिसर्पिर्वोदकंवासिंचंतिवर्त्मनीएवग
च्छमावेवगच्छतिनचक्षुषासंबध्यतेपद्मपत्रेणेवोदकंस्थानस्याप्येतन्माहात्म्यंकिंपुनःस्थानिनोऽक्षिपुरुषस्यनिरंजनत्वंवक्तव्य
मित्यभिप्रायः।एतंयथोक्तंपुरुषंसंयद्वाममित्याचक्षतेकस्माद्यस्मादेतंसर्वाणिवासंवत्सरंसंवत्सरदेवतान्तःसंवत्सरादादित्यमा
दित्याच्चन्द्रमसंचन्द्रमसोविद्युतंतत्रस्थांस्तान्पुरुषःकश्चिद्ब्रह्मलोकादेत्यमानवःस्रष्टोऽमानवोनमानवोमानवःसपुरुषए
तान्ब्रह्मसत्यलोकस्थंगमयतिगन्तृगन्तव्यगमयितृत्वव्यपदेशेभ्यःसन्मात्रब्रह्मप्राप्तौतदनुपपत्तेर्ब्रह्मैवसन्ब्रह्माप्येतीतिहितत्रव
क्तुंन्याय्यंसर्वभेदनिरासेनसन्मात्रप्रतिपत्तिंवक्ष्यतिनह्यदृष्टोमार्गोगमनायोपतिष्ठतेसएनमविदितोनभुनक्तीतिश्रुत्यन्तरा
देषदेवपथोदेवैरर्चिरादिभिर्गमयितृत्वेनाधिकृतैरुपलक्षितःपन्थादेवपथउच्यतेब्रह्मगंतव्यंतेनचोपलक्षितइतिब्रह्मपथ
एतेनप्रतिपद्यमानाःमानिवननीयानिसंभजनीयानिशोभनान्यभिसंयन्तिअभिगच्छन्त्यतःसंयद्वामेतितथैवंविदमेनंसर्वाणिवा
मान्यभिसंयन्तियएवंवेदएषउएववामनीर्यस्मादेषहिसर्वाणिवामानिपुण्यकर्मफलानिपुण्यानुरूपंप्राणिभ्योनयतिप्रापय
तिवहतिचात्मधर्मत्वेनविदुषःफलंसर्वाणिवामानिनयतियएवंवेदएषउएवभामनीरेषहियस्मात्सर्वेषुलोकेष्वादित्यचंद्राग्न्या

॥

४६

४६=

दिरूपैर्ज्वलतिदीप्यतेतस्यभासासर्वमिदंविभातीति।अतेरतोभामानिनयतीतिभामनीर्यएवंवेदासावपिसर्वेषुलोकेषुभातिअथैदा
नीयथोक्तब्रह्मविदोगतिरुच्यतेसयद्यदिउचएवास्मिन्नेवंविदिशाव्यंशावकर्ममृतेकुर्वन्तियदुचनकुर्वन्त्यहिजःसर्वथाप्येवंवित्तेन
शावकर्मणाकृतेनापि।प्रतिबद्धोनब्रह्मप्राप्नोतिनचकृतेनशावकर्मणास्यकश्चनाभ्यधिकोलोकोनकर्मणोवर्द्धतेनोकनीयानितिश्रु
त्यन्तराच्छावकर्मण्यनादरंदर्शयन्विद्यांस्तौतिनपुनःशावकर्मैवंविदोनकर्तव्यमित्यक्रियमाणेपिशावकर्मणिकर्मणांफलारंभेप्रति
बंधःकश्चिदनुमीयतेन्यत्रयत्रविद्याफलारंभकालेशावकर्मस्याद्वानवेतिविद्यावतोप्रतिबंधेनफलारंभंदर्शयतियेसुखाका
रामादिरुक्तंसयद्वामनीर्भामनीरित्येवंगुणमुपासतेप्राणसहितमग्निविद्यांचतेषामन्यत्कर्मभवतुवामावाउभयथापितेर्चिष
मेवाभिसंभवन्त्यर्चिरभिमानिनींदेवतामभिसंभवंतिप्रतिपद्यंतइत्यर्थः।अर्चिषोर्चिर्देवतायाअहरहरभिमानिनींदेवताम
ह्नआपूर्यमाणपक्षंशुक्लपक्षदेवतामापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङुत्तरादिक्मेतिसवितातान्मासानुत्तरायणदेवतांतेभ्यो
मासेभ्यः××नौगच्छन्तोब्रह्मइमंमानवंमनुसंबंधिनंमनोःसृष्टिलक्षणमावर्तंनावर्तन्तेअस्मिन्जननमरणप्रबंधचक्रारूढाःपुनःपुनः
घटीयंत्रारूढावत्पुनःपुनरित्यावर्तस्तमावर्तंनप्रतिपद्यन्तेनावर्तन्तइतिद्विरुक्तिःसफलायाविद्यायाःपरिसमाप्तिदर्शनार्था।
रहस्यप्रकरणप्रसंगादारण्यकत्वसामान्याच्चयज्ञक्षतउत्पन्नेव्याहृतयःप्रायश्चित्तार्थाविधातव्यातदभिज्ञस्यचर्त्विजोब्रह्म

मासेभ्य इत्येतदनंतरं संवत्सरमित्यादि प्रतिपद्यमानमित्यंतं ग्रंथः पूर्वपत्रे प्रांत्या लिखितोस्ति सोत्र ज्ञातव्यः।

छां०उ०

णो मौनेन मिल्यत इत्यत इदमारभ्यते एष ह वै एष वायुर्यो यं पवते यं यज्ञो ह वै इति प्रसिद्धावद्योतकौ निपातौ वायुप्रतिष्ठो हि यज्ञः
प्रसिद्धः श्रुतिषु स्वाहा वाते धा यं वै यज्ञो यो यं पवत इत्यादिश्रुतिभ्यो वात एव हि चलनात्मकत्वात् क्रियायाः समवायी वात एव
यज्ञस्यारंजको वातः प्रतिष्ठेति च श्रवणात् एष ह यन्गच्छन्निदं सर्वं जगत्पुनाति पावयति शोधयति न ह्यचलतः शुद्धिरस्ति
दोषनिरसनं चलतो हि दृष्टं नास्थिरस्य यद्यस्माद्यन्नेष इदं सर्वं पुनाति तस्मादेष एव यज्ञो यत्पुनातीति तस्यास्यैवं विशिष्ट
स्य यज्ञस्य वाक्च मंत्रोच्चारणे व्यापृता मनश्च यथाभूतार्थज्ञाने व्यापृतं ते एते वाङ्मनसी वर्त्तनी मार्गौ याभ्यां वर्त्तनीभ्यां यज्ञस्ता
यमानः प्रवर्त्तते ते च वर्त्तनी प्राणापानपरिचलनवत्या हि वाचश्चित्तस्य चोत्तरोत्तरक्रमो यद्यज्ञ इति हि श्रुत्यन्तरमतो वाङ्मन
साभ्यां यज्ञो वर्त्तत इति वाङ्मनसी वर्त्तनी उच्यते यज्ञस्य तयोर्वर्त्तन्योरन्यतरां वर्त्तनीं मनसा विवेकविज्ञानवता संस्करो
ति ब्रह्मर्त्विग्वाचा वर्त्तन्या होताध्वर्युरुद्गातेत्येते त्रयोऽप्यृत्विजोऽन्यतरां वाग्लक्षणां वर्त्तनीं वाचैव संस्कुर्वन्ति तत्रैवं सति वाङ्मन
सेवर्त्तनी संस्कार्ये यज्ञे अथ यत्र यस्मिन्काले उपाकृते प्रारब्धे प्रातरनुवाके शस्त्रे पुरा परिधानीयाया ऋचो ब्रह्मैतस्मि
न्नन्तरकाले व्यववदति मौनं परित्यजति यदि तदान्यतरामेव वाग्वर्त्तनीं संस्करोति संस्क्रियाया णा मनो वर्त्तनी हीयते विनश्यति छि
द्रीभवत्यथान्यतरा स यज्ञो वाग्वर्त्तन्यैवान्यतरया निवर्त्तयितुमशक्नुवन्रिष्यति कथमिवेत्याह स यथैकपात्पुरुषो व्रजन्गच्छन्

४७

४७

ध्यानं रिष्यति रथो वा एकेन चक्रेण वर्त्तमानो गच्छन् रिष्यति एवमस्य यजमानस्य कुब्रह्मर्त्विग्यज्ञो रिष्यति विनश्यतीयज्ञं रिष्य
न्तं यजमानोऽनुरिष्यति यज्ञस्य प्राणा यजमानो ऽतो युक्तो यज्ञे रिषन्तस्य स तं यज्ञमिष्ट्वा ततः पापीयान् पापतरो भवति अथ पुन
र्यत्र ब्रह्मा विद्वान् मौनं परिगृह्य वाग्विसर्गमकुर्वन् वर्त्तते यावत्परिधानीयाया न व्यववदति तथैव सर्व ऋत्विजस्त एव वर्त्तनी सं
स्कुर्वन्ति न हीयतेऽन्यतरापि किमिवेत्याह पूर्ववदुक्तविपरीतौ दृष्टान्तौ एवमस्य यज्ञः सुवर्त्तनीं स्वामेव वर्त्तमानः प्रतितिष्ठति स्वेना
त्मना विनश्यन् वर्त्तत इत्यर्थः यज्ञं प्रतितिष्ठन्तं यजमानोऽनुप्रतितिष्ठत्येवं मौनविज्ञानवद्ब्रह्मोपेतं ब्रह्मयज्ञमिष्ट्वा श्रेयान् भव

च६ तिश्रेष्ठो भवतीत्यर्थः अथ यद्ब्रह्मणो मौनं विहितं तद्भेषु यास्यामि ऽस्मिन्नग्निहोत्रादिकर्मरेषु व्याहृतिहोमप्रायश्चित्तमिति त
दर्थं व्याहृतयो विधातव्या इत्याह प्रजापतिर्लोकानभ्यतपल्लोकानुद्दिश्य तत्र सारजिघृक्षया ध्यानलक्षणं तपश्चचार तेषां तप्य

सा२ मानानां रसान् लोकानां रूपान्प्राबृहदुद्धृतवानुज्जग्राहेत्यर्थः कान्नग्निं रसं पृथिव्या वायुमन्तरिक्षादादित्यं दिवः स पुनरप्येवमेव भ(मास्ति)
स्त्रेयस्या यादेवता उद्दिश्याभ्यतपत्ततोपि सारं रसं त्रयीं विद्यां जग्राह स एतां पुनरभ्यतपत्त्रयीं विद्यां तस्यां तप्यमानायां रसं भूरि
ति व्याहृतिमृग्भ्यो जग्राह भुव इति व्याहृतिं यजुर्भ्यः स्वरिति व्याहृतिं सामभ्यः अतः एव लोकदेववेदरसा महाव्याहृतयोऽतस्तत्र
च यज्ञे यदृक्त ऋक्संबन्धादग्निनिमित्तं रिष्येद्यज्ञः क्षतं प्राप्नुयाद्भूः स्वाहेति गार्हपत्ये जुहुयात्सा तत्र प्रायश्चित्तिः कथं ऋचामेव तदि[illegible]

छा० क्रियाविशेषणं रसेन ऋचां वीर्येण ओजसा ऋचां यज्ञस्य ऋक्संबंधिनो यज्ञस्य विरिष्टं क्षतरूपमुत्पन्नं संदधाति प्रतिसंधत्ते अथ य
दि यजुष्टो यजुर्निमित्तं रिष्येत् तद्भुवः स्वाहेति दक्षिणाग्नौ जुहुयात्तथा सामनिमित्ते रेषे स्वः स्वाहेत्याहवनीये जुहुयात्तथा पूर्ववद्यज्ञं
संदधाति ब्रह्मनिमित्ते रेषे त्रिष्वग्निषु तिसृभिर्व्याहृतिभिर्जुहुयात्त्रय्या विद्यायाः संश्लेषो यत्केन ब्रह्मत्वमित्यन्यैवेति त्रय्या विद्य
येति श्रुतेर्न्यायात्तरेवामृग्यं ब्रह्मत्वनिमित्ते रेषे तद्यथा लवणेन सुवर्णं संध्यात्क्षारेण टंकणकादिना खरे कठिणं मृदुत्वकरं
हि तत्सुवर्णेन रजतमशक्यसंधानं संदध्याद्रजतेन त्रपु त्रपुणा सीसं सीसेन लोहं लोहेन दारु दारु चर्मणा च बंधनेनैवमे
षां लोकानामासां देवतानामस्यास्त्रय्या विद्याया वीर्येण रसाख्येनौजसा यज्ञस्य विरिष्टं संदधाति भेषजकृतो ह वा एष यज्ञो रोगा
र्त इव पुरुषश्चिकित्सकेन सुशिक्षितेनैष यज्ञो भवति कोऽसौ यत्र यस्मिन्यज्ञे एवंविद्यथोक्तव्याहृतिहोमप्रायश्चित्तविद्ब्रह्मर्त्विग्भव
ति स यज्ञ इत्यर्थः ॥ किं चैष ह वा उदक्प्रवण उदङ्निम्नो दक्षिणोच्छ्रयो यज्ञो भवति उत्तरमार्गप्रतिपत्तिहेतुरित्यर्थः ॥ यत्रैवंविद्ब्रह्मा भव
ति एवंविदं ह वै ब्रह्माणमृत्विजं प्रत्येषानुगाथा ब्रह्मस्तुतिपरा यतो यत आवर्तते कर्मप्रदेशादृत्विजां यज्ञः क्षतीभवंस्तत्तद्यज्ञस्य क्षतरू
पं प्रतीति संदधत्प्रायश्चित्तेन गच्छति परिपालयतीत्येतन्मानवो ब्रह्मा मौनाचरणान्मौनाद्वा ज्ञानवत्त्वादतो ब्रह्मैवैक ऋत्विक्कुरून्कर्तॄ
न्योद्धॄनारूढानश्वा वडवा यथाभिरक्षत्येवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्च ऋत्विजोऽभिरक्षति तत्कृतदोषापनयनाद्यत एवं विशिष्टो

८

४८

ब्रह्मा विद्वांस्तस्मादेवं विदमेव यथोक्तव्याहृत्यादिविदं ब्रह्माणं कुर्वीत नानेवंविदं कदाचनेति द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥ ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ
छांदोग्योपनिषद्विवरणे षष्ठः प्रपाठकः ॥ ॥ सगुणब्रह्मविद्याया उत्तरा गतिरुक्ता अथेदानीं पंचमेऽध्याये पंचाग्निविदो गृहस्थस्य
ऊर्ध्वरेतसां च श्रद्धालूनां विद्यांतरशीलिनां तामेव गतिमनूद्यान्या दक्षिणादिक्संबंधिनी केवलकर्मिणां धूमादिलक्षणा पुनरावृत्ति
रूपा तृतीया च ततः कष्टतरा संसारगतिर्वैराग्यहेतोर्वक्तव्येत्यारभ्यते। प्राणः श्रेष्ठो वागादिभ्यः प्राणो वाव संवर्गः प्राणो ब्रह्म प्राण आ
काद्या इत्यादि बहुशोऽतीते ग्रंथे प्राणग्रहणं कृतं स कथं श्रेष्ठो वागादिषु सर्वैः संहत्यकारित्वाविशेषे कथं च तस्योपासनमिति तस्य
श्रेष्ठतादिगुणविधित्सयेदमनंतरमारभ्यते यो ह वै कश्चिज्ज्येष्ठं प्रथमवयसं श्रेष्ठं च गुणैरभ्यधिकं वेद स ज्येष्ठश्च ह वै श्रेष्ठश्च
भवति फलेन पुरुषं प्रलोभ्याभिमुखीकृत्याह। प्राणो वाव ज्येष्ठश्च वयसा वागादिभ्यो गर्भस्थेऽपि पुरुषे प्राणस्य वृत्तिर्वागादिभ्यः
पूर्वं लब्धात्मिका भवति यया गर्भो विवर्द्धते चक्षुरादिस्थानावयवनिष्पत्तौ सत्यां पश्चाद्वागादीनां वृत्तिलाभ इति प्राणो ज्येष्ठो व
यसा भवति श्रेष्ठत्वं प्रतिपादयिष्यति सुहय इत्यादिनिदर्शनेनातः प्राण एव ज्येष्ठश्च श्रेष्ठश्चास्मिन्कार्यकरणसंघाते यो ह वै वसि
ष्ठं वसिष्ठतममाच्छादयितृतमं वसुमत्तमं वा यो वेद स तथैव वसिष्ठो ह भवति स्वानां ज्ञातीनां कस्तर्हि वसिष्ठ इत्याह। वाग्वाव वसिष्ठा X
वाग्मिनो हि पुरुषा वसंत्यभिभवंत्यन्यांश्च सुमत्तमाश्छादितो वाग्वासिष्ठा।

यो ह वै प्रतिष्ठां वेद सर्वा अस्मिंल्लोके मुष्मिंश्च परे प्रतितिष्ठति ह कातर्हि प्रतिष्ठेत्याह चक्षुर्वाव प्रतिष्ठा चक्षुषा हि पश्यन्समे च दुर्गे च प्र
तितिष्ठति यस्मादतः प्रतिष्ठा चक्षुः यो ह वै संपदं वेद तस्मा अस्मै दैवाश्च मानुषाश्च कामाः संपद्यन्ते ह कातर्हि संपदित्याह श्रोत्रं वा
व संपद्यस्माच्छ्रोत्रेण वेदा गृह्यन्ते तदर्थविज्ञानं च ततः कर्माणि क्रियन्ते ततः कामसंपदित्येवं कामसंपद्धेतुत्वाच्छ्रोत्रं वाव संपद्यो ह वा
आयतनं वेद आयतनं हि स्वानां भवति आश्रयो भवतीत्यर्थः किं तदायतनमित्याह मनो ह वा आयतनमिंद्रियोपहृतानां विषयाणां
भोक्त्रर्थानां प्रत्ययरूपाणां मन आयतनमाश्रयो ऽतो मनो ह वा आयतनमित्युक्तम् अथ ह प्राणा एवं यथोक्तगुणाः सन्तो ऽहं श्रेयानस्म्यहं
श्रेयानस्मीत्येतस्मिन्प्रयोजने व्यूदिरे नानाविरुद्धं वादिर उक्तवन्तस्ते हैवं विवदमाना आत्मनः श्रेष्ठताविज्ञानाय प्र
जापतिं पितरं जनयितारं कंचिदेत्योचुरुक्तवन्तो हे भगवन्को नो ऽस्माकं मध्ये श्रेष्ठो ऽभ्यधिको गुणैरित्येवं पृष्टवन्तस्तान्पिता होवाच यस्मि
न्वो युष्माकं मध्ये उत्क्रान्ते शरीरमिदं पापिष्ठमिवातिशयेन जीवतो ऽपि समुत्क्रान्तप्राणं ततो ऽपि पापिष्ठतरमेवातिशयेन दृश्येत कु
णपमस्पृश्यमशुचि दृश्येत स वो युष्माकं श्रेष्ठ इत्यवोचत्काक्वा तद्दुःखं परिजिहीर्षुः तथोक्तेषु पित्रा प्राणेषु सा ह वागुच्चक्रामोत्क्रान्त
वती सा वागुत्क्रम्य संवत्सरमात्रं प्रोष्य स्वव्यापारान्निवृत्ता सती पुनः पर्येत्येतरान्प्राणानुवाच कथं केन प्रकारेणाशकत शक्तवन्तो
यूयं मदृते मां विनाजीवितुं धारयितुमात्मानमिति ते होचुर्यथा कला इत्यादि कला मूका लोके ऽवदन्तो वाचा जीवन्ति कथं प्राणन्तः प्रा

णेन पश्यंतः चक्षुषा शृण्वंतः श्रोत्रेण ध्यायंतो मनसा सर्वकरणचेष्टां कुर्वंत इत्यर्थः एवं वयमजीविष्म इत्यर्थः आत्मनो श्रेष्ठ
तां प्राणेषु बुद्ध्वा प्रविवेश ह वाक् पुनः स्वव्यापारेषु प्रवृत्ता बभूवेत्यर्थः समानमन्यत् ॥ चक्षुर्होच्चक्राम श्रोत्रं होच्चक्राम मनो होच्च
क्रामेत्यादि यथा बाला अमनसो प्ररूढमनस इत्यर्थः एवं प्रवृत्तेषु वागादिषु अथानंतरं ह स मुख्यः प्राण उच्चिक्रमिषन् उत्क्रमि
तुमिच्छन् किमकरोदित्युच्यते यथा लोके सुहयः शोभनोऽश्वः पड्वीशशंकून् पादबंधनकीलकान् परीक्षणाया रूढेन कशया हतः सं
खिदेत् समुत्खनेत् समुत्पाटयेदेवमितरानन्यान् वागादीन् प्राणान् समखिदत् समुद्धृतवान् ते प्राणाः संचालिताः सन्तः स्वस्थाने स्था
तुमनुत्सहमाना अभिसमेत्य मुख्यं प्राणं तमूचुर्हे भगवन्नेधि भव नः स्वामी यस्मात्त्वं नोऽस्माकं श्रेष्ठोऽसि मा चास्माद्देहादुत्क्रमीरिति
अथ हैनं वागादयः प्राणस्य श्रेष्ठतां कार्येणापादयन्त आहुर्बलिमिव हरन्तो राज्ञे विशः कथं वाक् तावदुवाच यदहं वसिष्ठास्मि य
दिति क्रियाविशेषणं यद्वसिष्ठत्वगुणास्मीत्यर्थः त्वं तद्वसिष्ठस्तेन वसिष्ठत्वगुणेन तद्वसिष्ठोऽसि तद्गुणस्त्वमित्यर्थः अथवा तद्व
सिष्ठोऽपि क्रियाविशेषणम् एवं चक्षुः तत्त्वदीयो सो वसिष्ठत्वगुणोऽज्ञानान्ममेति मया निमत इत्येतत् तथोत्तरेषु योज्यं चक्षुः श्रोत्रं मन
स्तु श्रुतमिदं वचो युक्तमिदं वागादिभिर्मुख्यं प्राणं प्रत्यभिहितं यस्मान्नवै लोके वाचो न चक्षूंषि न श्रोत्राणि न मनांसीति वागादी
नि करणान्याचक्षते लौकिका आगमज्ञा वा किं तर्हि प्राणा इत्येवाचक्षते कथयन्ति यस्मात् प्राणो ह्येवैतानि सर्वाणि वागादीनि कर

५०

णजातानि न्नवश्यतो मुख्यं प्राणं प्रत्यनुरूपमेव वागादिभिरुक्तमिति प्रकरणार्थ॥ मुपजिहीर्षति। ननु कथमिदमुक्तं चेतनाव
न्त इव पुरुषा अहंश्रेष्ठतायै विवदन्तोन्योन्यं स्पर्द्धेयेयुरिति नहि चक्षुरादीनां वाचं प्रत्याख्याय प्रत्येकं वदनं संभवति तथा पग
मो देहात्पुनः प्रवेशो ब्रह्मगमनं प्राणस्तुतिर्वोपपद्यते तत्राग्न्यादिचेतनावद्देवताधिष्ठितत्वाद्वागादीनां चेतनावत्वं तावत्सिद्धं।
आगमतः। तार्किकसमयविरोध इति चेद्भ एकस्मिन्ननेकचेतनावत्वे। नेश्वरस्य निमित्तकारणत्वाभ्युपगमाद्यैतावदीश्वर
मभ्युपगच्छन्ति तार्किकास्तेन मनआदिकार्यकरणानामाध्यात्मिकानां बाह्यानां च पृथिव्यादीनामीश्वराधिष्ठितानामेव नियमे
न प्रवृत्तिमिच्छन्ति रथादिवन्न चास्माभिरग्न्याद्याश्चेतनावत्योपि देवता आध्यात्मं भोक्त्र्योऽभ्युपगम्यन्ते किं तर्हि कार्यकरणवती
नां हितासां प्राणैकदेवताभेदानामध्यात्माधिभूताधिदैवकाष्ठिभेदकोटिविकल्पानामध्यक्षतामात्रेण नियन्त्रेश्वरोऽभ्युपगम्य
ते स ह्यकरणो पाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यादिमंत्रवर्णाद्धिरण्यगर्भं पश्यति जायमानं हिरण्य
गर्भं जनयामास पूर्वमित्यादि श्वेताश्वतरीयाः पठन्ति भोक्ता कर्मफलसंबंधी देहे तद्विलक्षणो जीव इति वक्ष्यामो वागादीनां चे
ह संवादः कल्पितः विदुषान्वयव्यतिरेकाभ्यां प्राणश्रेष्ठता निर्धारणार्थं यथा लोके पुरुषा अन्योन्यमात्मनः श्रेष्ठतायै विवद
मानाः कं विद्गुणविशेषाभिज्ञं पृच्छन्ति को नः श्रेष्ठो गुणैरिति तेनोक्ता एकैकश्येनादः कार्यं साधयितुमुद्यच्छत येनादः कार्यं स

५०

ध्यते सर्व॰ श्रेष्ठ इत्युक्त्वा तथैवोद्यच्छन्त आत्मनोन्यस्य वा श्रेष्ठतां निर्धारयन्ति तथेमं संव्यवहारं वागादिषु कल्पितवती श्रुतिः॰ क
थं नाम विद्वान्वागादीनामेकैकस्याभावेपि जीवनं दृष्टं न तु प्राणस्येति प्राणश्रेष्ठतां प्रतिपद्येतेति तथा च श्रुतिः कौषीतकीनां जी
वति वागपेतो मूकान्हि पश्यामो जीवति चक्षुरपेतोन्धान्हि पश्यामो जीवति श्रोत्रापेतो बधिरान्हि पश्यामो जीवति मनोपेतो बालान्हि
पश्यामो जीवति बाहुच्छिन्नो जीवत्यूरुच्छिन्न इत्यादि॥ स होवाच मुख्य॰ प्राण॰ किं मेन्नं भविष्यतीति मुख्यं प्राणं प्रष्टारमिव कल्पयि
त्वा वागादीन्प्रति वक्तृनिव कल्पयन्ती श्रुतिराह यत्किं चिदिदं लोके न जातं प्रसिद्धमाश्वभ्यः॰ आशकुनिभ्यः॰ सहाशकुनिभ्यः॰ सह श्वाकुनिभि
स्सर्वप्राणिनां यदन्नं तत्तवान्नमिति होचुर्वागादय इति प्राणस्य सर्वमन्नं प्राणोत्ता सर्वस्यान्नस्येत्येवं प्रतिपत्तये कल्पिताख्यायिका
रूपाद्याद्युत्यस्वेन श्रुतिरूपेणाह तद्वै एतत्किं चिल्लोके प्राणिभिरन्नमद्यते तदनस्य प्राणस्य तदन्नं प्राणेनैव तदद्यत इत्यर्थः॥ स
र्वप्रकारचेष्टाव्याप्तिगुणप्रदर्शनार्थमन इति प्राणस्य प्रत्यक्षं नाम प्राद्युपसर्गपूर्वत्वे हि विशेषगतिः स्यात्तथा च सर्वान्नानाम
त्तुर्नामग्रहणमितीदं प्रत्यक्षं नामान इति सर्वान्नानामत्तुः साक्षादभिधानं न ह वा एवंविदि यथोक्तप्राणविदि प्राणोहमस्मि सर्वभूत
स्थः सर्वान्नानामत्तेति तस्मिन्नेवंविदि ह वै किं च न किं चिदपि प्राणिभिरद्यं सर्वैरनन्नमनाद्यं न भवति सर्वमेवंविद्यन्नं भवतीत्यर्थः॥ प्रा
णभूतत्वाद्विदुषः॥ प्राणाद्वा एष उदेति प्राणेस्तमेतीत्युपक्रम्यैवंविदो ह वा उदेति सूर्य एवंविद्यस्तमेतीति श्रुत्यंतरात्॥ स होवाच पुनः॥

छां० भा०

प्राणः पूर्ववदेव कल्पना किं मे वासो भविष्यतीत्याप इति होचुर्वागादयो यस्मात्प्राणस्य वास आपस्तस्माद्वा एतदशिष्यन्तो ऽक्ष्यमा
णा भुक्तवन्तश्च ब्राह्मणा विद्वांस एतत्कुर्वन्ति किमद्भिर्वाससः स्थानीयाभिः पुरस्ताद्भोजनादूर्ध्वमुपरिष्टाच्च भोजनादूर्ध्वं च परिदधति प
रिधानं कुर्वन्ति मुख्यस्य प्राणस्य लंभुकोऽलम्भनशीलो वासो भवति वाससो लम्भैव भवतीत्यर्थः। अनग्नो ह भवति वाससो लंभुकत्वेना
र्थसिद्धैवानग्नतेति अनग्नो भवतीत्युत्तरीयवान्भवतीत्येतत्। भोक्ष्यमाणस्य भुक्तवतश्च यदाचमनं शुद्ध्यर्थं निज्ञातं तस्मिन्प्राणस्य वास इ
ति दर्शनमात्रमिह विधीयते। अद्भिः परिदधतीति नाचमनान्तरं यथालौकिकैः प्राणिभिरद्यमानमन्नं प्राणस्येति दर्शनमात्रं तद्वदि
मन्नं किं मे वास इत्यादि प्रश्नप्रतिवचनयोस्तुल्यत्वाद्यद्याचमनमपूर्वं तादर्थ्येन क्रियेत तदा कृम्याद्यन्नमपि प्राणस्येति भक्ष्यत्वेन विहि
तं स्यात्। तुल्ययोर्विज्ञानार्थयोः प्रश्नप्रतिवचनयोः प्रकरणस्य विज्ञानार्थत्वादर्द्धजरतीयो न्यायो न युक्तः कल्पयितुं यत्तु प्रसिद्धमा
चमनं प्रायत्यार्थं प्राणस्यानग्नतार्थं च न भवतीत्युच्यते न तथा वयमाचमनमुभयार्थं ब्रूमः। किं तर्हि प्रायत्यार्थाचमनसाधनभूता आ
पः प्राणस्य वास इति दर्शनं चोद्यत इति ब्रूमस्तत्राचमनस्योभयार्थत्वप्रसंगदोषचोदनानुपपन्ना वासोऽर्थ एवाचमने तद्दर्शनं स्यादि
ति चेन्न वासोज्ञानार्थवाक्ये आचमनस्य तदर्थत्वमन्यार्थत्वं चेति प्रमाणाभावात्। यदि तत्प्राणदर्शनं स्तूयते कथं तद्दैवत्प्राणदर्शनं सत्य
कामो जाबालो गोश्रुतये वैयाघ्रपद्याय व्याघ्रपदोऽपत्यं वैयाघ्रपद्यस्तस्मै गोश्रुत्याख्यायोक्त्वोवाचान्यदपि वक्ष्यमाणं वचः किं स उ

वासोऽर्थे पूर्ववाचमनविधाने तत्रानग्नतार्थं च हि विधानवाक्यभेदः २

५१

५१

वाचेत्याह यद्यपि शुश्रूषा यस्य प्राणवेप एतद्दर्शनं बुद्ध्या प्राणविज्ञायेरन्नुत्पद्येरन्नेवास्मिन्प्राणो रायस्पोषः प्ररोहेयुश्च पलाशानि पत्रा
णि किमु जीवते पुषाय ब्रूयादिति यथोक्तप्राणदर्शने न विदे मस्वार्थकर्म आरभ्यते थानन्तरं यदि महत्वं जिगमिषेज्जुमिच्छेन्महत्व
प्राप्तिं यदि कामयेदित्यर्थः तस्येदं कर्म विधीयते महत्वे सति हि श्रीरूपनमते श्रीमतो ह्यर्थप्राप्तं वनं ततस्तत्कर्मानुष्ठानं तत्रश्च दे
वयानं पितृयाणं वा पंथानं प्रतिपद्यत इत्येतत्प्रयोजनं भूरीकृत्य महत्वप्राप्ति रिदं कर्म न विषयोपभोगकामस्य तस्यायं कालादि
विधिरुच्यते। अमावास्यायां दीक्षित्वा दीक्षित इव भूमिशयनादिनियमं कृत्वा तपोरूपं सत्यवचनं ब्रह्मचर्यमित्यादि धर्मवान्भूत्वा त्यर्थः॥
न पुनर्दृश्यमेव कर्मजातं सर्वमुपादत्ते तद्विकारत्वान्मंथकर्मण उपसद्व्रती तिष्ठत्यन्तरात्पयोमात्रं भक्षणं विशुद्धिकारणं उते उपाद
त्रे पौर्णमास्यां रात्रौ कर्मारभ्यते सर्वौषधस्य ग्राम्यारण्यानामोषधीनां यावच्छक्यमल्पमल्पमुपादाय तद्द्वितुषीकृत्वा सममेव पिष्टं दधि
मधुनो रोडंबरे कंसाकारे चमसाकारे वा पात्रे कृत्वं तराज्यद्धिपोपमथ्याय तस्थापयित्वा ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नावावसथ्ये
आज्यस्यावापस्थाने हुत्वा स्रुवलग्नं मंथे संपातमवनयेत्संस्रवमधःपातयेत्समानमन्यत्। वसिष्ठाय प्रतिष्ठायै संपदे आयतनाय
स्वाहेति प्रत्येकं तथैव संपातमवनयेत् हुत्वाथ प्रतिसृप्याग्नेरीषदपसृत्यांजलौ मंथमाधाय जपतीमं मंत्रं। अमो नामास्यमा हि ते
मइति प्राणस्य नामानेन हि प्राणः प्राणिति देह इत्यतो मंथद्रव्यं प्राणस्यान्नत्वात्प्राणत्वेन स्तूयते अमो नामासीति कुतो यतो मा सहि य

छां॰भा॰

स्मात्तेत्वप्राणभूतस्यसर्वंसमस्तंजगदिदमतोमोनामासीत्यर्थः॥सहिप्राणभूतोमंथोज्येष्ठःश्रेष्ठश्चा तएवचराजादीप्तिमानधिपति
श्चाधिष्ठायपालयितासर्वस्यसमामपिमंश्रः॥प्राणोऽस्येश्चादिगुणभूगमात्मनोगमयत्वहमेवेदंसर्वंजगदसानिभवानिप्राणवदितिरा
द्योमंत्रपरिसमाप्त्यर्थः॥अथानंतरंखलुएतयावक्ष्यमाणयर्चापच्छः॥पादशःआचामतिभक्षयतिमंत्रस्यैकेकेनपादेनैकैकंग्रासंभक्ष
यतितद्भोजनंसवितुः॥सर्वस्यप्रसवितुःप्राणमादित्यंचैकीकृत्योच्यतेआदित्यस्यवृणीमहेप्रार्थयेमहिप्रतिमंथरूपंयेनान्नेनसावित्रे
णभोजनेनोपभुक्तेनवयंसवितृस्वरूपापन्नाभवेमेत्यभिप्रायः॥देवस्यसवितुरितिपूर्वेणसंबंधः॥श्रेष्ठंप्रशस्यतमंसर्वान्नेभ्यः॥सर्वधा
तमंसर्वजगतोधारयितृतममतिशयेनविधातृतममितिवासर्वथाभोजनविशेषणंतुरंत्वरंतूर्णंशीघ्रमित्यर्थः॥भगस्यदेवस्यसवि
तुर्धीमहिचिंतयेमहिविशिष्टभोजनेनसंस्कृताःशुद्धात्मानःसन्तःस्वरूपमित्यभिप्रायःअथवाभगस्यश्रियःकारणंमहत्त्वंप्राप्तुं
कर्मकृतवन्तोवयंतद्धीमहीतिसर्वंचमंथलेपंपिबतिनिर्णिज्यप्रक्षाल्यकंसंकंसाकारंचमसंचमसाकारंवौदुंबरंपात्रंपीत्वाच
म्यपश्चादग्नेःप्राक्शिराःसंविशतिचर्मणिवाजिनेस्थंडिलेकेवलायांवाभूमौवासंयमोवाग्यतःसन्नित्यर्थः॥अप्रसाहेनप्रसह्य
तेनाभिभूयतेःस्त्रियायद्यनिष्टस्वप्नदर्शनेनयथातथासंयतचित्तःसन्नित्यर्थः॥एवंभूतोयदिस्त्रियंपश्येत्स्वप्नेषुतदाविद्यात्समृद्धम
मेदंकर्मेतितदेतस्मिन्नर्थेएषश्लोकोमंत्रोऽपिभवतियदाकर्मसुकाम्येषुस्त्रियंस्वप्नेषुस्वप्नदर्शनेषुस्वप्नकालेषुपश्यतिसमृद्धिंत

कामार्थेषु १

५२

५२

९१

त्र जानीयात्कर्मणां फलनिष्पत्तिर्भविष्यतीति जानीयादित्यर्थः॥ तस्मिन् स्त्रियादिप्रशस्तस्वप्नदर्शने सतीत्यभिप्रायः॥ द्विरुक्तिः कर्मसमा
प्त्यर्था॥ २॥ ब्रह्मादिस्तंबपर्यन्ताः संसारगतयो वक्तव्या वैराग्यहेतोर्मुमुक्षूणामित्यत आख्यायिका रभ्यते॥ श्वेतकेतुर्नामतो ह इति ऐ
तिह्यार्थः॥ अरुणस्यापत्यमारुणिस्तस्यापत्यमारुणेयः॥ पंचालानां जनपदानां समितिं सभामेयाय आजगाम तं गतवन्तं ह प्रवाहणो नाम
तो जीवलापत्यं जैवलिरुवाच हे कुमार अनु त्वा त्वामशिषदन्वशिषत्पिता किं मनु शिष्टस्त्वं पित्रेत्यर्थः॥ इत्युक्तः स आह अनु
हि अनुशिष्टोऽस्मि भगव इति॥ तं होवाच यद्यनुशिष्टोऽसि वेत्थ यदितोऽस्माल्लोकात्प्रयत्य प्रजाः प्रयन्ति यद्गच्छन्तीति किं जानीषे
इत्युक्तः न भगव इति आह इतरो न जानेऽहं तद्यत्पृच्छसि एवं तर्हि वेत्थ जानीषे यथा येन क्रमेण पुनरावर्तन्त इति न भगव इति प्रत्याह वे
त्थ यथासौ लोकः पितृसंबंधी यं प्राप्य पुनरावर्तन्ते बहुभिः प्रयद्भिर्न संपूर्यता इति न भगव इत्याह वेत्थ वेत्थ पथोर्मार्गयोः सह प्र
याणयोर्देवयानस्य पितृयाणस्य च व्यावर्तना व्यावर्तनमितरेतरवियोगस्थानं सह गच्छतामित्यर्थः॥ न भगव इति वेत्थ यथा येन क्र
मेण पंचम्यां पंचसंख्याकायामाहुतौ आहुतायामाहुतिनिर्वृत्ता आहुतिसाधनाश्चापः पुरुषवचसः पुरुष इति वचो अभिधानं यासां
हूयमानानां क्रमेण षष्ठ्याहुतिभूतानां ताः पुरुषवचसः पुरुषशब्दवाच्या भवन्ति पुरुषाख्यां लभन्त इत्यर्थः॥ इत्युक्तो नैव भगव इ
त्याह नैवाहमत्र किंचन जान इत्यर्थः॥ अथैवमज्ञः सन् किमनु कस्मात्त्वमनुशिष्टोऽस्मीत्यवोचथा उक्तवानसि यो नीमानि मया पृष्टा

७२ हि

92

न्यर्थजातानि न विद्यान्न विजानीयात्कथं स विद्वत्त्वेनानुशिष्टोस्मीति ब्रुवीतेति एवं सम्राट् श्वेतकेतुं राज्ञायस्त आयासितस्सन्पितुरर्द्धस्था
नमेयाय गतवांस्तं च पितरमुवाचानुशिष्यानुशासनमकृत्वैव मां किल भगवान् समावर्तनकालेऽब्रवीदुक्तवाननु त्वाशिषम
न्वाशिषं त्वामिति यत ५ पंच पंच संख्याकान्राजन्यबन्धू राजन्या बन्धवोस्येति राजन्यबन्धुः स्वयमुद्दिष्टं तदेतत्यर्थः५ अप्राक्षीत्पृष्टवान्तेषां प्र
श्नानां नैकं चनैकमपि नाशकं न शक्तवानहं विवक्तुमर्थतो निर्णेतुमित्यर्थः सहोवाच पिता यथा मा मां त्वं तदागतमात्रमेव
तान्प्रश्नानवद उक्तवानसि तेषां नैकं चनाशकं विवक्तुमिति तथा मां जानीहि त्वदीयाज्ञानेन लिंगेन मम तद्विषयमज्ञानं जानीहीत्य
र्थः कथं यथाहमेषां प्रश्नानामेकं चनैकमपि न वेद न जाने यद्यहमिमान्प्रश्नानवेदिष्यं विदितवानस्मि कथं ते तुभ्यं प्रियाय पुत्राय समा
वर्तनकाले पुरा नावक्ष्यं नोक्तवानस्मीत्युक्त्वा स ह गौतमो गोत्रतो गौतमो राज्ञो जैवलेरर्द्धस्थानमेयाय गतवांस्तस्मै ह गौतमाय प्राप्ताया
र्हामर्हणां चकार कृतवान् स च उपागामः५ कृतातिथ्य उषित्वा परेद्युः५ प्रातःकाले सभागे सभागते राजनि उदियाय उदगात् भागः५ भजनीयो
वा सह भागेन वर्तमानो वा सभागः५ पूज्यमानोऽन्येभ्यः स्वयं गौतम उदियाय राजानमुक्तवान् स होवाच गौतमं राजा मानुषस्य भगवन्गौ
तम मनुष्यसंबंधिनो वित्तस्य ग्रामादेर्वरं वरणीयं काममं वृणीथाः५ प्रार्थयस्व५ स होवाच गौतमस्तवैव तिष्ठतु राजन्मानुषं वित्तं यामे
व कुमारस्य मम पुत्रस्यांते समीपे वाचं पंचप्रश्नलक्षणामभाषथा उक्तवानसि तामेव वाचं ममह्यं ब्रूहि कथयेत्युक्तो गौतमेन रा

सञ्ज्ञा नात्रे न त्वं जानीहि ४   धैतलसि इं लोक ५

जा स ह कृच्छ्री दुःखी बभूव कथं विदमिति स कृच्छ्री भूतो प्रत्याख्येयं ब्राह्मणं मन्वानो न्यायेन विद्या वक्तव्येति मत्वा तं ह गौतमं चि
रं हि दीर्घकालं वसेत्येवमाज्ञापयांचकार आज्ञापितवान् यत्पूर्वं प्रत्याख्यातवान् राजा विद्यां यच्च पश्चाच्चिरं वसेत्याज्ञप्तवान् तन्निमित्तं
ब्राह्मणं क्षामयति हेतुवचनोक्त्या तं होवाच राजा सर्वविद्योपि ब्राह्मणोपि सन् यथा येन प्रकारेण मा मां हे गौतम अवदस्त्वं तमेव वि
द्यालक्षणं वाक्यं मे ब्रूहीति तथाहं करिष्य इत्यर्थः तत्रास्ति यद्वक्तव्यं यथा येन प्रकारेणेयं विद्या प्राक् त्वत्तः न खलु ब्राह्मणान् गच्छति न
गतवती न च ब्राह्मणा अनया विद्ययानुशिष्टवन्तः स यत एवं तस्मादु पुरा पूर्वं सर्वेषु लोकेषु क्षत्रस्यैव क्षत्रजातेरेवानया विद्यया
प्रशासनं प्रशास्तृत्वं शिष्याणामभूद्बभूव क्षत्रियपरंपरयैवेयं विद्या एतावन्तं कालमागता तथाप्यहमेतां तुभ्यं वक्ष्यामि त्वत्स
प्रदानादूर्ध्वं ब्राह्मणान् गमिष्यति अतो मया यदुक्तं तत्क्षन्तुमर्हसीत्युक्त्वा तस्मै ह उवाच विद्यां राजा पंचम्याम् आहुतावापः पुरुषवचसो भवन्ति
नापाक्रियते तदपाकरणमन्वितरेषामपाकरणमनुकूलं भवेदित्यग्निहोत्राहुत्योर्गतिः प्रतिष्ठा तृप्तिः पुनरावृत्तिर्लोकं प्रत्युत्थायी
तितेषां चापाकरणमुक्तं तत्रैव ते वा एते आहुती हुते उत्क्रामतस्ते अन्तरिक्षमाविशतस्ते अन्तरिक्षमेवाहवनीयं कुर्वाते वायुं समिधं मरी
चीरेव शुक्रामाहुतिं ते अन्तरिक्षं तर्पयतस्ते तत उत्क्रामत इत्याद्येवमेव पूर्ववद्दिवं तर्पयतस्ते तत आवर्तेते इमामाविश्य तर्पयित्वा पुरु
षमाविशतस्ततः स्त्रियमाविश्य लोकं प्रत्युत्थायी भवतीति तत्राग्निहोत्राहुत्योः कार्यारंभमात्रमेव प्रकारं भवतीत्युक्तमिह तु तं का

४ःकार्यारंभो अःस उक्तो वाजसनेयके तं प्रतिप्रश्ना उक्ता तिराहुत्यो ४

यदि तमग्निहोत्राहुत्योर्वे विपरिणामलक्षणं पंचधा प्रविभज्याग्नित्वेनोपासनमुत्तरमार्गप्रतिपत्तिसाधनं विधित्सन्नाह। असौ वाव लोक इत्या
दि। इह सायंप्रातरग्निहोत्राहुती हुते पय आदिसाधने श्रद्धापुरःसरे आहवनीयाग्निसमिद्धूमार्चिरंगारविस्फुलिंगभाविते कर्त्रादिका
रकभाविते चांतरिक्षक्रमेण द्युलोकं प्रविशंत्यौ सूक्ष्मभूते अप्समवायित्वादप्शब्दवाच्ये श्रद्धाहेतुत्वाच्च श्रद्धाशब्दवाच्ये तयोर
धिकरणाग्निरन्यच्च तत्संबद्धं समिदादि निर्दिश्यते। असौ वाव लोकोग्निर्हे गौतम यथाग्निहोत्राधिकरणमाहवनीय इह तस्याग्नेर्द्यु
लोकाख्यस्यादित्य एव समित् तेन हीद्धोसौ लोको दीप्यते। तस्मात्समिन्धनात्समिदादित्यः। रश्मयो धूमः। तदुत्थानात्समिधो हि धूम उत्तिष्ठति।
अहरर्चिः। प्रकाशसामान्यादादित्यकार्यत्वाच्च। चंद्रमा अंगाराः। अहःप्रशमेभिव्यक्तेः अर्चिषो हि प्रशमेंगारा अभिव्यज्यंते। नक्षत्राणि विस्फु
लिंगाश्चंद्रमसोवयवा इव प्रविकीर्णत्वसामान्यात्। तस्मिन्नेतस्मिन्यथोक्तलक्षणेग्नौ देवा यजमानप्राणा अग्न्यादिरूपा अधिदैवतं श्रद्धा
मग्निहोत्राहुतिपरिणामावस्थारूपाः। सूक्ष्मा आपः। श्रद्धाभाविताः। श्रद्धा उच्यंते पंचम्यामाहुतावापः। पुरुषवचसो भवंतीति ह्यपां होम्य
तया प्रश्ने श्रुतत्वात्। श्रद्धा आपः। श्रद्धामेवारभ्य प्रणीय प्रचरंतीति च विज्ञायते तां श्रद्धामब्रूपां जुह्वति तस्या आहुतेः। सोमो राजा अपां श्रद्धा
शब्दवाच्यानां द्युलोकाग्नौ हुतानां परिणामः। सोमो राजा संभवति यथा ऋग्वेदादिपुष्परसा ऋगादिमधुकरोपनीतास्त आदित्ये य
शआदिकार्यरोहितादिरूपलक्षणमारभंत इत्युक्तम्। तथेमा अग्निहोत्राहुतिसमवायिन्यः सूक्ष्माः। श्रद्धाशब्दवाच्या आपो द्युलोक

बा२ उग्र

सञ्ज्ञानात्रेनतंजानीहि ४ श्वेतलसिइलोके ५

जासहिकृच्छ्री इ४खीबभूव कथं विदमिति स कृच्छ्री भूतो प्रत्याख्येयं ब्राह्मणं मन्वानो न्यायेन विद्या वक्तव्येति मत्वा तं ह मौतमं चि
रं इहि दीर्घकालं वसेत्येवमाज्ञापयां चकार राज्ञाज्ञापितवान्यत्पूर्वं प्रत्याख्यातवान् राजा विद्यां यच्च पश्चाच्चिरं वसेत्याज्ञप्तवान् तन्निमित्तं
ब्राह्मणं क्षामयति हेतुर्वचनेनोक्त्या तं होवाच राजा सर्वविद्यापि ब्राह्मणोपि सन्यथा येन प्रकारेण मा मां हे गौतम अवदस्त्वं तमेव वि
द्यालक्षणां वायं मब्रूहीति तथाहं करिष्य इत्यर्थः भत्रास्त्रियवक्तव्यय यथा येन प्रकारेण यं विद्या प्राक् त्वत्तः पुरा ब्राह्मणान्न गच्छति न
गतवती न च ब्राह्मणा अनया विद्ययानुशिष्टवन्तस्तथैतत्तस्मात् पुरा पूर्वं सर्वेषु लोकेषु क्षत्रस्यैव क्षत्रजाते रेवानया विद्यया
प्रशासनं प्रशास्तृत्वं शिष्याणामभूदभूत् क्षत्रियपरंपरयैवेयं विद्या एतावन्तं कालमागता तथाप्यहमेतां तुभ्यं वक्ष्यामि त्वत्सं
प्रदानादूर्ध्वं ब्राह्मणान्गमिष्यत्यतो मया यदुक्तं तत्क्षन्तुमर्हसीत्युक्त्वा तस्मै स होवाच विद्यां राजापं चम्यामाहुतावयं ... आथम्य
नापाक्रियते तदपाकरणमन्वितरेषामपाकरणमनुकूलं न वेदित्यसि होवाचाहुत्योर्गतिः प्रतिष्ठा ... पुनरावृत्तिर्लोकं प्रत्युत्थायी
तितेषां चापाकरणमुक्तं तत्रैवं ते वा एते आहुती हुते उत्क्रामतस्ते अन्तरिक्षमाविशतस्ते अन्तरिक्षमेवाहवनीयं कुर्वाते वायुं समिधं मरी
चीरेव शुक्राहुतिं ते अन्तरिक्षं तर्पयतस्ते तत उत्क्रामत इत्याद्येवमेव पूर्ववद्दिवं तर्पयतस्ते तत आवर्तेते इमामाविश्य तर्पयित्वा पुरु
षमाविशतस्ततः स्त्रियमाविश्य लोकं प्रत्युत्थायी भवतीति ताग्निहोत्राहुत्योः कार्यारम्भमात्रमेवं प्रकारं भवती त्वं कामिह तुतं का

४ः कार्यारं भोभः स उक्तो वाजसनेयके तं प्रति प्रश्ना उत्क्रान्तिराहुत्यो ४

मनुप्रविश्यचांद्रंकार्यमारभन्तेफलरूपमग्निहोत्राहुत्योर्यजमानाश्चतत्कर्तारःश्रद्धाआहुतिमयाआहुतिभावनाभाविता
आहुतिरूपेणकर्मणाकृष्टाश्चश्रद्धाअप्समवायिनोद्युलोकमनुप्रविश्यसोमभूताभवन्तीतितदर्थंहितैरग्निहोत्रंहुतमत्रचा
हुतिपरिणामएवपंचाग्निसंबंधक्रमेणप्राधान्येनविवक्ष्यतेउपासनार्थंनयजमानानांगतिस्तांतुविदुषांधूमादिक्रमेणो
त्तरत्रवक्ष्यतिविदुषांचोत्तरांविद्याकृतांद्वितीयहोमपर्यायार्थमाह॥४॥पर्जन्योवावपर्जन्यएवगौतमाग्निःपर्जन्योनामवृष्ट्यु
पकरणाभिमानीदेवताविशेषस्तस्यवायुरेवसमिद्वायुनाहिपर्जन्योग्निःसमिध्यतेपुरोवातादिप्राबल्येवृष्टिदर्शनादभ्र
मेवधूमःकार्यत्वाद्धूमवच्चलक्ष्यमाणत्वाद्वाविद्युदर्चिःप्रकाशसामान्यादशनिरंगाराःकाठिन्याद्विद्युत्संबंधाद्वाह्रादनयोविस्फुलिंगा
ह्रादनयोगर्जितशब्दामेघानांविप्रकीर्णत्वसामान्यात्तस्मिन्नेतस्मिन्नग्नौदेवाःपूर्ववत्सोमंराजानंजुह्वतितस्याआहुतेर्वर्षंसंभव
तिश्रद्धाख्याआपःसोमाकारपरिणताद्वितीयपर्यायेपर्जन्याग्निंप्राप्यवृष्टित्वेनपरिणमन्ते॥५॥पृथिवीवावगौतमाग्निरित्यादि
पूर्ववत्तस्याःपृथिव्याख्यस्याग्नेःसंवत्सरएवसमित्संवत्सरेणहिकालेनसमिद्धापृथिवीव्रीह्यादिनिष्पत्तयेभवत्याकाशोधूमः
पृथिव्याइवोत्थितआकाशोदृश्यतेयथाग्नेर्धूमोरात्रिरर्चिःपृथिव्याह्यप्रकाशात्मिकायाअनुरूपारात्रिस्तमोरूपत्वादग्नेरिवा
नुरूपमर्चिर्दिशोंगाराउपशांतत्वसामान्यादवांतरदिशोविस्फुलिंगाःक्षुद्रत्वसामान्यात्तस्मिन्नित्यादिसमानंतस्याआहुतेरन्नं

छां०भा०

५५

व्रीहियवादिसंभवति॥ पुरुषोवावगौतमाग्निस्तस्यवागेवसमिद्वाचाहिमुखेनसमिध्यतेपुरुषोनमूकः प्राणोधूमोधूमइव
मुखान्निर्गमनाज्जिह्वार्चिर्लोहितत्वाच्चक्षुरंगाराभासआश्रयत्वाच्छ्रोत्रंविस्फुलिंगाविप्रकीर्णत्वात्समानमन्यदन्नंजुह्वतिव्री
ह्यादिसंस्कृतंतस्याआहुतेरेतःसंभवति॥ योषावावगौतमाग्निस्तस्याउपस्थएवसमित्तेनहिसापुत्रोत्पादनायसमिध्यतेय
दुपमंत्रयतेसधूमः स्त्रीसंभवादुपमंत्रणस्ययोनिरर्चिर्लोहितत्वाद्यदंतःकरोतितेंगाराअग्निसंबंधादभिनंदाः सुखलवाविस्फु
लिंगाः क्षुद्रत्वात्तस्मिन्नेतस्मिन्नग्नौदेवारेतोजुह्वतितस्याआहुतेर्गर्भःसंभवतीत्येवंश्रद्धासोमवर्षान्नरेतोहवनपर्यायक्रमेणाप
एवगर्भीभूतास्तत्रापामाहुतिसमवायित्वात्प्राधान्यविवक्षाआपः पंचम्यामाहुतौपुरुषवचसोभवंतीतिनत्वापएवकेवलाः सोमा
दिकार्यमारभंतेनचापोत्रिवृत्कृताः सन्तित्रिवृत्कृतत्वेपिविशेषसंज्ञालाभोदृष्टः पृथिवीयमिमाआपोयमग्निरित्यच्यतमबाहुल्यं
सोमवृष्ट्यन्नरेतोदेहेषुनिमित्तंतस्मात्समुदितान्येवभूतान्यब्बाहुल्यात्कर्मसमवायीनिसोमादिकार्यारंभकाणिआपइत्युच्यंतेद
श्यतेचद्रवबाहुल्यंसोमवृष्ट्यन्नरेतोदेहेषुबहुद्रवंचशरीरंयद्यपिपार्थिवंतत्रपंचम्यामाहुतौहुतायारेतोरूपाआपोगर्भीभूता
इतित्वेवंपंचम्यामाहुतावापः पुरुषवचसोभवंतीत्याख्यातएकः प्रश्नः यत्तुद्युलोकादिमांप्रत्यावृत्तयोराहुत्योः पृथिवीपु
रुषंस्त्रियंक्रमेणाविश्यलोकंप्रत्युत्थायीभवतीतिवाजसनेयकेउक्तंतत्प्रासंगिकमिहोच्यतेइहचप्रश्नप्रथमप्रश्नेउक्तंत्वमेववेत्थ

५५

98

यदितोऽधिप्रजाः प्रतियन्तीति तस्य वायुमुपक्रमः सगर्जौपांपचमः परिणामविशेषआकृतिसंकर्मसमवायिनीनांश्चद्वारा
द्रूवाच्यानमुल्बावृतउल्बेणजरायुणावृतो वेष्टितो दशवानववामासानन्तर्मातृकुक्षौ शयित्वा यावद्वा काले नन्यूने मातिरिक्ते
नवाथानन्तरं जायते उल्बावृत इत्यादि वैराग्यहेतोरिदमुच्यते कष्टं हि मातुः कुक्षौ मूत्रपुरीषवातपीत्तश्लेष्मादिपूर्णे तदनुलि
प्तस्य गर्भस्योल्बाश्चर्मपटावृतस्य लोहितरेतोऽशुचिबीजस्य मातुरशितपीतरसानुप्रवेशेन विवर्द्धमानस्य निरुद्धशक्ति
बलवीर्यतेजःप्रज्ञाविष्टस्य शयनं ततो योनिद्वारेण पीड्यमानस्य कष्टतरा निःसृतिर्जन्मेति वैराग्यं ग्राहयति मुहूर्त्तमप्यसह्यं
दशवामासानतिदीर्घकालमन्नः शयित्वेति स एवं जातो यावदायुषं पुनः पुनर्घटीयन्त्रवज्जन्मनागामनायकर्म कुर्वन् कुलालच
क्रवद्भ्रातिर्यग्भ्रमणाय यावत्कर्मणोपात्तमायुस्तावज्जीवति तमेवं क्षीणायुषं पुरुषं प्रेतं मृतं दिष्टं कर्मणा निर्दिष्टं परलोकं प्र
तियादिवज्जीवन्त्वैदिके कर्मणि ज्ञाने वाधिकृतं तत्रं तदेनं मृतमितोऽस्माल्लोकादग्नयेऽग्न्यर्थमृत्विजो हरन्ति पुत्रा वा पात्त्यकर्मणे यत एव
इत आगतोऽग्नेः सकाशाच्छ्रद्धाद्याहुतिक्रमेण यतश्च पंचम्याग्नेस्यः संभूत उत्पन्नो भवति तस्मादेवाग्नये हरन्ति स्वामेव योनिमग्नि
मापादयन्तीत्यर्थः ॥ यदितोऽधि प्रजाः प्रयन्तीत्ययं प्रश्नः प्रत्यक्षपस्थितोऽपाकर्तव्यतया ततश्च लोकं प्रत्युत्थायिनामधिकृतानां यदु
क्तमेवं यथोक्तं पंचाग्निदर्शनेन लोकाद्यग्निष्वाविर्क्रमेण जाता अग्निस्वरूपाः पंचाग्न्यात्मान इत्येवं विद्वांसो नायुः कथमवगम्यत इ

गृहमेधिनो

ब्रां०ना०

लोकविदुरितिगृहस्थाएवोच्यन्तेनान्यइतिगृहस्थानांयेऽलनिर्लक्षविदः॥केवलेष्टापूर्तपरास्तेधूमादिनाचंद्रंगच्छन्तीतिवक्ष्यतियेचार
ण्योपलक्षितावैखानसाः॥परिव्राजकाश्चश्रद्धातपइत्युपासततेषांचलोकविद्भिः॥सहार्चिरादिनागमनंवक्ष्यतिपारिशेष्यादग्निहोत्रा
द्युतिसंबंधाच्चगृहस्थाएवगृह्यन्तेइल्लोकविदुरिति।ननुब्रह्मचारिणामगृहीतायामरण्यश्रुत्यारण्यश्रुत्यास्त्वनुपलक्षिताविद्यन्तेकथंपा
रिशेष्यसिद्धिर्नैषदोषः॥पुराणस्मृतिप्रामाण्यादूर्ध्वरेतसांनैष्ठिकब्रह्मचारिणामुत्तरेणार्यम्णः॥पंथाः॥प्रसिद्धोऽतस्तेरण्यवासिभिः॥स
हगामिष्यंतिउपकुर्वाणकास्तुस्वाध्यायग्रहणार्थाइतिनविशेषनिर्देशार्हाः॥ननूर्ध्वरेतस्त्वंचउत्तरमार्गप्रतिपत्तिकारणंपुराणस्मृ
तिप्रामाण्यादिष्यतइल्लोकविद्ग्रहणमनर्थकंप्राप्तंनगृहस्थान्प्रत्यर्थवत्त्वाद्धिगृहस्थानिर्लक्षविदस्तेषांखगावतोदक्षिणतोधूमादिपंथाः॥प्रसि
द्धस्तेषांयइल्लोकविदुः॥सगुणंवान्यद्ब्रह्मविदुरथयइदंचैवासिमिवाश्रद्धाश्रद्धांकुर्वतीतियद्विकल्पाद्विषममेवेतिलिंगादुत्तरेणतेगच्छन्ति॥ननूर्ध्व
रेतसांगृहस्थानांचसमानेआश्रमित्वेऊर्ध्वरेतसामेवोत्तरेणपथागमनंनगृहस्थानामितिनयुक्तमग्निहोत्रादिवैदिककर्मबाहु
ल्येवसतिनैषदोषोऽपूताहितेशत्रुमित्रसंयोगनिमित्ताहितेषांरागद्वेषौतथाधर्माधर्मौहिंसानुग्रहनिमित्तौहिंसानृतमायाऽ
ब्रह्मचर्यंवेदिचबहुअशुद्धिकारणमपरिहार्यंतेषामतोऽपूताअपूतत्वान्नोत्तरेणपथागमनंहिंसानृतमायाऽब्रह्मचर्यादिपरिहा
राच्चशुद्धात्मानोहीतरेशत्रुमित्ररागद्वेषादिपरिहाराच्चविरजसस्तेषांयुक्तमुत्तरेणपथा॥तथाचपौराणिकाः॥येप्रजामीषिरेवाध

५६

अ५

त्र

तेश्मशानानिजेज्ञिरेयेप्रजांनेशिरेवाथतेऽमृतत्वंहिभेजिरेइत्याद्युक्तिविदांगृहस्थानामरण्यवासिनांचसमानमार्गत्वेऽमृतत्वे
फलेचसत्यरण्यवासिनांविद्यानर्थक्यंप्राप्तंतथाचश्रुतिविरोधोनतत्रदक्षिणायंत्तिनाविद्वांसस्तपस्विनइतिसएनमविदितो
नभुनक्तीतिचविरुद्धंनामृतसंप्लवस्थानस्यामृतत्वेनविवक्षितत्वात्तत्रैवोक्तंपौराणिकैराभूतसंप्लवंस्थानममृतत्वंहिभाष्यतइ
तियच्चात्यंतिकममृतत्वंतदपेक्षयानतत्रदक्षिणायंत्तिसएनमविदितोनभुनक्तीत्याद्याश्रुतयइत्यतोनविरोधोनचपुनरावर्त्ते
तइतीदंमंमानवमावर्त्तंनावर्त्तन्तइत्यादिश्रुतिविरोधइतिचनेमंमानवमितिविशेषणात्तेषामिहनपुनरावृत्तिरस्तीतिचयदिह्येका
त्तेनैवनावर्त्तेरन्निमंमानवमितिचविशेषणमनर्थकंस्यादिममिहेत्याकृतिमात्रमुच्यतइतिचेन्नानावृत्तिशब्देनैवनित्यनावृत्त्यर्थस्य
प्रतीतत्वादाकृतिकल्पनानर्थिकातइममिहेतिचविशेषणार्थवत्वायान्यत्रावृत्तिःकल्पनीयानचसदेकमेवाद्वितीयमित्येवंप्रत्ययव
तांमूर्द्धन्यौनाड्यार्चिरादिमार्गेणगमनंब्रह्मैवसन्ब्रह्माप्येतितस्मात्तत्सर्वमभवत्तन्नतस्यप्राणाउत्क्रामन्त्यत्रैवसमवनीयन्तइत्यादिश्रुति
रातेष्यनतस्माज्जीवादुत्क्रमिषोःप्राणाउत्क्रामन्तिसहैवागच्छन्तीत्यर्थःकल्प्यतइतिचेन्नात्रैवसमवनीयन्तइतिविशेषणानर्थक्यात्त
अन्त २ वैप्राणाउत्क्रामन्तीतिचप्राणोर्गमनस्यप्राप्तत्वात्तस्मादुत्क्रामन्तीत्यनाशंकैवेषायदापिमोक्षस्यसंसारगतिवैलक्षण्यात्प्राणानांजी
वेनसहगमनमाशंक्यतस्मान्नोत्क्रामन्तीत्युच्यतेतदाप्यत्रैवसमवनीयन्तइतिविशेषणमनर्थकंस्यान्नचप्राणेर्विपुक्तस्यगतिरूपप

ग्र ४ हे ६ व

छतेर्जीवत्वं वा सर्वगतत्वात्सदात्मनो निरवयवत्वात्प्राणसंबंधमात्रमेव ह्यग्निविस्फुलिंगवज्जीवत्वे तद्कारणमित्यतस्तद्वियोगे जीवत्वे
गतिर्वा न शक्यते कल्पयितुं॥ अतयश्चेत्प्रमाणं नचासतोऽणुरवयव॥ स्फुरदितो जीवस्य॥ सद्रूपं छिद्रीकुर्वन्गच्छतीति शक्यं कल्पयितुं त
स्मात्तयोर्द्धमायन्नमृतत्वमेतीति सगुणब्रह्मोपासकस्य प्राणैः सह नाड्या गमनं सापेक्षमेव चामृतत्वं न साक्षान्मोक्ष इति गम्यते तदप
राजिता धूस्त्वदेरंमदीयं सर इत्याद्युक्त्वा तेषामेवैष ब्रह्मलोक इति विशेषणात् तद्य इत्थं विदुरिति गृहस्थाये चेमेऽरण्ये वानप्रस्थाः परिव्रा
जकाश्च सह नैष्ठिकब्रह्मचारिभिः श्रद्धा तप इत्येवमाद्युपासते श्रद्धधानास्तपस्विनश्चेत्यर्थः उपासनशब्दस्तात्पर्यार्थः इष्टापूर्ते दत्तमि
त्युपासत इति यद्वच्छ्रुत्यन्तराद्ये च सत्यं हि ब्रह्म हिरण्यगर्भमुपासते ते सर्वे अर्चिषमर्चिरभिमानिनीं देवतामभिसंभवन्ति संप्रतिपद्य
न्ते समानमन्यद्चतुर्थगतिव्याख्यानेनैष देवयानः पंथा व्याख्यातः सत्यलोकावसानो नांडाद्बहिः यद्देत्रा पितरं मातरं चेति मंत्रवर्णात्
अथेत्यर्थान्तरप्रस्तावनार्थः य इमे गृहस्था ग्रामे या म इति गृहस्था नाम साधारणं विशेषणमरण्यवासिभ्यो व्यावृत्त्यर्थं यथा वानप्रस्थप
रिव्राजकानामरण्यं विशेषणं गृहस्थेभ्यो व्यावृत्त्यर्थं तद्वत् इष्टापूर्ते इष्टमग्निहोत्रादि वैदिकं कर्म पूर्तं वापीकूपतडागारामादिकरणं
दत्तं बहिर्वेदि यथाशक्त्यर्हेभ्यो द्रव्यसंविभागो दत्तमित्येवं विधं परिचरणपरित्राणाद्युपासत इति शब्दस्य प्रकारप्रदर्शनार्थत्वा
त् दर्शनवर्जितत्वाद्धूमं धूमाभिमानिनीं देवतामभिसंभवन्ति प्रतिपद्यन्ते तयातिवाहिवाहिता धूमाद्रात्रिं रात्रिदेवतां रात्रेरपरपक्ष

देवतामेवमेवकृष्णपक्षाभिमानिनीमपरपक्षाद्यान्षण्मासाद्दक्षिणादक्षिणांदिशमेतिसविताताान्मासादक्षिणायनमासा
भिमानिनीर्देवताः प्रतिपद्यन्ते इत्यर्थः संघचारिण्योहिषण्मासदेवताइति मासानितिबहुवचनप्रयोगस्तासुनेतेकर्मिण
प्रकृताः संवत्सरंसंवत्सराभिमानिनींदेवतामभिप्राप्नुवन्तिकुतः पुनः संवत्सरप्राप्तिप्रसंगोयतः प्रतिषिध्यतेः एकस्मिन्हिप्रस
गसंवत्सरस्यैकस्यावयवभूते दक्षिणोत्तरायणे तत्रार्चिरादिमार्गप्रवृत्तानामुदगयनमासेभ्योवयविनः संवत्सरस्यप्रा
प्तिरुक्तातइहापितदवयवभूतानांदक्षिणायनमासानांप्राप्तिमुक्त्वातदवयविनः संवत्सरस्यापिपूर्ववत्प्राप्तिरापन्नात्यतस्त
त्प्राप्तिःप्रतिषिध्यतेनैतेसंवत्सरमभिप्राप्नुवन्तीतिमासेभ्यः पितृलोकंपितृलोकादाकाशमाकाशाच्चंद्रमसंकोसौयस्तैःप्राप्य
तेचंद्रमायएषदृश्यतेंतरिक्षेसोमोराजाब्राह्मणानांतदन्नंदेवतानांतंचंद्रमसमन्नंदेवाभक्षयन्त्यतस्तेधूमादिनागत्वा
चंद्रभूताः कर्मिणोदेवैर्भुज्यन्तेनचर्वणपिष्टादिकरणंयथान्नभूतादेवैर्भक्ष्यन्तेकिंतदोषानिमित्तोपकरणमात्रंस्याविवक्षितंतत्वा
न्नहितेकेवलेनरूपेणदेवैर्भुज्यन्तेर्भक्ष्यन्तेकिंतर्ह्युपकरणमात्रंदेवानांभवन्तितेस्त्रीपशुभृत्यादिवद्दृष्टश्चान्नशब्दउपकर
णेषुस्त्रियोन्नंपशवोन्नंविशोन्नंराज्ञामित्यादिनचतेषांस्त्र्यादीनांपुरुषोपभोग्यत्वेपुपभोगोनास्तितस्मात्कर्मिणोदेवानामुपभोग्या
अपिसन्तःसुखिनोदेवैःक्रीडन्तेशरीरंचतेषांसुखोपभोगयोग्यंचंद्रमंडलेआप्यमारभ्यतेतदुक्तंपुरस्ताच्छ्रद्धाशब्दाआपोद्युलो

103

छां० ना०

कामोऽकृता॥सोमोराजासंभवतीतिताआपःकर्मसमवायिन्यःइतरैःश्रद्धापूर्वैरनुगताःचंद्रलोकंप्राप्यचंद्रत्वमापन्नाःशरीराद्यारंभिका
इष्टाद्युपासकानांभवन्तिनचन्त्यन्त्याचाहुतौशरीराद्युताआपोऽहुतायामग्निनादह्यमानेशरीरेतदुत्थाआपोधूमेनसहोर्ध्वंयजमानम
वेष्ट्यचंद्रमंडलंप्राप्यकुशमृत्तिकास्थानीयाबाह्यशरीरारंभिकाभवन्तितदारब्धेनचशरीरेणेष्टादिफलमुपभुञ्जानाआसतेयाव
त्तदुपभोगनिमित्तस्यकर्मणःक्षयः।संपतन्तियेनेतिसंपातःकर्मणःक्षयोयावत्संपातंयावत्कर्मणःक्षयइत्यर्थः।तावत्तस्मिंश्चंद्रमंडले
उषित्वाथानन्तरमेतमेववक्ष्यमाणमध्वानंमार्गंपुनर्निवर्तन्तेपुनर्निवर्तन्तइतिप्रयोगात्पूर्वमप्यसकृच्चंद्रमंडलंगतानिवृत्ताश्चास

५८

न्नितिगम्यतेतस्मादिहलोकइष्टादिकर्मोपचित्यचंद्रंगच्छन्तितत्क्षयेचावर्तन्तेक्षणमात्रमपितत्रस्थातुंनलभ्यतेस्थितिनिमित्तकर्म
क्षयात्स्नेहक्षयादिवप्रदीपस्यतत्रकिंयेनकर्मणाचंद्रमंडलमारूढस्तस्यसर्वस्यक्षयेतस्मादवरोहतिकिंवासावशेषइतिकिंत
तयदिसर्वस्यैववच्चमबुक्तकर्मणश्चंद्रमंडलस्थस्यैवमोक्षःप्राप्नोतितिष्ठतुतावत्तत्रैवमोक्षःस्यान्नवेतिततआगतस्येहशरीरोपभोगादि
नसंभवतिततःशेषणेत्यादिस्मृतिविरोधश्चस्यान्नन्विष्टापूर्तदत्तव्यतिरेकेणापिमनुष्यलोकेशरीरोपभोगनिमित्तानिकर्मण्य
नेकानिसंभवंतिनचतेषांचंद्रमंडलउपभोगोतोक्षीणानितानियन्निमित्तंचंद्रमंडलमारूढस्तान्येवक्षीणानीत्यविरोधःशेषशब्दश्च
सर्वेषांकर्मत्वसामान्याद्अविरुद्धो॥तस्यवच्चतत्रैवमोक्षः[illegible]इतिभावाविरुद्धानेकयोन्युपभोगफलानांचकर्मणामेकैकस्यजन्तोरा

तेषा।

५८

रंभकत्वसंभवान्नचैकस्मिञ्जन्मनि सर्वकर्मणां क्षय उपपद्यते ब्रह्महत्यादेश्चैकैकस्य कर्मणोऽनेकजन्मारंभकत्वस्मरणात्स्थाव
रादिप्राप्तानां चात्यंतमूढानामुत्कर्षहेतोः कर्मण आरंभकत्वासंभवाच्च तेभूतानां च स्वसमानानां कर्मसे तवेससारा उपपत्तिस्तस्मा
न्नैकस्मिञ्जन्मनि सर्वेषां कर्मणामुपभोगः यत्तु केचिदुच्यते सर्वकर्माश्रयोपमर्देन प्रायणं कर्मणां जन्मारंभकत्वं तत्र केचित्कर्मा
ण्यनारंभकत्वेनेव तिष्ठंति कानिचिज्जन्मांतराण्यारभंत इति नोपपद्यते मरणस्य सर्वकर्माभिव्यंजकत्वात्स्वगोचराभिव्यंजकप्र
दीपवदिति तदसत्सर्वस्य सर्वात्मकत्वानुपगमान्न हि सर्वस्य सर्वात्मकत्वे देशकालादिनिमित्तावरुद्धत्वात्सर्वात्मनोपमर्दः कस्य

सर्वात्मनो

चिद्विदभिव्यक्तिर्वोपपद्यते तथा कर्मणां साश्रयाणां च न भवेद्यथा च पूर्वानुभूतमनुष्यमयूरमर्कटादिजन्मान्तरसंभूताविरुद्धा
नेकवासना मर्कटत्वप्रापकेन कर्मणा मर्कटजन्मारभमाणेन नोपमृद्यन्ते तथा कर्मण्यप्यन्यजन्मप्राप्तिनिमित्तानि नोपमृद्यन्त इ
ति युक्तं यदि हि सर्वाः पूर्वानुभूतवासना उपमृद्येरन्मर्कटजन्मनिमित्तेन कर्मणा मर्कटजन्मन्यारब्धे मर्कटस्य जातमात्रस्य मातुः शा
खायाः शाखान्तरगमने मातुरुदरसंलग्नत्वादिको यत्नं न प्राप्नोतीह जन्मन्यनभ्यस्तत्वान्नचातीतानंतरजन्मनि मर्कटत्वमेवासीत्तस्य
ति शाक्यं वक्तुं तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति श्रुतेस्तस्माद्वासनावन्नाशेषकर्मोपमर्द इति शेषकर्मसंभवाय तत एवं ततश्र
वणाप्युक्ता कर्मणः संसार उपपद्यत इति न कश्चिद्विरोधः कोसावनुशयं प्रति निवर्तंत इत्युच्यते यथेतं यथागतं निवर्तंते नतु मासेत्यः

छां०भा० पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमिति गमनक्रमउक्तो न तथा निवृत्तिः किं तर्ह्याकाशाद्वायुमित्यादि कथं यथेतमित्यस्य
तेनैष दोष आकाशप्राप्तिस्तुल्यत्वात् पृथिवीप्राप्तेश्च न त्वात्र यथेतमेवेति नियमो नैवमपि निवर्तन्ते पुनर्निवर्तन्त इति तु नियमो तउपलक्ष
णार्थमेतद्यथेतमित्यतो भौतिकमाकाशं तावत्प्रतिपद्यन्ते यास्तेषां शरीरं चन्द्रमण्डले शरीरारम्भिका आप आसुस्तास्तेषां तत्रोपभोगनिमि
त्तानां कर्मणां क्षये विलीयन्ते घृतसंस्त्यानमिवाग्निसंयोगेन विलीना अन्तरिक्षस्था आकाशभूता इव सूक्ष्मा भवन्ति ता अन्तरिक्षाद्वा
युर्भवन्ति वायुप्रतिष्ठा वायुभूता इतश्चामुतश्चोह्यमानास्ताभिः सह क्षीणकर्मा वायुभूतो भवति वायुर्भूत्वा ताभिः सहैव धूमो भवति धू
५९ श्रीः मो भूत्वाभ्रशरणमात्ररूपो भवत्यभ्रं भूत्वा ततः सेचनसमर्थो मेघो भवति मेघो भूत्वोन्नतेषु देशेषु अथ प्रवर्षति वर्षधारारूपेण शेषक ५९
र्मा पततीत्यर्थः त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इत्येवंप्रकारा जायन्ते क्षीणकर्मणामनेकत्वाद्बहुवचननिर्देशो मेघ
घादिषु पूर्वेष्वेकरूपत्वादेकवचननिर्देशो यस्माद्गिरितटदुर्गनदीसमुद्रारण्यमरुदेशादिसन्निवेशाः सहस्राणि वर्षधाराभिः पति
तानामतस्तस्माद्वै खलु दुर्निःप्रपतरं दुर्निःक्रमणं दुर्निस्तरणं यतो गिरितटादुदकस्रोतसोह्यमाना नदीः प्राप्नुवन्ति ततः समु
द्रं ततो मकरादिभिर्भक्ष्यन्ते सोऽपि अन्येन तत्रैव च सह मकरेण समुद्रे विलीनाः समुद्राम्भोभिर्जलधरैराकृष्टाः पुनर्वर्षधाराभिर्मरुदे
शे शिलातटे वा गम्य पतितास्तिष्ठन्ति कदाचिद्व्यालमृगादिपीता भक्षिताश्चान्यैस्तत्पन्ये इत्येवंप्रकाराः परिवर्तेरन् कदाचिद्भक्ष्येषु

स्थावरेषु च जातास्तत्रैव शुष्येरन् न ह्येषां पि स्थावरेषु जातानां रेतःसिग्देहसंबंधो दुर्लभ एव बहुत्वात्स्थावराणामिति अतो निडुर्निःक्र
मणं व्रीह्यथ वा तस्माद्व्रीहियवादिभावाद्दुर्निःप्रपतरं दुर्निर्गमनतरं दुर्निःप्रपतरमिति तकार एको लुप्तो द्रष्टव्यो व्रीहियवादिभा
वाद्दुर्निःप्रपततरस्तस्मादपि दुर्निःप्रपतताद्रेतस्सिग्देहसंबंधो दुर्निःप्रपततर इत्यर्थः यस्मादूर्ध्वरेतोभिर्बालैः पुंस्त्वरहितैः स्थ
विरैर्वा भक्षिता अंतराले विशीर्यंतेऽनेकत्वादन्नादानां कदाचित्काकतालीयवृत्त्या रेतस्सिग्भिर्भक्ष्यंते यदा तदा रेतस्सिग्भावं ग
तानां कर्मणो वृत्तिलाभो यो यो ह्यन्नमत्ति अनुशयिभिः संसृष्टं यश्च रेतः सिंचति ऋतुकाले योषिति तद्भूय एव तदाकृतिरेव भवति
तदवयवाकृतिर्भूयस्तं भूय इत्युच्यते रेतोरूपेण योषिति गर्भाशये तत्प्रविष्टोनुशयी रेतसो रेतस्सिगाकृतिभावितत्वात्सर्वेभ्यो
ऽङ्गेभ्यस्तेजस्संभूतमिति श्रुत्यंतरादतो रेतस्सिगाकृतिरेव भवतीत्यर्थः तथा हि पुरुषात्पुरुषो जायते गोर्गवाकृतिरेव न जात्यंत
राकृतिस्तस्माद्युक्तं तद्भूय एव भवतीति ये त्वन्येऽनुशयिभ्यश्चंद्रमंडलमनारुह्यैव पापकर्मभिर्घोरैर्व्रीहियवादिभावं प्रतिपद्य
न्ते पुनर्मनुष्यादिभावं तेषां नानुशयिनामिव दुर्निःप्रपतरं कस्मात्कर्मणा हि ते व्रीहियवादिदेहमुपात्ता इति तदुपभोगयोग्य
निमित्तक्षये व्रीह्यादिस्तंबदेहविनाशे यथाकर्मार्जितं देहान्तरं नवं नवं जलूकावत्संक्रमन्ते सविज्ञाना एव सविज्ञानो भवति स
विज्ञानमेवान्ववक्रामतीति श्रुत्यंतराद्यद्यप्युपसंहृतकरणाः संतो देहांतरं गच्छंति तथापि स्वप्नवद्देहान्तरप्राप्तिनिमित्तकर्म

छां०भा०

ज्ञाभावितवासनाज्ञानेन सविज्ञाना एव देहान्तरं गच्छंति श्रुतिप्रामाण्याद्यथार्चिरादिना धूमादिना च गमनं स्वप्नइवोद्भूतविज्ञानेन ल
ब्धवृत्तिकर्मनिमित्तत्वाद्गमनस्य। न तथानुशायिनां व्रीह्यादिभावेन जातानां सविज्ञानानामेव रेतःसिग्योषिद्देहसंबंध उपपद्यते न
हि व्रीह्यादिलवनकंडनपेषणादौ च सविज्ञानानां स्थितिरस्ति ननु चंद्रमंडलादप्यवरोहतां देहान्तरगमनस्य तुल्यत्वाज्जलूकाव
त्सविज्ञानत्वे युक्ता तथा च सति घोरो नरकानुभव इष्टापूर्तादिकारिणां चंद्रमंडलादारभ्य प्राप्तो यावद्ब्राह्मणादिजन्म तथा च स

९०

त्यनर्थायैवेष्टाद्युपासनं विहितं स्यात् श्रुतेश्चाप्रामाण्यं प्राप्तं वैदिकानां कर्मणामनर्थानुबंधित्वान्न वृक्षारोहणपतनवद्विशेषसंभ
वाद्देहाद्देहान्तरं प्रतिपित्सोः कर्मणो लब्धवृत्तित्वात्कर्मणोद्भावितेन विज्ञानेन सविज्ञानत्वं युक्तं मा वृक्षाग्रमारोहन्निव तत्फलं जि
घृक्षोस्तथार्चिरादिना गच्छतां सविज्ञानत्वं जलूकावद्धूमादिना च चंद्रमंडलमारुरुक्षतां न तथा चंद्रमंडलादवरुरुक्षतां वृक्षाग्रादिव पततां
स्वच्छेदत्वं यथा च मुद्गराद्यभिहतानां तदभिघातवेदनानिमित्तसंमूर्छितप्रतिबद्धकरणानां स्वदेहेनैव देशाद्देशान्तरं नीयमा
नानां विज्ञानशून्यता दृष्टा तथा चंद्रमंडलान्मानुषादिदेहान्तरं प्रत्यवरुरुक्षतां स्वर्गभोगनिमित्तकर्मक्षयान्मृदितदेहानां प्रति
बद्धकरणानामपरित्यक्तदेहबीजभूतानांतिरद्भिर्मूर्छितां वाकाशादिक्रमेण ममवरुह्य कर्मनिमित्तजातिस्थावरदेहैः संश्लिष्य
ते प्रतिबद्धकरणतयानुद्भूतविज्ञाना एव तथा लवनकंडनपेषणसंस्कारभक्षणरसादिपरिणामरेतस्सेचनकालेषु मूर्छितव

९०

108

नाधर्महेतुत्वं ३ नर ४

देवदेहान्तरारंभकस्य कर्मणोऽलब्धवृत्तित्वाद्देहभूतापसंबंधापरित्यागेनैव सर्वास्ववस्थासु विद्यन्ते वर्तन्त इति जलूकावत्त्वं न विरुध्य
ते तरालेत्वविज्ञानं मूर्छितवद्देवत्वदोषान्नवैदिकानां कर्मणां हिंसायुक्तत्वेनोभयहेतुत्वं शक्यमनुमातुं हिंसायाः शास्त्रचोदितत्वाद
हिंस्यात्सर्वभूतान्यन्यत्र तीर्थेभ्य इति श्रुतेः शास्त्रचोदिताया हिंसाया अधर्महेतुत्वमुपगम्यतेऽभ्युपगतेऽप्यधर्महेतुत्वे मन्त्रैर्विषादिवत्तदपनयोपप
त्तेर्न दुःखकार्यारंभकत्वोपपत्तिर्वैदिकानां कर्मणां मन्त्रेण विषभक्षणस्येति तत्र तेष्वनुशयिनाय इह लोके रमणीयं शोभनं चरणं शी
लं येषां ते रमणीयचरणा रमणीयचरणेनोपलक्षितः शोभनोऽनुशयः पुण्यं कर्म येषां ते रमणीयचरणा उच्यन्ते क्रौर्यानृतमायाव
र्जितानां हि शक्यमुपलक्षयितुं शुभानुशयसद्भावस्तेनानुशयेन पुण्येन कर्मणा चन्द्रमण्डले भुक्तशेषेणाभ्यासो ह क्षिप्रमेव यदिति क्रिया
विशेषणं ते रमणीयां क्रौर्यादिवर्जितां योनिमापद्येरन्प्राप्नुयुर्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा स्वकर्मानुरूपेणाथ पुनर्ये तद्वि
परीताः कपूयचरणोपलक्षितकर्माणोऽशुभानुशया अभ्याशो ह यत्ते कपूयां यथाकर्म योनिमापद्येरन्कपूयामेव धर्मसंबंधवर्जितां जुगु
प्सितां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा स्वकर्मानुरूपेणैव ये तु रमणीयचरणा द्विजातयस्ते स्वकर्मस्थाश्चेदिष्टा
दिकारिणस्ते धूमादिना गच्छन्त्यागच्छन्ति च पुनः पुनर्घटीयन्त्रवद्विद्यां चेत्प्राप्नुयुस्तदार्चिरादिना गच्छन्ति यदा तु न विद्यासेविनो नापीष्टादि
कर्मसेविनस्तदा तयोर्यथोक्तयोर्चिर्धूमादिलक्षणयोर्नैकतरेणाप्यन्यतरेण वा नापियन्ति तानीमानि भूतानि क्षुद्राणि दंशमशककीटादी

छां०ना०

न्यसकृदावर्तीनि भूतानि भवन्ति अतउ त्रयमार्गपरिभ्रष्टा ह्यसकृज्जायन्ते म्रियन्ते चेत्यर्थः तेषां च जननमरणसन्तते खलु कारणमिदमु
च्यते जायस्व म्रियस्वेति ईश्वरनिमित्तचेष्टा च्यते स्वतो जननमरणलक्षणेनैव कालयापना भवन्ति न तु क्रियासु भोगेषु वा कालोस्तीत्यर्थः एत
त्क्षुद्रजंतुलक्षणं तृतीयं पूर्वोक्तौ पंथानावपेक्ष्य स्थानं संसरतां नैव दक्षिणमार्गगा अपि पुनरागच्छन्त्यधिकृतानां ज्ञानकर्मणोरगमनमे
व दक्षिणेन पथेति तेनासौ लोको न संपूर्यते पंचमस्तु प्रश्नः पंचाग्निविद्यया व्याख्यातः प्रथमो दक्षिणोत्तरमार्गाभ्यामपाकृतो दक्षिणोत्तरयो
ष्पथोर्व्यावर्तनापि मृतानामग्नौ प्रक्षेपः समानस्ततो व्यावर्तन्तेऽन्योऽर्चिरादिना यत्यन्ये धूमादिना पुनरुत्तरदक्षिणायने षण्मासानाप्नुवन्तः
संयुज्य पुनर्व्यावर्तन्तेऽन्ये संवत्सरमन्ये मासेभ्यः पितृलोकमिति व्याख्याताः पुनरावृत्तिरपि क्षीणानुशयानां खंडमएउलादाकाशादिक्रमे
णा अमुष्य लोकस्यापूरणं खशब्देनैवोक्तं तेनासौ लोको न संपूर्यत इति यस्मादेवं कष्टा संसारगतिस्तस्माज्जुगुप्सेत यस्माच्च जन्ममरणजनित
वेदनाभ्युदयकृततक्षणाः क्षुद्रजन्तवो ध्वान्ते च घोरे दुरुत्तारे प्रवेशिताः सागर इवागाधेऽप्लवे निराशाश्चोत्तरणं प्रति तस्माच्चैवंविधाः संसारग
तीर्जुगुप्सेत बीभत्सेत घृणी भवेन्मा भूदेवंविधसंसारमहोदधौ घोरे पात इति तदेतस्मिन्नर्थे एष श्लोकः पंचाग्निविद्यास्तुतये स्तेनो हिरण्यस्य
ब्राह्मणसुवर्णस्य हर्ता सुरां पिबन् ब्राह्मणः सन् गुरोश्च तल्पं दारानावसन् ब्रह्महा ब्राह्मणस्य हन्ता चेति एते पतन्ति चत्वारः पंचमश्चापतितैः स
हाचरन्नित्यथ ह य एतानेवं यथोक्तान्पंचाग्नीन्वेद सह तैरप्याचरन्महापातकिभिः स न पाप्मना लिप्यते शुद्ध एव तेन पंचाग्निदर्शनेन पावितो

६१

६१

यस्मात्स्मृतः पुण्यो लोकः प्राजापत्यादिर्यस्य सोयं पुण्यलोको भवति य एवं यथोक्तं समस्तं पंचाग्नि प्रश्नैः पृष्टमर्थजातं वेद हि सत्ति समस्त
प्रश्ननिर्णयप्रदर्शनार्थो॥ ॥दक्षिणेन पथा गच्छतामन्नभाव उक्तः स तु देवानाम् अन्नं तं देवा भक्षयन्तीति निकृष्टजन्मलक्षणा च कष्टा संसा
रगतिरुक्ता तदुभयदोषपरिजिहीर्षया वैश्वानरात्मभावप्रतिपत्त्यर्थमुत्तरो ग्रंथ आरभ्यते ऽत्स्यन्नं पश्यसि प्रियमित्यादिलिंगादाख्या
यिका तु सुखावबोधार्था विद्यासंप्रदानन्यायप्रदर्शनार्था च। प्राचीनशाल इति नामत उपमन्योरपत्यमौपमन्यवः सत्ययज्ञो नामतः पु
लुषस्यापत्यं पौलुषिस्तथेंद्रद्युम्नो नामतो भल्लवेरपत्यं भाल्लविस्तस्यापत्यं भाल्लवेयो जन इति शार्कराक्ष्यस्यापत्यं शार्कराक्ष्यो बुडिलो नाम
तोश्वतराश्वस्यापत्यमाश्वतराश्विः पंचापि ते हैते महाशाला महागृहस्था विस्तीर्णाभिः शालाभिः संयुक्ताः संपन्ना इत्यर्थः महाश्रोत्रियाः
श्रुताध्ययनवृत्तसम्पन्ना इत्यर्थः ते एवंभूताः सन्तः समेत्य संभूय क्वचिन्मीमांसां विचारणां चक्रुः कृतवन्त इत्यर्थः कथं को न आत्मा
किं ब्रह्मेत्यात्मब्रह्मशब्दयोरितरेतरविशेषणविशेष्यत्वं ब्रह्मेत्यध्यात्मपरिच्छिन्नमात्मानं निवर्त्तयत्यात्मेति चात्मव्यतिरिक्तस्यादित्यादिब्रह्म
ण उपास्यत्वं निवर्त्तयत्यभेदेनात्मैव ब्रह्म ब्रह्मैवात्मेत्येवं सर्वात्मा वैश्वानरो ब्रह्म स आत्मेत्येतत्सिद्धं भवति मूर्द्धादिषु पादप्रतिष्ठे द्युलोकादिदृष्ट्या
त्यादिलिंगात्ते ह मीमांसन्तोपि निश्चयमलभमानाः संपादयांचक्रुः संपादितवन्त आत्मन उपद्रष्टारमुद्दालको वै प्रसिद्धो नामतो भगवन्तः
अयमारुणिररुणस्यापत्यं संप्रतीममात्मानं वैश्वानरमस्मदभिप्रेतमध्येति स्मरति तं हंत इदानीमभ्यागच्छामेत्येवं निश्चि

छां॰ भा॰

६२

त्यतं हाभ्याजग्मुस्तं ह गतवन्त आरुणिः स ह तान्दृष्ट्वैव तेषामागमनप्रयोजनं बुद्ध्वा संपादयां चकार कथं प्रक्ष्यन्ति मां वैश्वानरमिमे महा
शाला महाश्रोत्रियास्तेभ्योऽहं न सर्वमिव पृष्टं प्रतिपत्स्ये वक्तुं नोत्सहेऽतो हंताहमिदानीमन्यमहमेषामभ्यनुशासानि वक्ष्याम्युपदेष्टा
रमित्येवं संपाद्य तान्होवाचाश्वपतिर्वै नाम भगवन्तोऽयं केकयस्यापत्यं कैकेयः संप्रति सम्यगिममात्मानं वैश्वानरमध्येतीत्यादि समा
नं तेभ्यो ह राजा प्राप्तेभ्यः पृथक्पृथगर्हाणि अर्हणानि पुरोहितैर्भृत्यैश्च कारयां चकार कारितवान्स ह अन्येद्युः राजा प्रातः संजिहान उवाच विनय
मेनोपगम्य इदं धनं मत्त उपादद्ध्वमिति स तैः प्रत्याख्यातो मयि दोषं पश्यन्ति नूनं यतो न प्रतिगृह्णन्ति मत्तो धनमिति मन्वान आत्मनः सद्वृत्त
तां प्रतिपिपादयिषन्नाह न मे मम जनपदे स्तेनः परस्वहर्ता विद्यते न कदर्यो अदाता सति विभवे न मद्यपो द्विजोत्तमः सन्नानाहिताग्निः शतगुर्नो
विद्वानधिकारानुरूपं न स्वैरी परदारेषु गन्ता अत एव स्वैरिणी कुतो दुराचारिणी न संभवतीत्यर्थः ते च न वयं धनेनार्थिन इत्युक्ता आहो
मत्वैतद्धनं न गृह्णन्तीति यक्ष्यमाणो वै कतिभिरहोभिर्वै हे भगवन्तोऽहमस्मि तदर्थं कॢप्तं धनं यावदेकैकस्मै यथोक्तमृत्विजे धनं दास्यामि
तावत्प्रत्येकं भगवद्भ्योऽपि दास्यामि वसन्तु भगवन्तः पश्यन्तु च मम यागमित्युक्तास्ते ह ऊचुर्येन हैवार्थेन प्रयोजनेन यं प्रति चरेद्गच्छे
त्पुरुषस्तं हैवार्थं वदेदिदं मप्रयोजनमागमनस्येत्ययं न्यायः सतां वयं च वैश्वानरज्ञानार्थिन आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि सम्य
ग्जानासि तमेव नोऽस्मभ्यं ब्रूहीत्युक्तस्तान्होवाच प्रातर्वो युष्मभ्यं प्रतिवक्तास्मि प्रतिवाक्यं दातास्मीत्युक्तास्ते ह राज्ञोऽभिप्रायज्ञाः समि

६२

112

त्पाणयः समिद्भारहस्ताः अपरेद्युः पूर्वाह्णे राजानं प्रतिचक्रमिरे गतवन्तः य एवं महाशाला महाश्रोत्रिया ब्राह्मणाः सन्तो महाशा
लत्वाद्यभिमानं हित्वा समिद्भारहस्ता जातितो हीनं राजानं विद्यार्थिनो विनयेनोपजग्मुस्तथान्यैर्विद्योपादित्सुभिर्भवितव्यं तेभ्यश्चादा
द्विद्यामनुपनीयैवोपनयनमकृत्वैव तान्यथा योग्येभ्यो विद्यामदात्तथान्येनापि विद्या दातव्येत्याख्यायिकार्थः एतद्वैश्वानरविज्ञानमु
वाचेति वक्ष्यमाणेन संबन्धः स कथमुवाचेत्याह औपमन्यव हे कमात्मानं वैश्वानरं त्वमुपास्स इति पप्रच्छ न च यमपन्यायः आचार्य
स्वशिष्यं पृच्छतीति निषद्धोपाय इत्येतेनोपसीदेत्ततऊर्ध्वं वक्ष्यामीति न्यायदर्शनादन्यत्राप्याचार्यस्य प्रतिज्ञानवति शिष्ये प्रतिज्ञो
त्पादनार्थः प्रश्नो दृष्टोऽजातशत्रोः क्वैष तदाभूत्कुत एतदागादिति दिवमेव द्युलोकमेव वैश्वानरमुपासे भगवो राजन्निति होवाचैष
वै सुतेजाः शोभनं तेजो यस्य सोऽयं सुतेजा इति प्रसिद्धो वैश्वानर आत्मात्मनोऽवयवभूतत्वाद्यं त्वमात्मानमात्मैकदेशमुपास्से तस्मात्त
तेजसो वैश्वानरस्योपासनात्तव सुतमभिषुतं सोमरूपं कर्मणि प्रसुतं प्रकर्षेण सुतमासुतं त्वाहर्गणादिषु तव कुले दृश्यतेऽतीव क
र्मिणस्त्वत्कुलीना इत्यर्थः अत्स्यन्नं दीप्ताग्निः सन्पश्यसि पुत्रपौत्रादि प्रियमिष्टमन्योऽप्यत्त्यन्नं पश्यति च प्रियं त्वत्तस्यापि सुतं प्रसु
तमासुतमित्यादि कर्मित्वं ब्रह्मवर्चसं कुले यः कश्चिदेनं यथोक्तमेवं वैश्वानरमुपास्ते मूर्धा त्वेष वैश्वानरस्य न समस्तो वैश्वानरोऽतः सम
स्तबुद्ध्या वैश्वानरस्योपासनान्मूर्धा शिरस्ते विपरीतग्राहिणो व्यपतिष्यद्विपतितमभविष्यद्यद्यदि मां नागमिष्यो नागतोऽभविष्यः सा

छां॰ ता॰

ध्वं कार्पोर्यन्मामागतोऽसीत्यञ्जिआयश॥ अथ होवाच सत्ययज्ञं पौलुषिं हे प्राचीनयोग्य कमात्मानमुपास्स इति आदित्यमेव भगवो राज
न्निति होवाच शुक्लनीलादिरूपत्वाद्विश्वरूपत्वमादित्यस्य सर्वरूपत्वाद्वा सर्वाणि हि रूपाणि त्वाष्ट्राणि यतो तो वा विश्वरूप आदित्यस्तदु
पासनात्तव बहु विश्वरूपमिहामुत्रार्थमुपकरणं दृश्यते कुले किं च त्वामनु प्रवृत्तो ऽश्वतरीरथो युक्तो रथोऽश्वतरीरथो दासीनिष्को दासी
भिर्युक्तो निष्को हारो दासीनिष्को॥ त्यन्नमित्यादि समानं चक्षुर्वैश्वानरस्य सविता तस्य समस्तदृष्ट्योपासनादन्धोऽभविष्यश्चक्षुर्नाभवि
ष्याद्यन्मां नागमिष्य इति द्वं द्वं वः॥ अथ होवाचेंद्रद्युम्नं भाल्लवेयं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इत्यादि समानम्॥ पृथग्वर्त्मात्मा ना

६३

नावर्त्मा नियस्य वायोरा हवोद्वा हादिर्निर्दैर्वर्तमानस्य सोऽयं पृथग्वर्त्मात्मा वायुस्तस्मात् पृथग्वर्त्मात्मनो वैश्वानरस्योपासनात्त्वयं
नादिष्का त्वां वलयोवस्त्रान्नादिलक्षणावलय आयन्त्या गच्छन्ति पृथग्रथश्रेणयो रथपंक्तयो पित्वामनुयन्त्यत्स्यन्नमित्यादि समानम्॥
प्राणस्त्वेष आत्मन इति होवाच प्राणस्तेत उदक्रमिष्यदुत्क्रान्तोऽभविष्यद्यन्मां नागमिष्य इति॥ अथ होवाच जनमित्यादि समानम्॥ एष
वै बहुल आत्मा वैश्वानरो बहुलत्वमाकाशस्य सर्वगतत्वाद्बहुलगुणोपासनात्त्वं बहुलोऽसि प्रजया पुत्रपौत्रादिलक्षणया धने
न च हिरण्यादिना संदेहस्त्वेष संदेहो मध्यमं शारीरं वैश्वानरस्य देहरूपस्य यार्थत्वान्मांसरुधिरास्थ्यादिदीनश्च बहुलं शारीरं तत्संदे
हस्ते तव शारीरं व्यशीर्यच्छीर्यमभविष्यद्यन्मां नागमिष्य इति॥ अथ होवाच बुडिलमाश्वतराश्विमित्यादि समानम्॥ एष वै रयिरात्मा

र्ण१

६३

वैश्वानरो धनरूपो ह्योऽन्नं ततो धनमिति तस्माद्रयिमान्धनवांस्त्वं पुष्टिमांश्च शरीरेण पुष्टे न स्वान्ननिमित्तत्वाद्रयिस्त्वेष आत्मनो वैश्वानर
स्य बस्तिर्मूत्रसंहारस्थानं बस्तिस्त्वयैतस्य भिन्नो न विषयस्य नमां नागमिष्य इति ॥ अथ होवाचोद्दालकमित्यादि समानम् ॥ पृथिवीमेव भगव
राजन्निति होवाचैष वै प्रतिष्ठा पादौ वैश्वानरस्य पादौ ते व्यम्लास्येतां विम्लानावविष्येतां श्लथीभूतौ यन्मां नागमिष्य इति ॥ तान्होवाच यथोक्तवैश्वानर
दर्शनवतो होवाच ते यूयं वै खल्वित्यनेकः यूयं पृथगिवात्मानं पृथक् सन्तमिममेकं वैश्वानरं विद्वांसो न मन्नं परिच्छिन्नबुद्ध्या हस्तिदर्शन इव जा
त्यन्धा यस्त्वेतमेवं यथोक्तावयवैर्द्युमूर्धादिभिर्विशिष्टमेकं प्रादेशमात्रं प्रदेशैर्द्युमूर्धादिभिः पृथिवीपादान्तैरध्यात्मं मीयते ज्ञायत इति प्रादेश
प्रादेशमात्रं मुखादिषु करणेष्वनुत्वेन मीयत इति प्रादेशमात्रो द्युलोकादि पृथिव्यन्तप्रदेशपरिमाणो मात्रा वा प्रादेशमात्रः प्रकर्षेण शास्त्र
णादिश्यत इति प्रादेशा द्युलोकादयस्तावत्परिमाणः प्रादेशमात्रः शाखान्तरे तु मूर्धादिश्चिबुकप्रतिष्ठ इति प्रादेशमात्रं कल्पयन्ति
इह तु न तथाभिप्रेतस्तस्य ह वा एतस्यात्मन इत्याद्युपसंहारात् प्रत्यगात्मतयाभिविमीयतेऽहमिति ज्ञायत इत्यभिविमानस्तमेतमात्मानं
वैश्वानरं विश्वान्नरान्नयतीति पुण्यपापानुरूपां गतिं सर्वात्मेषहेश्वरो वैश्वानर एव वा विश्वात्मकत्वाद्विश्वे वा नराः प्रत्यगात्मतया प्रविभज्यन्ते
यत इति वैश्वानरस्तमेवमुपास्ते यः सोऽन्नमत्ति सर्वेषु लोकेषु द्युलोकादिषु सर्वेषु भूतेषु चराचरेषु सर्वेष्वात्मसु शरीरेन्द्रियमनोबुद्धिषु
तेष्वात्मकल्पनाव्यपदेशः प्राणिनामन्नमत्ति वैश्वानरवित्सर्वात्मा सन्नन्नमत्ति न यथाज्ञः पिण्डमात्राभिमानः सन्नित्यर्थः कस्मादेवं यस्मा

छां०भा०

तस्य ह वै प्रकृतस्यैवैतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादा
वथवा विद्यार्थमेतद्वचनमेवमुपास्य इत्यथेदानीं वैश्वानरविदो भोजनेऽग्निहोत्रं संपिपादयिषन्नाह। एतस्य वैश्वानरस्य भोक्तुरुर एव वेदिर्वेद्या
कारसामान्याल्लोमानि बर्हिर्वेद्यामिवोरसि लोमान्यास्तीर्णानि दृश्यन्ते हृदयं गार्हपत्यो हृदयाद्धि मनः प्रणीतमिवानन्तरीभवति मनोऽन्वा
हार्यपचनोऽग्निर्मन आस्यं मुखमाहवनीय इवाहवनीयो हूयते ह्यस्मिन्नन्नमिति। तत्रैवं सति यदुक्तं भोजनकाले आगच्छेद्भोजनार्थं तद्धो
मार्थं होमीयं तद्भोक्ता यमग्निहोत्रसम्पन्नात्तस्य विवक्षितत्वान्नाग्निहोत्रमिति कर्तव्यताप्राप्तिरिह सतो कार्यं प्रथमामाहुतिं जुहुयात्तां कथं

६४

जुहुयादित्याह प्राणाय स्वाहेत्यनेन मन्त्रेण आहुतिशब्दाद् अवदानप्रमाणमन्नं प्रक्षिपेदित्यर्थः तेन प्राणस्तृप्यति प्राणे तृप्यति चक्षुस्तृप्यति
चक्षुरादित्यो द्यौश्चेत्यादि तृप्यति यच्चान्यद् द्यौश्चादित्यश्च स्वामित्वेनाधितिष्ठतस्तत्तृप्यति तस्य तृप्तिमनु स्वयं भुञ्जानस्तृप्यत्येवं प्रत्यक्षं किं
प्रजादिभिश्च तेजः शरीरगता दीप्तिरुज्ज्वलत्वं प्रागल्भ्यं वा ब्रह्मवर्चसं वृत्तस्वाध्यायनिमित्तं तेजः। अथ या द्वितीयां तृतीयां चतुर्थीं पञ्चमी
मिति समानमन्यत्। स य इदं वैश्वानरदर्शनं यथोक्तमविद्वान् सन्नग्निहोत्रं प्रसिद्धं जुहोति यथाङ्गारानाहुतियोग्यानपोह्यानाहुति
स्थाने भस्मनि जुहुयात्तादृक् तत्तुल्यं तस्य तदग्निहोत्रहवनं स्याद्वैश्वानरविदोऽग्निहोत्रमपेक्ष्येति प्रसिद्धाग्निहोत्रं निन्द्यते वैश्वानरविदोऽग्निहोत्रं
स्तूयते इत्यत्र तद्विशिष्टमग्निहोत्रं कथम् अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य यथोक्तवैश्वानरविज्ञानवतः सर्वेषु लोकेषु [illegible]

६४

ऊतमन्नमत्तीत्यप्पन्नयोरेकार्थत्वात्किंचतद्यथाइषीकायास्तूलमग्नौप्रोतंप्रक्षिप्तंप्रदूयेतेप्रदह्येतक्षिप्रमेवंहास्यविदुषःसर्वात्मभूतस्य
सर्वान्नानामत्तुःसर्वेनिरवशिष्टाःपाप्मानोधर्माधर्माख्याअनेकजन्मसंचिताइहचप्राग्ज्ञानोत्पत्तेर्ज्ञानसहभाविनश्चप्रदूयन्तेप्रदह्येरन्वर्त्त
मानशरीरारंभकपाप्मवर्ज्यंलक्ष्यंप्रतिमुक्तेषुवत्प्रवृत्तफलत्वात्तस्यनदाहोयएतदेवंविद्वानग्निहोत्रंजुहोतिउक्तोसयद्यपिचंडालायोच्छिष्टा
नर्हायोच्छिष्टंप्रयच्छेद्दद्यात्प्रतिषिद्धमुःच्छिष्टदानंयद्यपिकुर्यादात्मनिहैवास्यचंडालदेहस्थेवैश्वानरेतद्धुतंस्यान्नाधर्मनिमित्तमितिवि
द्यामेवस्तौतितदेतस्मिन्नर्थेश्लोकोमंत्रोप्येषभवतियथेहलोकेक्षुधिताबुभुक्षिताबालामातरंपर्युपासतेकदानोमातान्नंप्रयच्छतीत्ये
वंसर्वाणिभूतान्यन्नादानिएवंविदोग्निहोत्रंभोजनमुपासतेकदात्वसौभोक्ष्यतइति सर्वंविद्धिभोजनेनतृप्तंभवतीत्यर्थोद्विरुक्तिरध्या
यपरिसमाप्त्यर्था ॥ ॥इतिश्रीगोविन्दभगवत्पूज्यपादशिष्यस्यपरमहंसपरिव्राजकाचार्यस्यश्रीशंकरभगवतःकृतौछांदोग्योपनिष
द्विवरणेसप्तमःप्रपाठकःसमाप्तः ॥ ॥श्रीकृष्ण॥ ॥श्वेतकेतुर्हारुणेयआसतस्यव्याख्यासंबंधःसर्वंखल्विदंब्रह्मतज्जला
नितीत्युक्तंकथंतस्माज्जगदिदंजायतेतस्मिन्नेवचलीयतेअनितिचतेनैवचेत्येतद्वक्तव्यमनंतरंचैकस्मिन्नुक्तेविज्ञाते
सर्वंजगदिदंभवतीत्युक्तंतदेकत्वेसत्यात्मनःसर्वभूतस्थस्योपपद्यतेनात्मभेदेकथंचतदेकत्वमितितदर्थोयंष
ष्ठोध्यायआरभ्यतेपितापुत्राख्यायिकायोविद्यायाआरिष्टत्वप्रदर्शनार्थाश्वेतकेतुरितिनामतोहइत्यैतिह्यार्थःआ

६

…ौ७

रुणेयो रुणस्यापौत्रः आस बभूव तं ह उद्दालकोरुणिः पिता योग्यं विद्याभाजनं मत्वा तस्योपनयनकालात्ययं च पश्यन्नुवा
च हे श्वेतकेतोनुरूपं गुरुं कुलस्यास्मा गत्वा वस ब्रह्मचर्यं न चैतद्युक्तं यदस्मत्कुलीनो हे सोम्याननूच्यानधीत्य ब्रह्मबन्धु
रिव भवतीति ब्राह्मणान्बन्धून्व्यपदिशति न स्वयं ब्राह्मणवृत्त इति तस्मात्तः प्रवासितोनुमीयते पितुर्येन स्वयं गुणवान्स
न्नोपनेष्यति पुत्रं । स पित्रोक्तः श्वेतकेतुर्द्वादशवर्षः सन्नुपेत्याचार्यं यावच्चतुर्विंशतिवर्षो बभूव तावत्सर्वान्वेदांश्चतुरोपि
धीत्य तदर्थं च बुद्ध्वा महामना महन्मनो गंभीरं यस्य स ममात्मानमन्यैर्मन्यमानं मनो यस्य सोयं महामना अनूचानमान्यनूचान
मात्मानमन्यत इत्येवंशीलो यः सोनूचानमानी स्तब्धोप्रणतस्वभाव एयाय गृहं तमेवं स्तब्धं महामनोननुरूपशीलं स्तब्ध
मानिनं पुत्रं दृष्ट्वा पितोवाच सद्वृत्तावतारं चिकीर्षया श्वेतकेतो यन्विदं महामना अनूचानमानी स्तब्धश्चासि कस्तेतिशयः
प्राप्त उपाध्यायात् उत पितः मादेशमादिश्यत इत्यादेशः केवलशास्त्राचार्योपदेशगम्यमित्येतद्येन वा परं ब्रह्मादिश्यते स
आदेशस्तमप्राक्ष्यः पृष्टवानसि आचार्यं तमादेशं विशिनष्टि येनादेशेन श्रुतेनाश्रुतमप्यन्यच्छ्रुतं भवत्यमतं मतमत
र्कितं तर्कितं भवत्यविज्ञातमनिश्चितं निश्चितं भवतीति । सर्वानपि वेदानधीत्य सर्वं चान्यद्वेद्यमधिगम्याप्यकृतार्थ एव भवति
यावदात्मतत्त्वं न जानातीत्याख्यायिकातोवगम्यते तदेतदद्भुतं श्रुत्वाह कथं न्वेतदप्रसिद्धमन्यविज्ञानेनान्यद्विज्ञात

६५

६५

118

खुप्रवृत्तीनां वाग्मित्वं प्राणवत्त्वं चेत्याद्यविरुद्धमित्येवं प्रत्यायितः श्वेतकेतुराह। भूय एव पुनरेव मा मां भगवानन्नम
यं हि सोम्य मन इत्यादि विज्ञापयतु दृष्टान्तेनावगमयतु नाद्यापि ममास्मिन्नर्थे सम्यङ्निश्चयो जातो यस्मात्तेजोबन्न
मयत्वेनाविशिष्टे देह एकस्मिन्नुपयुज्यमानान्यन्नाप्तेजांसि तान्यणिष्ठधातुरूपेण मनःप्राणवाच उपचिन्वन्ति स्वजा
त्यनतिक्रमेणेति दुर्विज्ञेयमित्यभिप्रायः अतो भूय एव त्वाह। तमेवमुक्तवन्तं तथास्तु सोम्येति होवाच पिता शृणु
तत्र दृष्टान्तं यथैतदुपपद्यते यत्पृच्छसि। दध्नः सोम्य मथ्यमानस्य योऽणिमाऽणुभावः स ऊर्ध्वः समुदीषति संभूय ऊर्ध्वं न
वनीतभावेन गच्छति तत्सर्पिर्भवति यथायं दृष्टान्तः एवमेव खलु सोम्यान्नस्यौदनादेरद्यमानस्य भुज्यमानस्यौदर्येणा
ग्निना वायुसहितेन खजेनेव मथ्यमानस्य योऽणिमा तत्स ऊर्ध्वः समुदीषति तन्मनो भवति मनोऽवयवैः सह संभूय मन उ
पचिनोतीत्येतत्। तथापां सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवतीत्येवमेव खलु सोम्य तेजसोऽश्य
मानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति। अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति युक्तमेव
मयोक्तमित्यभिप्रायः। अस्तु तत्सर्वमेवं मनस्त्वन्नमयमित्यत्र मम नैकान्तेन निश्चयो जातो भूय एव मा भगवान्मनसो

छां॰ भा॰

न्नमयत्वं दृष्टान्तेन विज्ञापयिष्यामीति तथा सोम्येति होवाच पिता । अन्नस्य भुक्तस्य योऽणिष्ठो धातुः स मनसि शक्तिमधात् सा
न्नोपचिता मनसः शक्तिः षोडशधा प्रविभक्ता पुरुषस्य कलात्वेन निर्दिदिक्षिता तया मनस्यन्नोपचितया शक्त्या षोड
शधा प्रविभक्तया संयुक्तस्तद्वान् कार्यकरणसंघातलक्षणो जीवविशिष्टः पुरुषः षोडशकल उच्यते यस्यां सत्यां द्रष्टा
श्रोता मन्ता बोद्धा कर्ता विज्ञाता सर्वक्रियासमर्थः पुरुषो भवति हीयमानायां च यस्यां सामर्थ्यहानिः । वक्ष्यति चाथा
न्नस्यायी द्रष्टा भवतीत्यादि सर्वस्य कार्यकरणस्य सामर्थ्यं मनःकृतमेव । मानसेन हि बलेन संपन्ना बलिनो दृश्यन्ते लोके ध्या

७५

नाहाराश्च केचित् अन्नस्य सर्वात्मकत्वादतोऽन्नकृतं मानसं वीर्यम् । षोडशकला यस्य पुरुषस्य सोऽयं षोडशकलः पुरुष
एतच्चेत् प्रत्यक्षीकर्तुमिच्छसि पञ्चदशाहानि मा अशीः अशनं माकार्षीः कामं यथेष्टमपः पिब यस्मादपः पिब
तोऽपस्ते प्राणो न विच्छेत्स्यते विच्छेदमापत्स्यते यस्मादापोमयः विकारः प्राण इत्यवोचाम न हि कार्यं स्वकारणोपष्टम्भमन्त
रेणाविच्छिद्यमानस्थातुमुत्सहते स ह एवं श्रुत्वा मनसोऽन्नमयत्वं प्रत्यक्षीकर्तुमिच्छन् पञ्चदशाहानि नाशाशनं न भु
क्तवान् अथ षोडशेऽहनि हैनं पितरमुपससाद उपगतवानुपगम्योवाच किं ब्रवीमि भो इति इतर आह । ऋचः सोम्य यजूं

७५

120
119

खलु

षिसामान्यधीश्चेत्फलकं॥ पितामह न वै मामामृगादीनि प्रति वान्निममममनसि नहरयत इत्यर्थः॥ हे भो भगवन्नित्यफलकवचं
पिताह। शृणु तत्र कारणं येन ते ऋगादीनि न प्रति तान्नितं होवाच यथा लोके सोम्य महतो महत्परिमाणस्याभ्याहितस्यो
पचितस्यैधनै रमेरेकोऽगारः॥ खद्योतमात्रः॥ खद्योतपरिमाणः॥ शान्तस्य परिशिष्टो विशिष्टः॥ स्याद्वै तेनांगारेण ततोपि
तत्परिमाणादीषदपि न बहु दहेदेवमेव ते तव सोम्यान्नोपचितानां षोडशानां कलानामेका कलावशिष्टाति शिष्टा वशि
ष्टा स्यात्तया त्वं खद्योतमात्रांगारतुल्यया तर्हि इदानीं वेदान्नानुभवसि न प्रतिपद्यसे॥ श्रुत्वा च मे ममाथ विज्ञास्यस्था
स्यानन्तु श्वेताव त्सहतथैवाशानुक्रमवार। अथान्नं तत्र हेनं पितरं शुश्रूषुरुपससाद तं होपगतं ऊतवं यत्किंच ऋगादिषु प्रश्न
कृयं यत्स्वरूपमर्थजातं वा पिता सपृच्छेत्तके तु॥ सर्वं है तत्प्रतिपेदे ऋगाद्यर्थतो ग्रंथतश्चैतं होवाच पुनः पिता यथा सोम्य महतो
तो भ्याहितस्येत्यादि समानम्। एकमंगारं शान्तस्याग्नेः॥ खद्योतमात्रं परिशिष्टं तत्तृणैश्चूर्णैश्चोपसमाधाय प्रज्वालयेद्धर्द्धये
येत्तेन इद्धेनांगारेण ततोपि पूर्वपरिमाणाद्बहु दहेदेवं सोम्यान्न कलानां सामर्थ्यरूपाणामेका कलातिशिष्टाऽभूदतिशिष्टासी
त्सा वर्द्धिताहानि अनुक्रमवत एकैकेनाह्नैकैका कला चंद्रमस इवापरपक्षे क्षीणासातिशिष्टा कलान्नवानेनानुक्रमेणोपसमा

छां० ना०

हितासंवर्द्धितोपचिताप्राज्ञालीदेर्घ्यछांदसम्। प्रज्ञाः लिता वर्द्धिते त्यर्थः। तया वर्द्धितया तर्हीदानीं वेद। ननु नवस्फपलमसे।
एवं व्याहृत्यनुवृत्तिभ्याम् अन्नमयत्वं मनसः सिद्धमित्युपसंहरति। अन्नमयं हि सोम्य मन इत्यादि। यथैतन्मनसोन्नमयत्वं च सि
द्धं तथापोमयः प्राणस्तेजोमयी वागित्येतदपि सिद्धमेवेत्यभिप्रायः। तदेतद्धास्य पितुरुक्तं मनआदीनाम् अन्नादिमयत्वं विज्ञ
द्वौ ज्ञातवान् श्वेतकेतुरत्यासक्तिदृष्टकारण प्रकरणसमाप्त्यर्थः। अस्मिन्मनसि जीवेनात्मनानुप्रविष्टा परा देवता दर्श इव पुरु
षः प्रतिबिंबेन जलादिष्विव च सूर्यादयः प्रतिबिंबैः। तन्मनो नैमयं तेजोमय्या वाचा प्राणाभ्यां संगतमधिगतं यन्मयो यत्स्थ

७६

स्वजीवो मननदर्शनश्रवणादिव्यवहाराय कल्पते तदुपरमे च स्वं देवतारूपमेव प्रतिपद्यते। तदुक्तं अन्यत्र ध्यायतीव लेलाय
तीव स धीः स्वप्नो भूत्वेमं लोकमतिक्रामति स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमय इत्यादि स्वप्नेन शारीरमित्यादि प्राणान्ने
व प्राणो न वतीत्यादि तस्यास्य मनस्थस्य मन आख्यां गतस्य मन उपरमद्वारेणेंद्रियविषयेभ्यो निवृत्तस्य यस्यां परस्यां देव
तायां स्वात्मभूतायां पवदेस्थानं तत्सुवायाचिरस्यासुरुद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाचोक्तवान्। स्वप्नान्तं स्वप्नम
ध्यं स्वप्नं इति दर्शनवृत्तेः स्वप्नस्यास्यात् तस्य मध्यं स्वप्नान्तं सुषुप्तमित्येतत्। अथवा स्वप्नान्तं स्वप्नसतत्त्वमित्यर्थः। तत्राप्यर्थात् सु

७६

122

सुप्तमेव भवति स्वमपीतीति वचनान्नान्यत्र सुषुप्तात् स्वमपीतिं जीवस्येच्छन्ति ब्रह्मविदः स्वच ह्यादर्शापनये पुरुषप्रतिबिंब
आदर्शगतो यथा स्वमेव पुरुषमपीतो भवत्येवं मनआद्युपरमे चैतन्यप्रतिबिंबरूपेण जीवेनात्मना मनसि प्रविष्टा नामरूप
व्याकरणाय परा देवता सा स्वमेवात्मानं प्रतिपद्यते जीवरूपतां मनआख्यां हित्वा ऽतः सुषुप्त एव स्वप्नान्त इत्याह वाच्य इत्यव
गम्यते यत्र तु सुषुप्तः स्वप्नान्पश्यति तत्स्वापं दर्शनं सुखदुःखसंयुक्तमिति पुण्यापुण्यकार्यं पुण्यापुण्ययोर्हि सुखदुःखारंभ
कत्वं प्रसिद्धं पुण्यापुण्ययोश्चाविद्याकामोपष्टंभेनैव सुखदुःखतत्कार्यारंभकत्वमुपपद्यते नान्यथेत्यविद्याकामक
र्मभिः संसारहेतुभिः संयुक्त एव स्वप्न इति न स्वमपीतो भवति अनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छो
कान् हृदयस्य भवति तद्वा अस्यैतदतिच्छन्दा एष परमानन्द इत्यादिश्रुतिभ्यः सुषुप्त एव स्वं देवतारूपं जीवत्वविनिर्मुक्तं द
र्शयिष्यामीत्याह स्वप्नान्तं मे मम निगदतो हे सोम्य विजानीहि विस्पष्टमवधारयेत्यर्थः कदा स्वप्नान्तो भवतीत्युच्यते यत्र
यस्मिन्काले एतन्नाम भवति पुरुषस्य स्वपितीति तत्प्रसिद्धं हि लोके स्वपितीति गौणं चेदं नामेत्याह यदा स्वपितीत्युच्यते पुरुषस्त
दा तस्मिन्काले सता सच्छब्दवाच्यया प्रकृतया देवतया संपन्नो भवति संगत एकीभूतो भवति मनसि प्रविष्टं मनआदिसंसर्ग

छां०उ० क्तं जीवरूपं परित्यज्य स्वं सद्रूपं यत्परमार्थसत्यमपीतोऽपिगतो भवति अतस्तस्मात्स्वपितीत्येनमाचक्षते लौकिकाः। स्वमात्मानं हि
यस्मादपीतो भवति गुणनामप्रसिद्धिर्वापि स्वात्मप्राप्तिर्गम्यत इत्यभिप्रायः कथं पुनर्लौकिकानां प्रसिद्धिः स्वात्मसंपत्तिर्जाग्रच्छ्र
मनिमित्तोद्भवत्वात्स्वापस्यता हुः। जागरिते हि पुण्यापुण्यनिमित्तसुखदुःखाद्यनेकायासानुभवाच्छ्रान्तो भवति तत्श्चायस्तानां
करणानामनेकव्यापारनिमित्तग्लानानां स्वव्यापारेभ्य उपरमो भवति श्रुतेश्च। श्राम्यति वाक् श्राम्यति चक्षुरित्येवमादि गृहीता
७७ वाग्गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मन इत्येवमादीनि करणानि प्राणग्रस्तानि प्राण एकोऽश्रान्तो देहे कुलाये यो जागर्ति तदा जीवः ७७
श्रमापनुत्तये स्वं देवतारूपमात्मानं प्रतिपद्यते नान्यत्र स्वरूपावस्थानाच्छ्रमापनोदः स्यादिति युक्ता प्रसिद्धिर्लौकिकानां स्वं
ह्यपीतो भवतीति दृश्यते हि लोके ज्वरादिरोगग्रस्तानां तद्विनिर्मोके स्वात्मस्थानां विश्रमणं तद्वदिहापि स्यादिति युक्तम्। तद्य
था श्येनो वा सुपर्णो वा विपरिपत्य श्रान्त इत्यादि श्रुतेश्च। तत्रायं दृष्टान्तो यथोक्तेऽर्थे स यथा शकुनिः पक्षी शाकुनिघातकस्य
हस्तगतेन सूत्रेण प्रबद्धः पाशितो दिशं दिशं बन्धनमोक्षार्थी सन्पतित्वान्यत्र बन्धनादायतनमाश्रयं विश्रमणाया
लब्ध्वा प्राणबंधनमेवोपश्रयत एवमेव यथा दृष्टान्तः खलु हे सोम्य तन्मनस्तत्प्रकृतं षोडशकलमन्नोपचितं मनो निर्द्धारितम्।

तत्प्रविष्टस्तत्तत्स्तदुपलक्षितो जीवस्त्वमनेनेति निर्दिश्यते मंत्रकोशानन्दमन आख्योपाधिर्जीवोऽविद्याकामक
र्मोपदिष्टो दिशां सुखदुःखादिलक्षणां नायु स्वप्नयोः प्रतिबोगत्वा तु पुनर्येत्यर्थः अन्यत्र सदाख्यां त्वात्मनः आयतनं
विश्रमणस्थानमलब्ध्वा प्राणमेव प्राणेन सर्वकार्यकरणाश्रयेणोपलक्षिता प्राण इत्युच्यते सदाख्या परा देवता प्राणस्य
प्राणं प्राणशरीरो भारूप इत्यादिश्रुतेः तस्तां देवतां प्राणं प्राणाख्यामेवोपश्रयते प्राणबंधनं यस्य मनसस्तत् प्राणबंध
नं हि यस्मात्सोम्य मनः प्राणोपलक्षितदेवताश्रयं मन इति तदुपलक्षितो जीव इत्येवं स्वपितिनामप्रसिद्धिद्वारेण यज्जी
वस्य सत्यस्वरूपं जगतो मूलं पुत्रस्य दर्शयित्वाह । अन्नादिकार्यकरणपरंपरयापि जगतो मूलं सद्दिदर्शयिषुः अशना
पिपासे अशितुमिच्छा शनाय लोपेन पातुमिच्छा पिपासा ते अशनापिपासे अशनापिपासयोः स तत्त्वं विजानीहीत्येतद
त्र यस्मिन्काले एतन्नामरूपपुरुषो भवति किं तदश्शिशिषत्यशितुमिच्छतीति तदा तस्य पुरुषस्य किंनिमित्तं नाम भव
तीत्याह यत्र तु रूपेणाशितमन्नं कठिणं पीता आपो नयन्ते द्रवीकृत्य रसादिभावेन विपरिणमयन्ते तदानुक्रमन्नं जीर्यति
अथ भवत्यस्य नाम । शिशिषतीति गौणं नाम जीर्णे ह्यन्नेऽशितुमिच्छति सर्वो जन्तुस्तत्रापामशितं नेतृत्वाद् शनाया इति नाम

छां०भा०

प्रसिद्धमित्येतस्मिन्नर्थे यथा गोनायो गां नयतीति गोनाय इत्युच्यते गोपालस्तथाश्वनायोऽश्वान्नयतीति अश्वनायोऽश्वपाल उच्यते पुरुषनायः पुरुषान्नयतीति राजा सेनापतिर्वा एवं तत्र दापस्याप उच्यते लौकिकानामशनायेति तत्रैवं सत्यशितस्य रसादिभावेन नीते नाशितेनान्नेन निष्पादितमिदं शरीरं वटकणिकायामिव शुङ्गोऽङ्कुर उत्पतितस्तमिमं शुङ्गं कार्यं शरीराख्यं वटादिशुङ्गवदुत्पतितं हे सोम्य विजानीहि किं तत्र विज्ञेयमित्युच्यते शृणु इदं शुङ्गवत्कार्यं शरीरं नामूलं मूलरहितं भविष्यतीत्युक्त आह श्वेतकेतुर्यद्येवं समूलमिदं शरीरं वटादिशुङ्गवत्तस्यास्य शरीरस्य क्व मूलं स्यादित्येवं पृष्ट आह पिता तस्य क्व मूलं स्यादन्यत्रान्नादन्नं मूलमित्यभिप्रायः कथमशितं ह्यन्नमद्भिर्द्रवीकृतं जाठरेणाग्निना पच्यमानं रसभावेन परिणमते रसाच्छोणितं शोणितान्मांसं मांसान्मेदो मेदसोऽस्थि अस्थिभ्यो मज्जा मज्ज्ञः शुक्रं तथा योषिद्भुक्तं चान्नं रसादिक्रमेणैव परिणतं लोहितं भवति ताभ्यां शुक्रशोणिताभ्यामन्नकार्याभ्यां संयुक्ताभ्यामन्नेनैवं प्रत्यहं भुज्यमानेनापूर्यमाणाभ्यां कुड्यमिव मृत्पिण्डैः प्रत्यहमुपचीयमानोऽन्नमूलो देहशुङ्गः परिनिष्पन्न इत्यर्थः यत्तु देहशुङ्गस्य मूलमन्नं निर्दिष्टं तदपि देहवद्विनाशोत्पत्तिमत्वात्कस्माच्चिन्मूलादुत्पतितं शुङ्ग एवेति कृत्वाऽऽह।

१८

१८

यथा देहशुंगेनान्नं मूलमेवमेव खलु सोम्यान्नेन शुंगेन कार्यभूतेनापो मूलमन्नस्य शुंगमस्यान्विच्छ प्रतिपद्यस्वापामपि विना
शोत्पत्तिमत्त्वाच्छुंगत्वमेवेत्यद्भिः सोम्य शुंगेन कार्येण कारणं तेजो मूलमन्विच्छ तेजसोऽपि विनाशोत्पत्तिमत्त्वाच्छुंगत्वमिति
तेजसा सोम्य शुंगेन सन्मूलमेकमेवाद्वितीयं परमार्थसत्यं यस्मिन्सर्वमिदं वाचारम्भणं विकारो नामधेयमनृतं रज्ज्वामि
व सर्पादि विकल्पजातमध्यस्तमविद्यया तदस्य जगतो मूलमतः सन्मूलाः सत्कारणा हे सोम्येमाः स्थावरजंगमलक्षणा
स्सर्वाः प्रजा न केवलं सन्मूला एवेदानीमपि स्थितिकाले सदायतनाः सदाश्रया एव नहि मृदमनाश्रित्य घटादेः सत्त्वं
स्थितिर्वास्त्यतो मृद्वत्सन्मूलत्वात्प्रजानां सदायतनाः प्रजा अन्ते च सत्प्रतिष्ठाः सदेव प्रतिष्ठा लयः समाप्तिरवसानं परि
शेषो यासां ताः सत्प्रतिष्ठाः। अथेदानीमप्शुंगद्वारेण सतो मूलस्यानुगमः कर्तव्य इत्याह यत्र यस्मिन्काले एतन्नाम पिपा
सति पातुमिच्छतीति पुरुषो भवति अशिशिषतीतिवदिदमपि गौणमेव नाम भवति द्रवीकृतस्याशितस्यान्नस्य नेत्र्य आ
पोऽन्नशुंगं देहं क्लेदयन्त्यः शिथिलीकुर्युः अब्बाहुल्याद्यदि तेजसा न शोष्यन्ते नितरां च तेजसा शोष्यमाणास्वप्सु देहधातुभावेन प
रिणममानासु पातुमिच्छा पुरुषस्य जायते तदा पुरुषः पिपासति नाम तदेतदाह तेज एव तत्तदा पीतमबादि शोषयद्देहगतलो

छां०भा०

७२

हितप्राणभावेननयतेपरिणामयतीत्यर्थः यथागोनायइत्यादिसमानमेतत्तेजआचष्टेलोकउदन्येतिउदकंनयतीत्युदन्यमु
दन्येतीतिछांदसम् तत्रापिपूर्ववदपामपितद्देवशरीराख्यंशुंगंनान्यदित्येवमादिसमानमन्यत्सामर्थ्यात्तेजसोप्येतदे
वशुंगमतोप्शुंगेनदेहेनापोमूलंगम्यतेअद्भिःशुंगेनतेजोमूलंगम्यतेतेजसोशुंगेनसन्मूलंगम्यतेपूर्ववत् एवंहितेजोबन्न
मयस्यदेहशुंगस्यवाचारंभणमात्रस्यानादिपरंपरयापरमार्थसत्यंसन्मूलमभयमसंत्रासंनिरायासंसन्मूलमविच्छ
तिपुत्रंगमयित्वाअशिशिषतिपिपासतीतिनामप्रसिद्धिद्वारेणयदन्यदिहास्मिन्प्रकरणेतेजोबन्नानांपुरुषेणोपयु
ज्यमानानांकार्यकरणसंघातस्यदेहशुंगस्यस्वजात्यसांकर्येणोपचयकरत्वंवक्तव्यंप्राप्तंतदिहोक्तमेवद्रष्टव्यमितिप्र
वीत्त्वाव्यपदिशतियथातुखलुयेनप्रकारेणेमास्तिस्रोदेवताःपुरुषंप्राप्यत्रिवृत्त्रिवृदेकैकाभवतितदुक्तं
पुरस्तादेवभवतिअन्नमशितंत्रेधाविधीयतइत्यादिनातत्रैवोक्तमन्नादीनामशितानांयेमध्यमाधातवस्तेसाप्तधातुकरं
शरीरमुपचिन्वंतीत्युक्तम्मांसंभवतिलोहितंभवतिमज्जाभवतियेऽणिष्ठाधातवोमनःप्राणंवाचंदेहस्यांतःकरणसं
घातमुपचिन्वंतीतिचोक्तम् तन्मनोभवतिसप्राणोभवतिसावाग्भवतिसोऽयंप्राणकरणसंघातोदेहविशीर्णेदेहान्तर

७९

जीवाधिष्ठितो येन क्रमेण पूर्वं देहादुत्क्रान्तो भवतीति तदाह। अस्य हे सोम्य पुरुषस्य प्रयतो म्रियमाणस्य वाङ्मनसि संप
द्यते मनस्युपसंह्रियते। अथ तदा ऊर्ध्वं तयो न वदतीति मनः पूर्वं को हि वाग्व्यापारं इन्द्रियं मनसा ध्यायति तद्वा व वदति ती
रूपते। वाक्युपसंहृतायां मनसि मनो मननव्यापारेण केवलेन वर्तते मनोऽपि यदा प्राणे संह्रियते तदा मनः प्राणे संपन्नं भ
वति सुषुप्तकाल इव तदा पार्श्वस्था ज्ञातयो न विजानातीत्याहुः। प्राणश्च तदा ऊर्ध्वोच्छ्वासी स्वात्मन्युपसंहृतबाह्यकरणः सं
वर्गविद्यायां दर्शनात् हस्तपादादीन्विक्षिपन्मर्मस्थानानि निकृन्तन्निवोत्सृजन् क्रमेणोपसंहृतस्तेजसि संपद्यते यदा
ऊर्ध्वं तयो न वलतीति मृतो नेति वा विचिकित्सन्तो देहमालभमाना उष्णं वोपलभमाना देहस्थो जीवतीति यदा तद
प्युष्मालिंगं तेज उपसंह्रियते तदा तत्तेजः परस्यां देवतायां प्रशाम्यति तदेवं क्रमेणोपसंहृतेषु मूलप्रभवं मनसि त
ष्ठो जीवोऽपि सुषुप्तकालवन्निमित्तोपसंहारादुपसंह्रियमाणः सन् सत्याभिसंधिपूर्वकं चेदुपसंह्रियते स देवसंपद्य
न पुनर्देहान्तरं सुषुप्तादिवोत्तिष्ठति यथा लोके सज्जयेदेशो वर्तमानः कथंचिद्विजनं देशं प्राप्तः [illegible] तरस्तेनात्मत्वा
त्तस्मादेव मूलात् सुषुप्तादिवोत्थाय मृत्वा पुनर्देहजालमाविशतीति यस्मान्मूलादुत्थाय देहमाविशति जीवः स य एष सदा

व २ द्व २

श्री०ना०

स य एष उक्तोऽणिमाणिमा वो जगतो मूलमैतदात्म्यमेतत्सदात्मा यस्य सर्वस्य तदेतदात्म तस्य भाव ऐतदात्म्यमेतेन सदा
ख्येनात्मनात्मवत्सर्वमिदं जगन्नान्योस्त्यात्मा संसारी नान्यदतोस्ति द्रष्टा नान्यदतोस्ति श्रोता इत्यादि श्रुत्यन्तरात् येन चात्म
नात्मवत्सर्वं तदेव सदाख्यं कारणं सत्यं परमार्थं तस्सत् अतः स एवात्मा जगतः प्रत्यक्स्वरूपं सतत्वं याथात्म्यमात्मा आत्म
शब्दस्य निरुपपदस्य प्रत्यगात्मनि गवादिवच्छब्दवन्निरूढत्वात् अतस्तत्त्वमसीति हे श्वेतकेतो इत्येवं प्रत्यायितः

८०

पुत्र आह भूय एव मा भगवान्विज्ञापयत्विति यदहं वदुक्तं तत्संदिग्धं मम यदहनि सर्वाः प्रजाः सुषुप्ते सत्संपद्यन्त इत्ये
तद्येन सत्संपद्य न विदुः सत्संपन्ना वयमित्यतो दृष्टान्तेन मां प्रत्याययत्वित्यर्थः एवमुक्तस्तथास्तु सोम्येति होवाच
पिता यत्पृच्छस्यहन्यहन्येसेनित्संपद्य न विदुः सत्संपन्नाः स्म इति तत्कस्मादित्यत्र शृणु दृष्टान्तं यथा लोके सोम्य म
धुकृतो मधु कुर्वन्तीति मधुकृतो मधुमक्षिका मधु निस्तिष्ठन्ति मधु निष्पादयन्ति तत्पराः सन्तः कथम् नानात्यया
नां नानागतीनां नानादिक्कानां वृक्षाणां रसान्समवहारं समाहृत्य समाहृत्यैकतामेकत्वं मधुत्वेन रसान्गमयन्ति मधुत्वमाप दयन्ति
ते रसा यथा मधुत्वेनैकतां गतास्तत्र मधुनि विवेकं न लभन्ते कथम् अमुष्याहमाम्रस्य पनसस्य वाहं वृक्षस्य रसोऽस्मी

८०

130

तिः यथा इहलोके बहूनां चेतनावतां समेतानां प्राणिनां विवेकबोधो भवति अमुष्याहं पुत्रो मुष्याहं भ्रातास्मीति तेष
स्त्वश्च विवेकाः सन्तोन सांकर्यन्तेन तथैहातेक प्रकारद्वन्द्वरसानामपि मधुराम्लतिक्तकटुकादीनां मधुत्वे नैकतां ग
तानां मधुरादि भावेन विवेको गृह्यत इत्यभिप्रायः यथायं दृष्टान्त इत्येवमेव खलु सोम्येमाः सर्वाः प्रजा अहं यहं नि
सति सम्पद्य सुषुप्तकाले मरणप्रलययोश्च न विदुः न विजानीयुस्सतिसम्पद्यामह इति सम्पन्ना इति वा यस्माच्चैवमात्म
नः सद्रूपतामज्ञात्वैव सत्सम्पद्यन्ते अतस्त इहलोके यत्कर्मनिमित्ता यां यां जातिं प्रतिपन्ना आसुर्व्याघ्रादीनां व्याघ्रोऽहं सिं
होहमित्येवं ते तत्कर्मज्ञानवासनांकिताः सन्तस्सत्प्रविष्टा अपि तद्भावेनैव पुनराभवन्ति पुनस्सत आगत्य व्याघ्रो वा
सिंहो वा वृको वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यत्पूर्वमिह लोके भवन्ति बभूवुरित्यर्थः तदेव पुनरा
गत्य भवन्ति युगसहस्रकोट्यन्तरिता अपि संसारिणो जन्तोर्या पुरा भाविता वासना न नश्यतीत्यर्थः तास्वप्रजाय स्मिन्प्र
विश्य पुनराविर्भवन्ति ये क्षिता न्ये सत्यस्त्वात्मानि सर्वाय महान्भावं सदात्मानं प्रविश्य नावर्त्तन्ते स एषोऽयमणिमेत्यादि व्या
ख्यानं न्यायं यथा लोके स्वकीयं गृहे सुप्तः उत्थाय ग्रामान्तरं गतो जानाति स्वगृहाद्यागतोस्मीति एवं सत आगतोस्मीति वज

यथाप्रज्ञं हिंसं नवारति हिंस्र व्यंतरान्

छां० ना०

सर्वाः ५

त्स्नां कस्माद्विज्ञानं न भवतीति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच पिता शृणु तत्र दृष्टान्तं यथा
सोम्येमा नद्यो गंगाद्याः पुरस्तात्पूर्वां दिशं प्रतिस्रा यः प्राचीं गताः स्यन्दन्ते पश्चात्प्रतीचीं दिशं प्रति सिन्ध्वाद्याः प्र
तीच्यो मध्ये गच्छन्ति प्रतीच्यः ताः समुद्रादद्भ्यो निःसृता जलधरैः राशीभूताः पुनर्वृष्टिरूपेण पतिता गंगादिनदीरूपिण्यः पुनः
समुद्रमेवाभियन्ति स समुद्र एव भवति ता नद्यो यथा तत्र समुद्रे समुद्रैकतां गता न विदुरहमिति इयं
गंगाहमस्मीयं यमुनाहमस्मीति इयमहमस्मीति चैवमेव खलु सोम्येमाः प्रजा यस्मात्सति संपद्य न विदुस्तस्मात्सत आग
म्य न विदुः सत आगच्छामहे आगता इति वा त इह व्याघ्र इत्यादि समानमन्यत् दृष्टं लोके जलवीचीतरंगफेनबुद्बुदाद
य उत्थिताः पुनस्तद्भावं गता विनष्टा इति जीवास्तु तत्कारणभावं प्रत्यहं गच्छन्तोपि मरणप्रलययोश्च न विनश्यन्तीत्येतद्भूय
एव मा भगवान्विज्ञापयत्विति दृष्टान्तेन तथा सोम्येति होवाच पिता शृणु दृष्टान्तमस्य हे सोम्य महतोनेकशाखादियुक्तस्य
वृक्षस्य त्वग्यतः स्थितं वृक्षे देशे यन्नाहा यदि कश्चिदस्य मूले अभ्याहन्यात्परश्वादिना सकृदाघातमात्रेण न शुष्यतीति जीवेन
न भवति तदा तस्य रसः स्रवेत्तथा यो मध्ये अभ्याहन्याज्जीवन्स्रवेत् यो अग्रे अभ्याहन्याज्जीवन्स्रवेत् स एष वृक्षो हस्तेनो जी

सुषुप्ते ५ प ४

८२ ८

वेनात्मनानुप्रभूतोनुव्याप्तः पेपीयमानोत्यर्थं पिबन्नुदकं भौमांश्च रसान्मूलैर्मोदमानो हर्षमनुभवंस्तिष्ठति तस्यास्य
देकां शाखां रुग्णां रुग्यस्तामाहतां वा जीवो जहात्युपसंहरति शाखायां विप्रसृतमात्मांशमथ सा शुष्यति वाङ्मनःप्राणक
णग्रामानुप्रविष्टो हि जीव इति तदुपसंहार उपसंह्रियते जीवेन च प्राणयुक्तेनाशितं पीतं च रसतां गतं जीवच्छरीरं वृक्षं च
र्द्धयद्रसरूपेण जीवस्य सद्भावे लिंगं भवत्यशितपीताभ्यां हि देहे जीवस्तिष्ठति ते चाशितपीते जीवकर्मानुसारिणी इति तस्यै
कांगवैकल्यनिमित्तं कर्म यदोपस्थितं भवति तदा जीव एकां शाखां जहाति शाखाया आत्मानमुपसंहरति अथ तदा सा शुष्य
ति जीवस्थितिनिमित्तो रसो जीवकर्माक्षिप्तो जीवोपसंहारे न तिष्ठति रसापगमे च शाखा शोषमुपैति तथा सर्वं वृक्षमेव यदा
यं जहाति तदा सर्वोपि वृक्षः शुष्यति वृक्षस्य रसस्रवणशोषणादिलिंगाज्जीववत्त्वं दृष्टान्तः श्रुतेश्च चेतनावन्तः स्थावरा इति
बौद्धकाणादमतमचेतनाः स्थावरा इत्येतदसारमिति दर्शितं भवति यथास्मिन्वृक्षदृष्टान्ते दर्शितं जीवेन युक्तो वृक्षो
शुष्को रसपानादियुक्तो जीवतीत्युच्यते तदपेतश्च म्रियत इत्युच्यत एवमेव खलु सोम्य विद्धीति होवाच जीवापेतं जीववियु
क्तं वाव किलेदं शरीरं म्रियते न जीवो म्रियत इति कार्यशेषं वक्तुं प्रतिष्ठितस्य ममेदं कार्यशेषमपरिसमाप्तमिति स्मृत्वा समाप

छां०भा०

८२

न दर्शनाज्जातमात्राणां च जन्तूनां स्तन्याभिलाषभयादिदर्शनाज्जातीतजन्मान्तरानुभूतस्तनपानदुःखानुभवस्मृतिर्गम्यते ।
अग्निहोत्रादीनां च वैदिकानां कर्मणामर्थवत्वान्न जीवो म्रियत इति स य एषोणिमेत्यादि समानम् । कथमिदं पुनरिदमत्यन्तस्थूलं पृ
थिव्यादिनामरूपवज्जगदत्यन्तसद्रूपात्सूक्ष्मान्नामरूपरहितात्सतो जायत इत्येतद्दृष्टान्तेन भूय एव मा भगवान्विज्ञापय
त्विति तथा सोम्येति होवाच पिता । यद्येतत्प्रत्यक्षीकर्तुमिच्छसि अतोस्मान्महतो न्यग्रोधात्फलमेकमाहरेत्युक्तः स तथा चकार । सः । इ
दं भगवस्तदुपहृतं फलमिति दर्शितवन्तं प्रत्याह । फलं भिन्द्धीति । भिन्नमित्याहेतरस्तमाह पिता किमत्र पश्यसीत्युक्त आह ।
अण्व्य इवेमा धाना बीजानि पश्यामि भगवन्नित्यासां धानानामेकां धानां हे भगवत्स भिन्द्धीत्युक्त आह भिन्ना भगव
इति यदि भिन्नाया धानायास्तस्यां भिन्नायां किं पश्यसीत्युक्त आह न किंचन पश्यामि भगवन्निति तं पुत्रं होवाच वटधानायां भि
न्नायां यं वटबीजाणिमानं हे सोम्य त्वं न निभालयसे न पश्यसि तथापि तस्य वै किल सोम्यैष महान्न्यग्रोधो बीजस्याणिम्न
सूक्ष्मस्यादृश्यमानस्य कार्यभूतः स्थूलः शाखास्कन्धफलपलाशवान्तिष्ठत्युत्पन्नः सन्नुत्तिष्ठतीति वा श्रद्धत्स्वाहार्थः
अतश्च श्रद्धत्स्व सोम्य स तथैवाणिम्नः स्थूलं नामरूपादिमत्कार्यं जगदुत्पन्नमिति यद्यपि न्यायागमाभ्यां निर्धारितोर्थस्तथैव

८२

यं
त्यवगम्यते तथाप्यतैस्सूक्ष्मेष्वर्थेषु बाह्यविषयासक्तमनसः स्वभावप्रवृत्तस्यासत्यां गुरुतरायां श्रद्धायां दु
रवगमं स्यादित्याह । श्रद्धत्स्वेति । श्रद्धायां तु सत्यां मनसः समाधानं बुभुत्सिते ऽर्थे भवेत्ततश्च तदर्थावगतिरि
न्यत्र मनाअप्युक्तमित्यादिश्रुतेश्च स य इत्यादि । कार्यमणीयदि तत्सज्जगतो मूलं कस्मान्नोपलभ्यत इत्यत
दृष्टान्तेन मा भगवन्भूय एव विज्ञापयत्विति तथा सोम्येति ह होवाच विद्यमानमपि वस्तु नोपलभ्यते प्रका
रान्तरेण तूपलभ्यत इति शृणु अत्र दृष्टान्तं यदि त्वमर्थं प्रत्यक्षीकर्तुमिच्छसि पिंडरूपं लवणमेतच्छरावादावु
दकेऽवधाय प्रातिप्राथ मा मां श्वः प्रातरुपसीदथा उपगच्छेथा इति स ह पितोक्तमर्थं प्रत्यक्षीकर्तुमिच्छन् तथा
चकार तं होवाच परेद्युः प्रातर्यल्लवणं दोषा रात्रावुदकेऽवधा निहितवानसि तदाहरेत्युक्तस्तल्लवणमा
जिहीर्षुर्ह किलावमृश्योदके न विवेद न विज्ञातवान्यथा तल्लवणं विद्यमानमेव सदप्सु लीनं संश्लिष्टमभूद्य
था विलीनं लवणं न वेत्थ तथापि तच्चक्षुषा स्पर्शनेन च पिंडरूपं लवणमगृह्यमाणं विद्यत एवाप्सु उपलभ्यते
चोपायान्तरेण त्यतस्तु त्वं प्रत्याययितुमिच्छन्नाहाङ्गास्योदकस्यान्तादुपरि गृहीत्वाचामेत्युक्त्वा पुत्रं तथा कृतवन्तं

लवणमिति

छां०भा० मुक्तवान्न कथमितीतर आह लवणं स्वादु तदशितं यामध्यादुदकस्य गृहीत्वाचामेति कथमिति तथांतादधोदेशादु

हीत्वाचामेति कथमिति लवणमिति यद्येवमभिप्रास्यैतत्परित्यज्य तदुदकमाचम्याथमोपसीदथा इति तद्धतथा च

कार लवणं परित्यज्य पितृसमीपमाजगाम तच्चर्थम इदं वचनं ब्रुवन् तल्लवणं तस्मिन्नेवोदके यन्मया रात्रौ क्षिप्तं तच्च

नित्यं संवर्त्तते विद्यमानमेव सत्सम्यग्वर्त्तते इत्येवमुक्तवन्तं होवाच पिता यथेदं लवणं दर्शनस्पर्शनाभ्यां पूर्वं गृ

८३ हीतं पुनरुदके विलीनं ताभ्यामगृह्यमाणमपि लवणमिति दर्शनस्पर्शनाभ्यामगृह्यमाणमपि विद्यत एवोपायां ८३

तरेण जिह्वयोपलभ्यमानत्वादेवमेवात्रैवास्मिन्नेव तेजोबन्नादिकार्यशुङ्गे देहे वाव किल तत्साचार्योपदेशस्मरणा

प्रदर्शनार्थः । सत्तेजोबन्नादिशुङ्गकारणं वटबीजाणिमवद्विद्यमानमेवेन्द्रियैर्नोपलभसे तत्सेन निभालयसे

यथास्मिन्नेवोदके दर्शनस्पर्शनाभ्यामनुपलभ्यमानं लवणं विद्यमानमेव जिह्वयोपलब्धवानसि एवमेवेवकि

ल विद्यमानं सज्जगन्मूलमुपायान्तरेण लवणाणिमवदुपलप्स्यस इति वाक्यशेषः । सय इत्यादि समानम् । यथा

यद्वल्लवणाणिमवदिन्द्रियैरनुपलभ्यमानमपि जगन्मूलं सदुपायान्तरेणोपलब्धुं शक्यते यदुपलम्भात्कृतार्थः

136

३ त

स्यामनुपलंभेवाकृतार्थः स्यामहं तस्यैवोपलब्धौक उपाय इत्येतद्भूय एव भगवान्विज्ञापयतु दृष्टान्तेन तथा सो
म्येतिहोवाच॥ यथा लोके हे सोम्य पुरुषं यं कंचिद्गंधारेभ्यो जनपदेभ्यो भिनद्धाक्षं बद्धचक्षुषमानीय द्रव्यहर्त्ता त
स्करः ईमभिनद्धाक्षमेव बद्धहस्तमरण्ये ततोप्यतिजनेऽतिगतजने देशे विसृजेत्स तत्र दिग्भ्रमोपेतो यथा प्राग्वा प्रा
गंचनः प्राङ्मुखो वेत्यर्थः तथोदङ्वाधराङ्वा प्रत्यङ्वा प्रध्मायीत शब्दं कुर्याद्विक्रोशेदभिनद्धाक्षोहं गंधारेभ्यस्तस्करेण
नीतोभिनद्धाक्ष एव विसृष्ट इत्येवं विक्रोशतस्तस्य यथाभिनहनं यथाबंधनं प्रमुच्य मुक्त्वा कारुणिकः कश्चिदेतां दि
शमुत्तरतो गंधाराः एतां दिशं व्रजेति प्रब्रूयात्स एवं कारुणिकेन बंधनान्मोक्षितो ग्रामाद्ग्रामांतरं पृच्छन्पंडित उपदेश
वान्मेधावी परोपदिष्टग्रामप्रवेशमार्गावधारणसमर्थः स गंधारानेवोपसंपद्यते नेतरो मूढमतिर्देशांतरदर्शने
यथायं दृष्टान्तो वर्णितः स्वविषयेभ्यो गंधारेभ्यः पुरुषस्तस्करैरभिनद्धाक्षोऽविवेको दिङ्मूढोऽशनायापिपासादिमान्व्या
घ्रतस्कराद्यनेकभयानर्थजातयुतमरण्यं प्रवेशितो दुःखार्तो विक्रोशन्बंधनेभ्यो मुमुक्षुस्तिष्ठति कथंचिदेव का
रुणिकेन केनचिन्मोक्षितः स्वदेशान्गंधारानेवापन्नो निर्वृतः सुखी स्यात्तदेवमेव सतो जगदात्मस्वरूपात्तेजोबन्नादिमयं

बो०जा० ८४

देहारण्यं वातपित्त॰कफरुधिरमेदोमांसास्थिमज्जाशुक्रमूत्रपुरीषवच्छीतोष्णाद्यनेकद्वंद्वदुःखवद्देहं मोहप
दाभिनदग्धो जार्यपुत्रमित्रपशुबंधवादिदृष्टादृष्टानेकविषयत्वक्षापावितः पुण्यापुण्यादितस्करैः प्राक्षिवेशितोह
ममुष्यपुत्रो ममैते बांधवाः सुख्यहं दुःखी मूढः पंडितो धार्मिको बंधुमानजातो मृतो जीर्णः पापी पुत्रो मे मृतो धनं नष्टं
मे हा हतोस्मि कथं जीविष्यामि का मे गतिः किं मे त्राणमित्येवमनेकशतसहस्रानर्थजालवान् विक्रोशन् कथंचिद्
वपुण्यातिशयात् परमकारुणिकं कंचित् सद्ब्रह्मात्मविदं विमुक्तबंधनं ब्रह्मिष्ठं यदृच्छया सादयति तेन च ब्रह्मविदा कारुण्या
द्दर्शितसंसारविषयदोषदर्शनमार्गो विरक्तः संसारविषयेभ्यो नासि त्वं संसार्यमुष्यपुत्रत्वादिधर्मवानिति तर्हि सद्य
त्त्वमसीत्यविद्यामोहपटाजिनहनान्मोचितो गंधारपुरुषवच्च स्वं सदात्मानमुपसंपद्य सुखी [illegible]र्वृत्तः स्यादित्येवमेवा
र्थमाहाचार्यवान्पुरुषो वेदेति तस्यास्येवमाचार्यवतो मुक्ताविद्याजिनहनस्य तावदेव तावा[illegible]लक्षिप्रं देहपातः स
दात्मस्वरूपसंपत्तिरिति वाक्यशेषः क्रियाकालक्षिप्रमित्युच्यते यावन्न विमोक्ष्ये न विमोक्ष्यत इत्येतत्पुरुषस्य येन स
मध्याद्येन कर्मणा शरीरमारब्धं तस्योपभोगेन क्षयाद्देहपातो यावदित्यर्थः अथ तदैव संपत्स्ये संपत्स्यत इति पूर्ववत्

८४

न हि देहमोक्षस्य सत्संपत्तेश्च कालनैयत्यमस्ति येनाथशब्द आनंतर्यार्थः स्यात् । ननु यथा सद्विज्ञानानंतरमेव देहपा
तः सत्संपत्तिश्च न भवति कर्मशेषवशात् तथाऽप्रवृत्तफलानि प्राग्ज्ञानोत्पत्तेर्जन्मांतरसंचितान्यपि कर्माणि संती
ति तत्फलोपभोगार्थं पतिते तस्मिं छरीरे शरीरांतरमारब्धव्यमुत्पन्ने च ज्ञाने यावज्जीवविहितानि प्रतिषिद्धानि करोति
वेति तत्फलभोगार्थं चावश्यं शरीरांतरमारब्धव्यं ततश्च कर्माणि ततः शरीरांतरमिति ज्ञानानर्थक्यं कर्मणां फलवत्त्वात् ।
अथ ज्ञानवतः क्षीयंते तदा ज्ञानप्राप्तिसमकालमेव ज्ञानस्य सत्संपत्तिहेतुत्वान्मोक्षः स्यादिति शरीरपातः स्यात् तथाचा
र्याभाव इत्याचार्यवान्पुरुषो वेदेत्यनुपपत्तिर्ज्ञानान्मोक्षाभावप्रसंगश्च देशांतरप्राप्त्युपायज्ञानवदनैकांतिकफलत्वं वा
ज्ञानस्य । न । कर्मणां प्रवृत्ताप्रवृत्तफलत्वविशेषोपपत्तेः । यदुक्तमप्रवृत्तफलानां कर्मणां ध्रुवफलत्वाद्ध्रुवं विदुषः शरी
रे पतिते शरीरांतरमारब्धव्यमप्रवृत्तफलकर्मफलोपभोगार्थमित्येतदसत् । विदुषस्तस्य तावदेव चिरमिति श्रुतेः
प्रामाण्यात् । ननु पुण्यो वै पुण्येन कर्मणा भवतीत्यादिश्रुतेरपि प्रामाण्यमेव । सत्यमेवं तथापि प्रवृत्तफलानामप्रवृ
त्तफलानां च कर्मणां विशेषोऽस्ति कथं यान्यप्रवृत्तफलानि कर्माणि येन विद्वच्छरीरमारब्धं तेषामुपभोगेनैव क्षयाय

छां०भा० थारब्धवेगस्य लक्ष्यमुक्तेषोर्वेगक्षयादेव स्थितिर्न तु लक्ष्यव्यधसमकालमेव प्रयोजनं नास्तीति तद्वदन्यानि च प्रवृ
त्तफलानीह प्राग्ज्ञानोत्पत्तेरूर्ध्वं च कृतानि वा क्रियमाणानि वातीतजन्मान्तरकृतानि वा ऽप्रवृत्तफलानि ज्ञानेन दह्यन्ते
प्रायश्चित्तेनेव ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति स्मृतेश्च क्षीयन्ते चास्य कर्माणीति चाथर्वणे ऽतो ब्रह्मवि
दो जीवितादिप्रयोजनाभावे ऽपि प्रवृत्तफलानां कर्मणामवश्यफलोपभोगः स्यादिति मुक्तेषुवत्तस्य तावदेव चिरमिति
युक्तमेवोक्तमिति यथोक्तदोषचोदनानुपपत्तिर्ज्ञानोत्पत्तेरूर्ध्वं च ब्रह्मविदः कर्माभावमवोचाम ब्रह्मसंस्थो ऽमृत
त्वमेतीत्यत्र तच्च स्मर्तुमर्हसि स य इत्याद्युक्तार्थम् ॥ य आचार्यवान्विद्वान्येन क्रमेण सत्संपद्यते तं क्रमं दृष्टान्तेन ८५
भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच पुरुषं हे सोम्योपतापिनं ज्वराद्युपतापवन्तं ज्ञातयो बा
न्धवाः परिवार्योपासते मुमूर्षुं जानासि मां तव पितरं पुत्रं भ्रातरं चेति पृच्छन्तस्तस्य मुमूर्षोर्यावन्न वाङ्मनसि संप
द्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामित्येतदुक्तार्थम् संसारिणो यो मरणक्रमः स एवायं विदुषो
ऽपि सत्संपत्तिक्रम इत्येतदाह । परस्यां देवतायां तेजसि संपन्ने ऽथ न जानाति अविद्वांस्तु तत उत्थाय प्राग्भावितं व्याघ्रा

दिनावदेव मुमुक्षादिनावं वा चिरमिति विद्वांस्तु शास्त्राचार्योपदेशजनितज्ञानदीपप्रकाशितं सद्रूपमात्मानं प्रवि
श्य नावर्त्तते इत्येष संसंपत्तिक्रमोऽन्ये तु मूर्द्धन्यया नाड्योत्क्रम्यादित्यादिद्वारेण सद्गच्छन्तीत्याहुस्तदसत् । देशका
लनिमित्तफलाभिसंधानेन गमकदर्शनात् न च सदात्मैकत्वदर्शिनः सत्याभिसंधस्य देशकालनिमित्तफलाद्यता
लसंधिरुपपद्यते विरोधात् । अविद्याकामकर्मणां च गमननिमित्तानां सद्विज्ञानहुताशनविप्लुष्टत्वात् गमनानुपपत्ति
रेव । पर्याप्तकामस्य कृतात्मनश्च इहैव सर्वे प्रविलीयन्ति कामा इति आथर्वणे । नदीसमुद्रदृष्टान्तश्रुतेश्च । सयः इत्यादि
समानमन्यत् । यदि मरिष्यतो मुमुक्षुतश्च तुल्या सत्संपत्तिस्तत्र विद्वान्संपन्नो नावर्त्तते आवर्त्तते ऽविद्वानित्यत्र कारणं दृ
ष्टान्तेन भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच । शृणु सोम्य पुरुषं चौर्यकर्मणि संदिह्यमानं निग्रहाय
परीक्षणाय चोतापि हस्तगृहीतं बद्धहस्तमानयन्ति राजपुरुषाः । किं कृतवानयमिति पृष्टाश्चाहुः अपहार्षीद्धनमस्या
यं ते चाहुः संदिह्यमानस्तेयमकार्षीत्त्वमस्य धनस्येति तस्मिंश्चापह्नुवत्याहुः परशुमस्मै तपतेति शोधयत्वात्मानमि
ति स यदि तस्य स्तेयस्य कर्त्ता भवति बहिश्चापह्नुते स एवंभूतस्ततएवानृतमन्यथाभूतं सन्तमन्यथात्मानं कुरुते स तथा

* किमपहरणमात्रेणायं बंधनमर्हतीति अन्यथादत्तेपि धने ग्रहणात् संभवादित्युक्ताः पुनराहुः स्तेयमप्यकार्षीत् चौर्येणाधनमपाहार्षीदितितब्धं वंद
स्त्विन्तरोऽपह्नुते नाहं तत्कर्त्तेति २

छां॰ना॰

चृताभिसंधोऽनृतेनात्मानमन्तर्धाय व्यवहितं कृत्वा परशुं तप्तं मोहात्प्रतिगृह्णाति स दह्यतेऽथ हन्यते राजपुरुषैः स्वकृते
नानृताभिसंधिदोषेणाथ यदि तस्य कर्मणोऽकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसंधस्तेन्याकर्तृतयात्मानमन्त
र्धाय तप्तं परशुं प्रतिगृह्णाति स सत्याभिसंधत्वान्न दह्यते सत्यव्यवधानादथ मुच्यते च मृषाभियोक्तृभ्यस्तप्तपरशुहस्त
तलसंयोगस्य तुल्यत्वेऽपि स्तेयकर्तृकर्त्रोरनृताभिसंधो दह्यते न तु सत्याभिसंधस्य यथा सत्याभिसंधस्तप्तपरशुग्रह
णादिकर्मणि सत्यव्यवहितहस्ततलत्वान्न दह्यते न दह्यते इत्येतत् ॥ एवं सद्ब्रह्म सत्याभिसंधीतरयोः शरीरपातकाले
च तुल्यायां सत्संपत्तौ विद्वान्संपद्य न पुनर्व्याघ्रदेवादिदेहग्रहणायावर्त्तते ऽविद्वांस्तु विकारानृताभिसंधिः पुनर्व्याघ्रा
दिभावं देवतादिभावं वा यथा कर्म यथाश्रुतं प्रतिपद्यते यदात्मा संध्य नलिकृत मोक्षबंधनयन्मूलं जगतो यदायत
नाय त्वतिश्चाश्च सर्वाः प्रजा यदात्मकं च सर्वं यच्चाजममृतमभयं शिवमद्वितीयं तत्सत्यं स आत्मा तवातस्तत्त्वमसि हे
श्वेतकेतो इत्युक्तार्थमसकृद्वाक्यम् ॥ कः पुनरसौ श्वेतकेतुस्त्वं शब्दार्थो यो हे श्वेतकेतुरुद्दालकस्य पुत्र इति वेदात्मा
नमादेशं श्रुत्वा मत्वा विज्ञायाश्रुतममतमविज्ञातं विज्ञातुं पितरं पप्रच्छ कथं नु भगवः स आदेशो भवतीति स एष अधिक

८६

तः॥ सो तामसं ता विज्ञाता तेजोबन्नमयं कार्यकरणसंघातं प्रविश्य परेव देवता नामरूपव्याकरणाय दर्पणे इव पुरुषः सूर्यादिरिव
जलादौ प्रतिबिंबरूपेण स आत्मानं कार्यकरणे॥ प्रविश्य सत्सद्रूपं सर्वात्मानं ज्ञात्वा कि तु॥ श्वेतकेतो नाविज्ञाय एतदानीं पित्रा
प्रतिबोधितस्तत्त्वमसीति दृष्टान्तैर्हेतुभिश्च तत्पितुरस्य ह किलो के सदेवाहमस्मीति विजज्ञौ विज्ञातवान् द्वितीयं वचनमध्याय प
रिसमाप्त्यर्थम्॥ किं पुनरत्र षष्ठवाक्यप्रमाणेन जनितं फलमात्मनि कर्तृत्वभोक्तृत्वयोरविक्रियतत्त्वविज्ञाननिवृत्तिस्तस्य
फलं वयमवोचाम त्वंशब्दवाच्यमर्थं श्रोतुं मंतुं वाविक्रियतत्त्वमविज्ञातविज्ञानफलार्थं प्राक्के तस्माद्विज्ञानात् अहमेवं करिष्या
म्यग्निहोत्रादीनि कर्माण्यहमत्राविक्रियतमेषां च कर्मणां फलमिहामुत्र च भोक्ष्ये कृतेषु वा कर्मसु कृतकर्तव्यः स्यामित्येवं
कर्तृत्वभोक्तृत्वयोरविक्रियतोऽस्मीत्यात्मनि यद्विज्ञानमभूत्तस्य यत्सज्जगतो मूलमेकमेवाद्वितीयं तत्त्वमसीत्यनेन वाक्येन प्र
तिबुद्धस्य निवर्तते विरोधात् न ह्येकस्मिन्नद्वितीय आत्मन्ययमस्मीति विज्ञाते ममेदमन्यदनेन कर्तव्यमिदं कृत्वास्य फलं भोक्ष्य
इति वा भेदविज्ञानमुपपद्यते तस्मात्सत्सत्याद्वितीयात्मविज्ञाने विकारानृतजीवात्मविज्ञानं निवर्तत इति युक्तम्॥ ननु तत्त्व
मसीत्यत्र त्वंशब्दवाच्ये सद्बुद्धिरादिश्यते यथादित्यमनआदिषु ब्रह्मादिबुद्धिर्यथा च लोके प्रतिमादिषु विष्ण्वादिबुद्धिस्तद्व

छां०भा०

नतुसदेवत्वमितियदिसदेवश्वेतकेतुःस्यांकथमात्मानंनविजानीयांयेनतस्मैतत्त्वमसीत्युपदिश्यते।न।आदित्यादिवा
क्यवैलक्षण्यात्।आदित्योब्रह्मेत्यादावितिशब्दस्यव्यवधानान्नसाक्षाद्ब्रह्मत्वंगम्यतेरूपादिमत्त्वाच्चादित्यादीनामाकाशमन
साश्चेतिशब्दव्यवधानादेवाब्रह्मत्वं।इहतुसतएवदेहप्रवेशंदर्शयित्वातत्त्वमसीतिनिरंकुशंसदात्मभावमुपदिशति।न
तुपराक्रमादिगुणःसिंहोसित्वमितिवत्तत्त्वमसीतिस्यात्।नमृदादिवत्सदेकमेवाद्वितीयंसत्यमित्युपदेशात्।नचोपचारवि
ज्ञानात्तस्यतावदेवचिरमितिसत्संपत्तिरुपदिश्यतेमृषात्वादुपचारविज्ञानस्यत्वमिंद्रोयमइतिवन्नापिस्तुतिरनुपास्यत्वा

८७

च्छ्वेतकेतोर्नापिसच्छ्वेतकेतुत्वेनस्तूयतेनहिराजादासस्त्वमितिस्तुत्यःस्यान्नापिसतःसर्वात्मनएकदेशनिरोधोयुक्त
स्त्वमसीतिदेशाधिपतेरिवग्रामाध्यक्षस्त्वमितिनचान्यागतिरिहसदात्मत्वोपदेशादर्थान्तरभूतासंभवतिसदस्मीति
बुद्धिमात्रमिहकर्त्तव्यतयाचोद्यतेनत्वज्ञातंसदसीतिज्ञाप्यतइतिचेत्।नत्वस्मिन्पक्षेश्रुतंश्रुतंभवतीत्याद्यनुपप
न्नंसदस्मीतिबुद्धिस्तुत्यर्थत्वात्।नाचार्यवान्वेदतस्यतावदेवचिरमित्युपदेशाच्चादिहिसदस्मीतिबुद्धिमात्रंकर्तव्य
तयाविधीयतेनतुतच्छब्दवाच्यस्यसद्रूपत्वमेवतदाचार्यवान्वेदेतिज्ञानोपायोपदेशोबाध्यःस्यादग्निहोत्रवज्जुहुया

८७

147

दित्येवमादिष्वर्थज्ञानमेवाचार्यत्वमिति तद्वत्तस्य तावदेव चिरमिति चरमप्रकरणं न युक्तं स्यात्सदात्मत्वविज्ञाने
ऽपि सकृद्बुद्धिमात्रकरणमोक्षप्रसंगात् न हि तत्त्वमसीत्युक्ते नाहं सदिति प्रमाणवाक्यजनिता बुद्धिर्निवर्तयितुं शक्या
नोत्पन्नेति वा शक्यं वक्तुं सर्वोपनिषद्वाक्यानां तत्परतयैवोपक्षयात् यथाग्निहोत्रादिविधिजनिताग्निहोत्रादिकर्तव्य
ताबुद्धीनामतथार्थत्वमनुत्पन्नत्वं वा न शक्यते वक्तुं तद्वत्। यत्तूक्तं सदात्मा सन्नात्मानं कथं न जानीयादिति नासौ दो
षः कार्यकरणसंघातस्य व्यतिरिक्तोऽहं जीवः कर्ता भोक्तेत्यपि स्वभावतः प्राणिनां विज्ञानाद्दर्शनात् किमुत तस्य सदात्म
विज्ञानं कथमेवं व्यतिरिक्तविज्ञाने सति तेषां कर्तृत्वादिविज्ञानं संभवतीति दृश्यते च तद्वत्तस्यापि देहादिष्वात्मबुद्धित्वा
त्स्यात्सदात्मविज्ञानं तस्माद्विकारानृताभिसन्धितजीवात्मत्वविज्ञाननिवर्तकमेवेदं वाक्यं तत्त्वमसीति सिद्धमिति॥
॥ ॥इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छङ्करभगवतः कृतौ छान्दो
ग्योपनिषद्विवरणे षष्ठः प्रपाठकः समाप्तः॥ ॥श्रीकृष्णः॥ सदात्मैकत्वनिर्णयपरतयैवोपयुक्तो न सतो वाग्विका
रलक्षणानि निर्दिष्टानीत्येतानि नामादीनि प्राणान्तानि क्रमेण निर्दिश्य तद्द्वारेणापि भूमाख्यं निरतिशयं तत्त्वं
परमार्थ तत्त्वोपदेश प्रश्न नः षष्ठोध्यायः २

छां० भा०

निर्देक्ष्यामीति शाखाचंद्रवद्दर्शनवदितीमं सप्तमं प्रपाठकमारभते। अनिर्दिष्टे हि सतो वाक्येष्वेषु सन्मात्रेण निर्दि
ष्टेऽन्यदप्यविज्ञातं स्यादित्याशंका कस्यचित्स्यात्सा मा भूदिति वा तानि निर्दिदिक्षति। अथवा सोपानारोहणवत्स्थूलादा
रभ्य सूक्ष्मं सूक्ष्मतरं च बुद्धिविषयं ज्ञापयित्वा तद्व्यतिरिक्ते स्वाराज्येऽभिषेक्ष्यामीति नामादीनि निर्दिदिक्षति। अथवा ना
माद्युत्तरोत्तरविशिष्टानि तत्त्वान्यतितरां च तेषामुत्कृष्टतमं भूमाख्यं तत्त्वमिति तत्स्तुत्यर्थं नामादीनां क्रमेणोपन्यासः।
आख्यायिका परविद्यास्तुत्यर्था। अथवा नारदो देवर्षिः कृतकर्तव्यः सर्वविद्योऽपि सन्ननात्मज्ञत्वाच्छुशोचैव किमुतान्यो
ऽल्पविज्जंतुरकृतपुण्यातिशयोऽकृतार्थ इति। अथवा नान्यदात्मज्ञानान्निरतिशयश्रेयःसाधनमस्तीत्येतत्प्र
दर्शनार्थं सनत्कुमारनारदाख्यायिकारभ्यते। येन सर्वविज्ञानसंपन्नस्यापि नारदस्य देवर्षेः श्रेयो न बभूव येनोत्तमा
भिजनविद्यावृत्तसाधनशक्तिसंपन्नोऽभिमानं हित्वा प्राकृतपुरुषवत्सनत्कुमारमुपससाद श्रेयःसाधनप्रा
प्तये। तत्प्रख्यापितं भवति निरतिशयश्रेयःप्राप्तिसाधनत्वमात्मविद्याया इति। अधीहि भगवो भगवन्निति ह
किलोपससाद। अधीहि भगव इति मंत्रः। सनत्कुमारं योगीश्वरं ब्रह्मिष्ठं नारद उपसन्नवान्। न्याय्यं तोपसन्नं होवाच

८८

यदात्मविषये किं विद्वेच्छते नतत्पमचाख्यापनेन मामुपसीदेद महं ज्ञानेत ततोहं नवतो विज्ञानात्ते तु भ्यमूर्ध्वं वक्ष्यामी
त्येक्त्रवति स होवाच नारद ऋग्वेदं भगवोध्येमि स्मरामि यद्वेत्थेति विज्ञानस्य प्रष्टत्वात् तथा यजुर्वेदं सामवेदमाथर्वणं
चतुर्थं वेदं वेदशब्दस्य प्रकृतत्वादितिहासपुराणं पंचमं वेदं वेदानां भारतपंचमानां वेदं वेदं व्याकरणमित्यर्थः व्याक
दि४ रणेन हि पदादिविभागशः ऋग्वेदादयो ज्ञायन्ते पित्र्यं श्राद्धकल्पं राशिं गणितं दैवमुत्पातज्ञानं निधिं महाकालादि
निधिः शास्त्रं वाकोवाक्यं तर्कशास्त्रमेकायनं नीतिशास्त्रं देवविद्यां निरुक्तं ब्रह्मपात्रमण्य ऋक्सामाख्यस्य विद्या ब्रह्मवि
द्यां शिक्षाकल्पछंदश्चितयो भूतविद्यां भूततंत्रं क्षत्रविद्यां धनुर्वेदं नक्षत्रविद्यां ज्योतिषं सर्पदेवजनविद्यां गंधयु
क्तिनृत्यगीतवाद्यशिल्पादिविज्ञानानि एतत्सर्वं हे भगवोध्येमि सोहं भगव एतत्सर्वं जानन्नपि मंत्रविदेवास्मि शब्दा
र्थमात्रविज्ञानवानेवास्मीत्यर्थः सर्वो हि शब्दोऽभिधानमात्रम भिधानं च सर्वं मंत्रेष्वंतर्भवति मंत्रविदेवास्मि मंत्रविक
र्मविदित्यर्थः मंत्रेषु कर्माणि हि वदंतीति नात्मविन्नात्मानं वेद्मि न चात्मापि मंत्रैः प्रकाश्यत एवेति कथं मंत्रवि चेन्ना
त्मविन्नाभिधानाभिधेयभेदस्य विकारत्वान्नच विकार आत्मेष्यते ननु आत्मशब्देनाभिधीयते नयतो वाचो निवर्तंते यत्र

नान्यत्पश्यतीत्यादिश्रुतेः॥ कथं तर्हि तमेवायमस्त्वा सआत्मेत्यादिशब्दा आत्मानं प्रत्याययन्ति नैष दोषः यथा देहवत्सु प्रत्यगा
त्मनि तद्विषये प्रयुज्यमानः शब्दो देहादीनामात्मत्वे प्रत्याख्यायमाने यत्परिशिष्टं सद्वाच्यमपि प्रत्याययति यथा सराज
कायां दृश्यमानायां सेनायां छत्रध्वजपताकादिव्यवहिते ऽदृश्यमाने ऽप्येष राजा दृश्यत इति भवति शब्दप्रयोगस्तत्र कोऽसौ रा
जेति राजविशेषनिरूपणायां दृश्यमानेतरप्रत्याख्यानेन्यस्मिन्नदृश्यमाने राजनि राजप्रतीतिर्भवेत्सोहं मंत्रवित्कर्मविदे

वास्मि कर्मकार्यं च सर्वो विकार इति विकारज्ञ एवास्मि नात्मवित् न प्रकृतिस्वरूपज्ञ इत्यर्थः अत एवोक्तमाचार्यवान्पुरुषो वेदे
तियतो वाचो निवर्तन्त इत्यादिश्रुतिभ्यश्च श्रुतमागमज्ञानमस्त्येव हि यस्मान्मे मम भगवद्दृशेभ्यो भवत्सदृशेभ्यस्त
रत्यति शोकमात्मवित् शोकं मनस्तापमकृतार्थबुद्धितामात्मविद्वान्ह्ये भगवः शोचाम्यकृतार्थबुद्ध्या संतपे सर्वदा तं मामां शोक
स्य शोकसागरस्य पारं भगवांस्तारयत्वात्मज्ञानोडुपेन कृतार्थबुद्धिमापादयत्वभयं गमयत्वित्यर्थः तमेवमुक्तवन्तं
होवाच यद्वै किंचैतदध्यगीष्ठा अधीतवानस्यध्ययनेन तदर्थज्ञानमुपलक्ष्यते ज्ञातवानसीत्येतन्नामैवैतद्वाचारंभणं त
विकारो नामधेयमिति श्रुतेः नाम वा ऋग्वेदो यजुर्वेद इत्यादि नामैवैतन्नामोपास्स्व ब्रह्मेति यथा ब्रह्मबुद्ध्या यथा प्रतिमां विष्णु

विद्वित्पतः सोऽहम नामावि ४

बुद्ध्योपास्ते तद्वद्यः स यस्तु नाम ब्रह्मेत्युपास्ते तस्य यत्फलं भवति तच्छृणु यावन्नाम्नो गतं नाम्नो गोचरं तत्र तस्मिन्विषयेऽस्य
यथाकामचारः कामचरणं राज्ञ इव स्वविषये भवति यो नाम ब्रह्मेत्युपास्ते इत्युपसंहारः किमस्ति भगवो नाम्नो भूयो
धिकतरं यद्ब्रह्मदृष्ट्यर्हमित्यभिप्रायः सनत्कुमार आह। नाम्नो वाव भूयोऽस्त्येवेत्युक्त आह यद्यस्ति तन्मे भगवान्ब्रवीत्वि
ति। वाग्वाव नाम्नो भूयसी वागिति जिह्वामूलादिष्वष्टसु स्थानेषु स्थितं वर्णानामभिव्यञ्जकं वर्णाश्च नामेति नाम्नो वाग्भूयसीत्युच्य
ते कार्याद्धि कारणं भूयो दृष्टं लोके यथा पुत्रात्पिता तद्वत्कथं च वाङ्नाम्नो भूयसीत्यत आह। वाग्वा ऋग्वेदं विज्ञापयति अयम्
ऋग्वेद इति तथा यजुर्वेदमित्यादि समानम्। हृदयज्ञं हृदयप्रियं यद्यदि वाङ्नाभविष्यद्वाग्भावोऽभविष्यन्नाभावस्तदर्थश्रव
णाभावस्तच्छ्रवणाभावे धर्मादि नाव्यज्ञापयिष्यन्न विज्ञातमभविष्यदित्यर्थः। तस्माद्वाग्वैतदुच्चारणेन सर्वं विज्ञाप
यत्यतो भूयसी वाङ्नाम्नस्तस्माद्वाचं ब्रह्मेत्युपास्स्व समानमन्यत्। मनो मनस्यनविशिष्टमन्तःकरणं वाचो भूयस्तद्धि
मनस्यनव्यापारवद्वाचं वक्तव्ये प्रेरयति तेन वाङ्मनस्यन्तर्भवति यच्च यस्मिन्नन्तर्भवति तत्तस्य व्यापकत्वात्ततो भूयो भव
ति यथा वै लोके द्वे वामलके फले द्वे वा कोले बदरफले द्वौ वाक्षौ विभीतकफले मुष्टिरनुभवति मुष्टिस्ते फले व्याप्नोति।

1.48
1800

छां॰ भा॰ मुष्टौ हि ते अंतर्भवतः एवं वाचं च नाम च मनोऽनुभवति स यदा पुरुषो यस्मिन्काले मनसांतःकरणेन मनस्य-
ति मनस्यनं विवक्षाबुद्धिः कथं मंत्रानधीयीयोच्चारयेयमित्येवं विवक्षां कृत्वाथाधीते तथा कर्माणि कुर्वीयेति चिकीर्षाबु-
द्धिं कृत्वाथ कुरुते पुत्रांश्च पशूंश्चेच्छेयेति प्राप्तीच्छां कृत्वा तत्प्राप्त्युपायानुष्ठानेनाथेच्छते तान्प्राप्नोतीत्यर्थः तथेमं च लोक-
ममुं चोपायेनेच्छेयमिति तत्प्राप्त्युपायानुष्ठानेनाथेच्छते प्राप्नोतीति मनो ह्यात्मा मनः कर्तृत्वं भोक्तृत्वं च सति मनसि नान्यथेति ९०
मनो ह्यात्मेत्युच्यते मनो हि लोकः सत्येव मनसि लोको भवति तत्प्राप्त्युपायानुष्ठानं चेति मनो हि लोको यस्मात्तस्मान्मनो हि ब्र-
ह्म यत एवं तस्मान्मन उपास्स्वेति स यो मन इत्यादि समानम्॥ संकल्पो वाव मनसो भूयान्संकल्पोऽपि मनस्यनवदंतःकरण-
वृत्तिः कर्तव्याकर्तव्यविषयविभागेन समर्थनम्॥ विभागे हि समर्थिते विषये चिकीर्षाबुद्धिर्मनसो नांतरं भवति क- न॰४
थं यदा वै संकल्पयते कर्तव्यादिविषयान्विभजते इदं कर्तुं युक्तमिति तदाथ मनस्यति मंत्रानधीयीयेत्यादि अथानंतरं च
वाचमीरयति मंत्राद्युच्चारणे तां च वाचमु नाम्नि नाम्न्युच्चारणनिमित्तं विवक्षां कृत्वेरयति नाम्नि नाम सामान्ये मंत्राः श-
ब्दविशेषाः संत एकं भवंत्यंतर्भवंतीत्यर्थः सामान्ये हि विशेषोऽन्तर्भवति मंत्रेषु कर्माण्येकं भवंति मंत्रप्रकाशितानि कर्माणि

९०

क्रियते नामंत्रकमस्ति कर्म यद्धि मंत्रप्रकाशनेन लब्धसत्ताकं सत्कर्म ब्राह्मणेनेदं कर्तव्यमस्मै फलायेति विधीय
ते यापत्पत्तिर्ब्राह्मणेषु कर्मणो दृश्यते साऽपि मंत्रेषु लब्धसत्ताकानामेव कर्मणां स्पष्टीकरणं न हि मंत्राऽप्रकाशितं क
र्म किंचिद्ब्राह्मण उत्पन्नं दृश्यते त्रयीविहितं कर्मेति प्रसिद्धं लोके त्रयीशब्दश्च ऋग्यजुःसामाख्या मंत्रेषु कर्माणि क
त्रयोयान्यपेक्षंतेति नाथर्वणे तस्मात्कर्म मंत्रेषु कर्माण्येकं भवंतीति तानि ह वा एतानि मन आदीनी संकल्पैकायना
नि संकल्प एकायनं गमनं प्रलयो येषां तानि संकल्पैकायनानि संकल्पात्मकान्युत्पत्तौ संकल्पप्रतिष्ठितानि स्थितौ स
मक्लृपतां संकल्पं कृतवत्याविव हि द्यौश्च पृथिवी च द्यावापृथिव्यौ निश्चले लक्ष्येते समकल्पेतां वायुश्चाकाशं च ते पि
संकल्पं कृतवतीऽव तथा समकल्पन्तामापश्च तेजश्च स्वेन रूपेण निश्चलानि लक्ष्यन्ते यतस्तेषां द्यावापृथिव्यादीनां
संक्लृप्त्यै संक्लृप्ते संकल्पनिमित्तं वर्षं संकल्पते समर्थी भवति तथा वर्षस्य संक्लृप्त्यै संकल्पनिमित्तमन्नं वृष्टिहेतुकं भव
त्यन्नस्य संक्लृप्त्यै प्राणाः संकल्पन्तेऽन्नमया हि प्राणा अन्नोपष्टंभका अन्नं दामेति हि श्रुतिस्तेषां संक्लृप्त्यै मंत्राः संकल्पन्तेऽन्न
मया हि मंत्रानधीते नाबलो हि मंत्राणां हि संक्लृप्त्यै कर्माण्यग्निहोत्रादीनि संकल्पन्तेऽनुष्ठीयमानानि मंत्रप्रकाशितानि सम

छां०भा०

२१

र्थीभवंति फलाय ततो लोकः फलं संकल्पते करिष्यस्मर्थायितया समर्थी भवतीत्यर्थः लोकस्य संक्लृप्त्यै सर्वं जगत्संकल्पते स्वरू
पावैकल्याय वृष्ट्यादि जगत्फलावसानं तत्सर्वं संकल्पमूलमतो विशिष्टः स एष संकल्पोऽतः संकल्पमुपास्स्वेत्युक्त्वा फलमाह
तदुपासनस्य स यः संकल्पं ब्रह्मेति ब्रह्मबुद्ध्योपास्ते क्लृप्तान्वै धाता अस्य मे लोकाः फलमिति क्लृप्तान्समर्थितान्संकल्पितान्स
विद्वान्ध्रुवान्नित्यान्ध्रुवांश्चापि त्वयाध्रुवः स्वयं लोकिनो ह्यध्रुवत्वे लोकेऽध्रुवक्लृप्तिर्व्यर्थेति ध्रुवस्थः प्रतिष्ठितानुपकरण
संपन्नानित्यर्थः पशुपुत्रादिभिः प्रतिष्ठितानिति प्रतीति दर्शनात्स्वयं च प्रतितिष्ठत आत्मीयोपकरणसंपन्नोऽव्यथमानानमित्रा
दित्रासरहितानव्यथमानश्च स्वयमभिसिध्यत्यभिप्राप्नोतीत्यर्थः यावत्संकल्पस्य गतं संकल्पगोचरस्तत्रास्य यथाकाम
चारो भवत्यात्मनः संकल्पस्य न तु सर्वेषां संकल्पस्येत्यत्र परफलविसेधाद्यः संकल्पं ब्रह्मेत्युपास्त इत्यादि पूर्ववत् चित्तं वा
व संकल्पाद्भूयश्चित्तं चेतयितृत्वं प्राप्तकालानुरूपबोधवत्त्वमतीतानागतविषयप्रयोजननिरूपणसामर्थ्यं च तत्संकल्पा
दपि भूयः कथं यदा वै प्राप्तं वास्त्विदमेवं प्राप्तमिति चेतयते तदा दानाय वा सोहाय वाथ संकल्पयते अथ मनस्यतीत्यादि पूर्व
वत् तानि संकल्पादीनि कर्मफलान्तानि चित्तैकायनानि चित्तात्मानि चित्तोत्पत्तीनि चित्ते प्रतिष्ठितानि चित्तलक्षितानि अपि च वै

२१

...स्यादस्यान्श्रुतमप्यश्रुतमेवेत्याहुरित्यर्थः अथवान्यविदपि यद्ययं चित्तवान्भवति॥

वं त्र्या किंच चित्तस्य माहात्म्यं यस्माच्चित्तं संकल्पादिमूलं तस्माद्यद्यपि बहुविद्बहुशास्त्रादिपरिज्ञानवान्सन्नचित्तो भवति प्राप्तादिवे
तयितृत्वसामर्थ्यविरहितो भवति तं निपुणा लौकिका नायमस्ति विद्यमानोऽप्यसत्सम एवेत्येनमाहुः यच्चायं किंचिच्छास्त्रादि वेद श्रु
तवांस्तदप्यस्य वृथैवेति कथयन्ति कस्माद्यद्ययं विद्वान्स्यादित्थमेवमचित्तो न स्यात्तस्मैए तस्मै तदुक्तार्थग्रहणाय चोतापि शुश्रूषं
ते श्रोतुमिच्छन्ति तस्माच्चित्तं ह्येवैषां संकल्पादीनामेकायनमित्यादि पूर्ववत् चित्तानुपचिता बुद्धिमद्गुणैः स चित्तोपासको
ध्रुवानित्यादि चोक्तार्थम्॥ ध्यानं वाव चित्ताद्भूयो ध्यानं नाम शास्त्रोक्तदेवताद्यालंबनेष्वचलो भिन्नजातीयैरनंतरितः प्रत्यय
सन्तान एकाग्रतेति यमाहुः दृश्यते च ध्यानस्य माहात्म्यं फलतः कथं यथा योगी ध्यायन्निश्चलो भवति ध्यानफललाभे एवं
ध्यायतीव निश्चला दृश्यते पृथिवी ध्यायतीवांतरिक्षमित्यादि समानमन्यत् देवाश्च मनुष्याश्च देवमनुष्याः मनुष्या एव वा दे
वाः शमादिगुणसंपन्ना देवस्वरूपं न जहतीत्यर्थः यस्मादेवं विशिष्टं ध्यानं तस्माद्य इह लोकेषु मनुष्याणामेव ध
नैर्विद्यया गुणैर्वा महत्तां महत्त्वं प्राप्नुवन्ति धनादिमहत्त्वहेतुं लभंत इत्यर्थः ध्यानापादांशा इव ध्यानस्यापादनमापादो ध्यानस्य
फललाभ इत्येतत्तस्यांशोऽवयवः कला काचिद्ध्यानफललाभकलावन्त इवेत्यर्थः भवन्ति निश्चला इव लक्ष्यन्ते न क्षुद्रा इवाथ ये पु

छां० भा०

नरल्पाः क्षुद्राः किं चिदप्यभिनादि महत्त्वैकदेशाः प्राप्तास्ते पूर्वोक्तविपरीताः कलहिनः कलहशीलाः पिशुनाः परदोषोद्भा-
सकाः उपवादिनः परदोषं सामीप्ययुक्तमेव वदितुं शीलं येषां त उपवादिनश्च भवन्त्यथ ये महत्त्वं प्राप्ता ध्यानादिनिमित्तं ते ऽन्या-
तिशयवन्तो निभृता विद्याचार्यराजेश्वरादयो ध्यानापादांशा इवेत्यध्याहार्यं मतो दृश्यते ध्यानस्य महत्त्वं फलतो ऽतस्तद्वित-
दतस्तदुपास्स्वेत्याद्यध्याहार्यं प्रा विज्ञानं वाव ध्यानाद्भूयो विज्ञानं शास्त्रार्थविषयं विज्ञानं तस्य ध्यानकारणत्वाद्ध्यानाद्भूयस्त्वं

१२

कथं तस्य भूयस्त्वमित्याह विज्ञानेन वा ऋग्वेदं विजानात्ययमृग्वेद इति प्रमाणतया यस्यार्थज्ञानं ध्यानकारणं तथा यजुर्वेदमि-
त्यादि किं च पशूंश्च धर्मं चाधर्मं च शास्त्रसिद्धौ साधु चासाधु च लोकतः स्मार्त्तं वा दृष्टविषयं च सर्वं विज्ञानेनैव विजानातीत्यर्थः
तस्माद्युक्तं ध्यानाद्विज्ञानस्य भूयस्त्वमतो विज्ञानमुपास्स्वेति शृणूपासनफलं शृ विज्ञानवतो विज्ञानं येषु लोकेषु तान्विज्ञा-
नवतो लोकान्ज्ञानवतश्चाभिसिद्ध्यत्यभिप्राप्नोति विज्ञानं शास्त्रार्थविषयं ज्ञानमन्यविषयं नैपुण्यं तद्वद्भिर्युक्तान्लोकानाप्नोती-
त्यर्थः यावद्विज्ञानस्येत्यादि पूर्ववत् बलं वाव विज्ञानाद्भूयो बलमित्यन्नोपयोगजनितं मनसो विज्ञेये प्रतिभानसामर्थ्य-
मनशनाद्धि ग्लानादीनि नैव मा प्रतिभाति इति श्रुतेः शरीरेऽपि तदेवोत्थानादिसामर्थ्यं यस्मात् ... पुरुषः प्राणी बलवानाकंप

१२

यते यथा हस्ती मत्तो मनुष्याणां शतं समुदितमपि यस्मादेवमन्नाद्युपयोगनिमित्तं स पुरुषो यदा बली बले
न तद्वान्भवति यथोक्तानोत्थाता उत्थानस्य कर्त्ता तिष्ठंश्च गुरूणामाचार्यस्य च परिचरिता परिचरणस्य शुश्रूषायाः क
र्त्ता भवति परिचरन्नुपसत्ता तेषां समीपगोऽन्तरंगः प्रियो भवतीत्यर्थः। उपसीदंश्च सामीप्यं गच्छन्नेकाग्रतया
चार्यस्यान्यस्य चोपदेष्टुर्गुरोर्द्रष्टा भवति ततस्तदुक्तस्य श्रोता भवति तत इदमेवमुपपद्यत इत्युपपत्तितो
मन्ता भवति मन्वानश्च बोद्धा भवत्येवमेवेदमिति ततएवं निश्चित्य तदुक्तार्थस्य कर्त्ता भवत्यनुष्ठाता भवति विज्ञाता
नुष्ठानफलस्यानुभविता भवतीत्यर्थः। किं च बलस्य माहात्म्यं बलेन वै पृथिवी तिष्ठतीत्याद्युक्तार्थम्। अन्नं
वाव बलाद्भूयो बलहेतुत्वात्कथं बलहेतुत्वमित्युच्यते यस्माद्बलकारणमन्नं तस्माद्यद्यपि कश्चिद्दशरात्रं नाश्नी
यात्सोऽन्नोपयोगनिमित्तस्य बलस्य हान्या म्रियते न चेन्म्रियते यद्यप्यसौ जीवेद्धि मासमप्यनश्नतोऽजीवतो
यच्च जीवन्नप्यद्रष्टा भवति गुरोरपि तत एव श्रोतेत्यादि पूर्वविपरीतं सर्वं भवत्यथ यदा बह्वन्यहान्यनशितो दर्श
नादिक्रियासु च समर्थश्च सन्नन्नस्यायी आगमनं समायोगप्राप्तिरित्यर्थः। सा यस्य विद्यते सोऽन्नस्यायी आय इत्येतद्

लो ३

छां०भा०

र्णव्यत्ययेनाथान्नस्यायै इत्यपि पाठ एवमेवार्थः॥ द्रष्टेत्यादिकार्यश्रवणाद् दृश्यते ह्यन्नोपयोगे दर्शनादिसामर्थ्यं न तस्य
तावतोन्नमुपास्स्वेति फलं चान्नवतः प्रभूतान्नान्वै स लोकान्पानवतः प्रभूतान्नपानयोर्नित्यसंबंधाल्लोकानभि
सिध्यति समानमन्यत्॥ आपो वा अन्नाद्भूयस्योन्नकारणत्वाद्यस्मादेवं तस्माद्यदा यस्मिन्काले सुवृष्टिः सस्यहिता शोभ
ना वृष्टिर्न भवति तदा व्याधीयन्ते प्राणा दुःखिनो भवन्ति किं निमित्तमित्याहान्नमस्मिन्संवत्सरे नः कनीयोल्पतरं भवि
ष्यतीत्यथ पुनर्यदा सुवृष्टिर्भवति तदानंदिनः सुखिनो हृष्टाः प्राणाः प्राणिनो भवंत्यन्नं बहु प्रभूतं भविष्यतीति अपां
भवत्वान्मूर्तस्यान्नस्याप एवेमा मूर्ता मूर्तभेदाकारपरिणता इति मूर्ता येयं पृथिवी यदंतरिक्षमित्याद्या आप एवेमा मूर्ता
अतोप उपास्स्वेति फलं स योपो ब्रह्मेत्युपास्ते आप्नोति स सर्वान्कामान्मूर्तिमतो विषयानित्यर्थः॥ अपां भवाच्च तृप्ते
रंबुपासनात्तृप्तिमांश्च भवति समानमन्यत्॥ तेजो वा अद्भ्यो भूयस्तेजसोप्कारणत्वात्कथमप्कारणत्वमित्याह यस्मा
दब्योनि तेजस्तस्मादेतद्वै तत्क्वैतत्तेजो वायुमागृह्यावष्टभ्यात्मना निश्चलीकृत्य वायुमाकाशमभितपत्याकाश
मभिव्याप्नुवत्तपति यदा तदाहुर्लौकिका निशोचति नितपति संतपति सामान्येन गात्राणि तपति देहानतो वै वर्षिष्यति वा इति प्रसि

९३

९३

इंहिलोकेकारणमन्नाद्यंतंदृष्ट्वातत्कार्यंभविष्यतीतिविज्ञानंभवतितेजएवतत्पूर्वमात्मानमुद्भूतंदर्शयित्वायातत्र
रंसृजतेतोऽप्स्रष्टृत्वादद्भ्योभूयस्तेजः॥किंवान्यत्तदेततेजऊर्ध्वगामिश्चोर्ध्वगामित्विर्विद्युद्दीप्तिरश्मीनिश्चमहाक्रंदास्तनम
राद्धाश्चरंतितस्मात्तद्दर्शनाद्दाहुर्लौकिकानिद्योततेस्तनयतिवर्षिष्यतिवाइत्याद्युक्तार्थं॥अतस्तेजउपास्स्वेतितस्यते
जसउपासनफलंतेजस्वीवैभवतितेजोवतएवलोकान्भास्वतः॥प्रकाशावतोपहततमस्कान्बाह्याध्यात्मिकाज्ञाना
द्यपहततमस्कानभिसिद्ध्यत्यृज्वर्थमन्यत्॥आकाशोवावतेजसोभूयान्वायुसहितस्यतेजसःकारणत्वाद्योम्नोवायु
मारुद्ध्येतितेजसासहोक्तोवायुरितिद्रष्टव्यमिहलोकेतेजसःकारणंहिलोकेकार्याद्भूयोदृष्टंघटादिभ्योमृत्तथाकाशो
वायुसहितस्यतेजसःकारणमितिततोभूयान्कथमाकाशेवैसूर्याचंद्रमसावुभौतेजोरूपौविद्युन्नक्षत्राण्यग्निश्चते
जोरूपाण्याकाशेऽन्तर्यच्चयस्यान्तर्वर्तितदल्पंभूयइतरत्॥किंचाकाशेनाह्वयतिचान्यमन्यआहूतश्चेतरआकाशेन
शृणोत्यन्योक्तंचशब्दमन्यःप्रतिशृणोत्याकाशेरमतेक्रीडत्यन्योन्यंसर्वस्तथारमतेवाकाशेबंधादिवियोगेआका
शेजायतेनमूर्तेनावष्टब्धेतथाकाशमभिलक्ष्यांकुरादिजायतेनप्रतिलोममाकाशमुपास्स्वफलंशृणुआकाशवतोवै

छां॰भा॰

विस्तारयुक्तास्सविद्यास्यकाशवतः प्रकाशाकाशयोर्नित्यसंबंधात्सकाशवतश्चलोकान संबाधासंबाधनं संबाधस्तस्मिन्नसंबा
धोन्योन्यपीडातद्रहितानसंबाधानुरुगायवतो विस्तीर्णगती विस्तीर्णप्रचारांल्लोकानभिसिध्यतियावदाकाशस्येत्यादि का
र्यम्भू स्मरो वाव आकाशाद्भूयस्स्मरणं स्मरोंतःकरणधर्मः स आकाशाद्भूयइतिद्रष्टव्यं लिंगव्यत्ययेन स्मर्तुः स्मरणे हि स
त्याकाशादि सर्वमर्थवत्स्मरणवतो भोग्यत्वादसति तु स्मरणे सदप्यसदेव सत्वकार्याभावान्नापि सत्वस्मृत्याभावेश
क्यमाकाशादीनामवगंतुमित्यतः स्मरणस्याकाशाद्भूयस्त्वं दृश्यते हि लोके स्मरणस्य भूयस्त्वं यस्मात्तस्माद्यद्यपि समुदि
ताबहवएकस्मिन्नासीरन्नुपविशेयुस्ते तत्रासीना अन्योन्यभाषितमपि न स्मरंतश्चेत्तु नैव ते कंचन शब्दं शृणुयुस्त
था न मन्वीरन्मंतव्यं न चेच्छृणुयुस्तदा मन्वीरन्स्मृत्यभावान्न मन्वीरंस्तथा न विजानीरन्यदा वाव ते स्मरेयुर्मंतव्यं विज्ञा
तव्यं श्रोतव्यं वाथ शृणुयुरथ मन्वीरन्नथ विजानीरंस्तथा स्मरणेन वै मम पुत्रा एत इति पुत्रान्विजानाति स्मरेण पशू
न्तो भूयस्त्वात्स्मरमुपास्वेत्यर्थमन्यत् आशा वाव स्मराद्भूयसी अप्राप्तवस्त्वाकांक्षाशा तृष्णा काम इति यामाहुः
पर्यायैः सा वै स्मराद्भूयसी कथमाशया ह्यंतःकरणस्थया स्मरति स्मर्तव्यमाशाविषयरूपं स्मरंस्तु सोस्मरो भवत्यतः

९४   ९४   न

आशयेद्ध आशया विवर्द्धितं स्मरभूतः स्मरन्नृगादीन्मंत्रानधीतेऽधीत्य च तदर्थं ब्राह्मणेभ्यो विधीं श्रुत्वा कर्माणि कुरुते तत्फ
लायैव पुत्रांश्च पशूंश्च कर्मफलभूतानिच्छतेऽभिवाञ्छति आशयैव तत्साधनान्यनुतिष्ठतीमं च लोकमाशेद्ध एव स्मर
ल्लोकसंग्रहहेतुमिच्छत्यमुं च लोकमाशेद्धः स्मरंस्तत्साधनानुष्ठानेनेच्छते तत आशारशनाबद्धः स्मराकाशादिनामपर्य
न्तं जगच्चक्रीभूतं प्रतिप्राणि अत आशायाः स्मरादपि भूयस्त्वमित्यत आशामुपास्स्व यस्त्वाशां ब्रह्मेत्युपास्ते शृणु तस्य फलमाशा
यास्य सदोपासितयास्योपासकस्य सर्वे कामाः समृध्यन्ति समृद्धिं गच्छन्ति अमोघा हास्याशिषः प्रार्थनाः सर्वा भवन्ति यत्प्रार्थितं तत्स
र्वं तद्भवतीत्यर्थः यावदाशाया गतमित्यादि पूर्ववत् । नामोपक्रममाशान्तं कार्यकारणत्वेन निमित्तनैमित्तिकत्वेन चोत्त
रोत्तरं भूयस्तयावस्थितं स्मृतिनिमित्तसद्भावमाशारशनापाशैर्विपाशितं सर्वतो बिसमिव तन्तुभिर्यस्मिन्प्राणे समर्पितं येन
सर्वतो व्यापिना तद्बहिर्गतेन सूत्रेण मणिगणा इव सूत्रेण ग्रथितं विधृतं च स एष प्राणो वै आशाया भूयान् कथमस्य भूयस्त्वमि
त्याह दृष्टान्तेन समर्थयन् भूयस्त्वं यथा वै लोके रथचक्रारा रथनाभौ समर्पिताः प्रोताः संप्रवेशिता इत्येतदेवमस्मिंल्लिंगसंघातरूपे प्रा
णप्रज्ञात्मनि देहिके मुख्ये यस्मिन्परा देवता नामरूपव्याकरणायादर्शादौ प्रतिबिंबवज्जीवेनात्मनानुप्रविष्टा यस्तु महाराजस्ये

छां० भा० ९५

वसर्वाधिकारीश्वरस्य कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वाहं प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति श्रुतेर्यस्तु छायेवा
नुगत ईश्वरं तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष
प्राण एव प्रज्ञात्मेति कौषीतकीनां मत एवमस्मिन्प्राणे सर्वं यथोक्तं समर्पितमतः स एष प्राणः परतन्त्रः प्राणेन स्वशक्त्यैव याति नान्यकृतं
गमनादिक्रियास्वस्य सामर्थ्यमित्यर्थः सर्वं क्रियाकारकफलजातं प्राण एव न प्राणाद्बहिर्भूतमस्तीति प्रकरणार्थः प्राणः प्राणं ददाति
यद्ददाति तत्स्वात्मभूतमेवास्मै ददाति तदपि प्राणायैवातः पित्राद्याख्यापि प्राण एव कथं पित्रादिशब्दानां प्रसिद्धार्थोत्सर्गेण प्राणविषय
त्वमित्युच्यते सति प्राणे पित्रादिषु पित्रादिशब्दप्रयोगात्तदुत्क्रान्तौ च प्रयोगाभावात् कथं तदित्याह स यः कश्चित्पित्रादीनामन्यतमं यदि तं तुं
रामिव तदननुरूपमिव किंचिद्वचनं त्वंकारादियुक्तं प्रत्याह तदैनं पार्श्वस्था आहुर्धिग्वेकिनो धिक्त्वास्तु धिगस्तु त्वामित्येवं पितृहा वै त्वं पितृ
र्हन्तेत्यादि अथैनानेवोत्क्रान्तप्राणांस्त्यक्तदेहनाथान् यद्यपि शूलेन समासं समस्य व्यतिषंदहेद्दहेत्यस्य संदहेदेवमतिक्रूरमपि कर्म समा
समासादिप्रकारेण दहनलक्षणं तद्देहसंबद्धमेव कुर्वाणं नैवैनं ब्रूयुः पितृहेत्यादि तस्मादन्वयव्यतिरेकाभ्यामवगम्यते एतत्पित्राद्या
ख्यापि प्राण एवेति तस्मात्प्राणो ह्येवैतानि सर्वपित्रादीनि सर्वाणि भवति चलानि स्थिराणि च स एवं वा एष प्राणविदेवं यथोक्तप्रकारेण पश्य

९५

न्फलतोनुभवन्नेवं मन्वान उपपत्तिभिश्चिन्तयन्नेवं विजानन्नुपपत्तिभिः संयोजयन्नेवमेवेति निश्चयं कुर्वन्नित्यर्थः मननविज्ञा
नाभ्यां हि संभूतैः शास्त्रार्थो दृष्टो भवेदत एवं पश्यन्नतिवादी भवति नामाद्याशान्तमतीत्य वदनशीलो भवतीत्यर्थः तं चेद्ब्रूयुरतिवा
दिनं सर्वदा सर्वैः शब्दैर्नामाद्याशांतमतीत्य वर्त्तमानं प्राणमेव वदत्येवं पश्यंतमतिवदनशीलमतिवादिनं ब्रह्मादिस्तंबपर्यंतस्य ज
गतः प्राण आत्माहमिति ब्रुवाणं यदि ब्रूयुरतिवाद्यसीति बाढमस्मीति ब्रूयान्नापह्नुवीत कस्माद्यस्मान्नापह्नुवीत यत्प्राणं सर्वेश्वरमय
महमस्मीत्यात्मत्वेनोपगतः स एष नारदः सर्वातिशयं प्राणं स्वमात्मानं सर्वात्मानं श्रुत्वा नातः परमस्तीत्युपरराम न पूर्ववत्किमस्ति
ए प्राणाद्भूय एवं इति पप्रच्छ यतस्तमेवं विकारानृतब्रह्मज्ञानेन परितुष्टमकृतार्थं परमार्थसत्यातिवादिनमात्मानं मन्यमानं योग्यं शि
ष्यं मिथ्याग्रहविशेषाद्विप्रच्यावयन्नाह भगवान्सनत्कुमार एष तु वा अतिवदति यमहं वक्ष्यामि न प्राणविदतीवादी परमार्थतो नामा
द्यपेक्षं तु तस्यातिवादित्वं यस्तु भूमाख्यं सर्वातिक्रांतं तत्त्वं परमार्थसत्यं वेद सोतिवादीत्यत आह एष तु वा अतिवदति यः सत्येन परमार्थ
सत्यविज्ञानवत्तयातिवदति सोहं त्वां प्रपन्नो भगवन्यः सत्येनातिवदानि तथा मां नियुनक्तु भगवान्यथाहं सत्येनातिवदानीत्यभि
प्रायः यद्येवं सत्येनातिवदितुमिच्छसि सत्यमेव तावद्विजिज्ञासितव्यमित्युक्त आह नारदस्तथास्तु तर्हि सत्यं भगवो विजिज्ञास इति विशेष

छां॰भा॰

णज्ञातुमिच्छेयं ब्रूतो हमिति यदा वै सत्यं परमार्थतो विजानाति इदं परमार्थतः सत्यमिति ततोऽनृतं विकारजातं वाचारंभणं हित्वा सर्वविका
रावस्थं सद्वैकं सत्यमिति तदेवाथ वदति यद्वदति। ननु विकारोऽपि सत्यमेव नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नं प्राणा वै सत्यं तेषामेष स
त्यमिति श्रुत्यंतरात्सत्यमुक्तं सत्यत्वं श्रुत्यंतरे विकारस्य न तु परमार्थापेक्षमुक्तं किं तर्हि इंद्रियविषयाविषयत्वापेक्षं सच्च त्यच्चेति सत्यमि
त्युक्तं तद्द्वारेण च परमार्थसत्यस्योपलब्धिर्विवक्षितेति प्राणा वै सत्यं तेषामेष सत्यमिति चोक्तमिहापि तदिष्टमेव प्राणविषयात्परमार्थ

२६

सत्यविज्ञाने। मिमानाद्धक्षाय नारदं यत्सदेव सत्यं परमार्थतो ब्रूमास्त्वं तद्विज्ञापयिष्यामीत्यपविशेषतो विवक्षितार्थानां विज्ञानस
त्यं वदति यस्त्वविज्ञानं वदति सोऽग्न्यादिशब्दं नाग्न्यादीन्परमार्थसद्रूपान्मन्यमानो वदति न तु ते रूपत्रयव्यतिरेकेण परमार्थतः संति त
थातान्यपि रूपाणि सदपेक्ष्याणि नैव संतीत्यतो नाविज्ञानं सत्यं वदति न च सत्यविज्ञानमविजिज्ञासितमप्रार्थितं ज्ञायत इत्याह विज्ञानं
त्वेव विजिज्ञासितव्यमिति यद्येवं विज्ञानं भगवो विजिज्ञास इति एवं सत्यादीनां चोत्तराणां करोत्यंतानां पूर्वपूर्वहेतुत्वं व्याख्येयं यदा
वै मनुत इति मतिर्मननं तर्को मंतव्यविषय आदर आस्तिक्यबुद्धिः श्रद्धा निष्ठा गुरुशुश्रूषादि तत्परत्वं ब्रह्मविज्ञानाय यदा वै करोति
कृतिरिंद्रियसंयमश्चित्तैकाग्रताकरणं च सत्यां हि तस्यां निष्ठादीनि यथोक्तानि भवंति विज्ञानावसानानि सापि कृतिर्यद्वा सुखं लभ्यते

२६

सुखं निरतिशयं वक्ष्यमाणं लब्धव्यं मयेति मन्यते तदा भवतीत्यर्थः॥ यथा दृष्टफलसुखाकृष्टस्तथेहापि नासुखं लब्ध्वा करोति प न
विषयादपि फलं लब्ध्वेत्युच्यते यद्दुःखरूपं प्रवृत्तिरूपं ते॥ अथेदानीं कृत्यादिष्वत्तरेषु सत्सु सत्यं स्वयमेव प्रतिभास्यते न तद्विज्ञानाय
पृथग्यत्नः कार्य इति प्राप्तं तत इदमुच्यते सुखं त्वेव तु विजिज्ञासितव्यमित्यादि॥ सुखं भगवो विजिज्ञास इत्यभिमुखीभूतायाह
यो वै भूमा महन्निरतिशयं बह्विति पर्यायास्तत्सुखं॥ ततोर्वाक्सातिशयत्वादल्पमतस्तस्मिन्किल सुखं नास्त्यल्पस्याधिकतृ
ष्णाहेतुत्वात्तृष्णा च दुःखबीजं न हि दुःखबीजं सुखं दृष्टं ज्वरादि लोके तस्माद्युक्तं नाल्पे सुखमस्तीत्यतो भूमैव सुखं तृष्णादिदुःखबीज
त्वासंभवाद्भूम्नः॥ किंलक्षणोसौ भूमेत्याह यत्र यस्मिन्भूम्नि तत्त्वे नान्यद्द्रष्टव्यमन्येन करणेन द्रष्टान्यो विभक्तो दृश्यान्न पश्यति तथा नान्य
च्छृणोति नामरूपयोरेवांतर्भावाद्विषयभेदस्य तद्ग्राहकयोरेवेह दर्शनश्रवणयोर्ग्रहणमन्येषां चोपलक्षणार्थत्वेन मननं त्वत्रोक्तं
द्रष्टव्यं नान्यन्मनुत इति प्रायशो मननपूर्वकत्वाद्विज्ञानस्य तथा नान्यद्विजानातीत्येवंलक्षणो यः स भूमा॥ किमत्र प्रसिद्धान्यदर्श
नाभावो भूमेत्युच्यते नान्यत्पश्यतीत्यादिनाऽथान्यन्न पश्यत्यात्मानं पश्यतीत्येतदा किं चातः॥ यद्यन्यदर्शनाद्यभावो भूमेत्युच्यते ततो
द्वैतसंव्यवहारविलक्षणो भूमेत्युक्तं भवति यथा अन्यदर्शनविशेषप्रतिषेधेनात्मानं पश्यतीत्युच्यते तदेकस्मिन्नेव क्रियाकारक

भा॰३

छां० गा०

फलभेदो व्यपगतो भवेद्यद्येवं को दोषः स्यात्तत्त्रयमेव दोषः संसारानिवृत्तिः क्रियाकारकफलभेदो हि संसार इत्यात्मैकत्वे एव क्रि
याकारकफलभेदः संसारविलक्षण इति चेन्नात्मनो निर्विशेषकत्वात् व्यपगमे दर्शनादिक्रियाकारकफलभेदात्यपगमस्य शब्द
मात्रत्वाद्यदन्यदर्शनाद्यभावोक्तिपक्षेऽपि यत्रेत्यन्यन्न पश्यतीति च विशेषणे अनर्थके स्यातामिति चेद् दृश्यते हि लोके यत्र शून्ये गृहे
ऽन्यन्न पश्यतीत्युक्ते स्तंभादीनात्मानं च पश्यतीति गम्यत एवमिहापीति चेन्न तत्त्वमसीत्येकत्वोपदेशाद्विकरणाधिकर्तव्यत्वे
नुपपत्तेस्तथा सदेकमेवाद्वितीयं सत्यमिति षष्ठे निर्धारितत्वाद्दृश्येनात्म्येन संदृशे तिष्ठति रूपमस्य विज्ञातारमरे केन विजानी
यादित्यादिश्रुतिभ्यः स्वात्मनि दर्शनाद्यनुपपत्तिश्च यत्रेति विशेषणमनर्थकं प्राप्तमिति चेन्नाविद्याकृतभेदापेक्षत्वाद्यथा सत्येक
त्वाद्वितीयत्वबुद्धिं प्रकृतामपेक्ष्य सदेकमेवाद्वितीयमिति संख्याद्यनर्हमप्युच्यते एवं भूम्न्येकस्मिन्नेव यत्रेति विशेषणमविद्या
वस्थायामन्यदर्शनाद्यनुवादेन भूम्नस्तदभावलक्षणस्य विवक्षितत्वान्नान्यत्पश्यतीति विशेषणं तस्मात्संसारव्यवहारे भूम्नि ना
स्तीति समुदायार्थः। अथ यत्राविद्याविषये न्योन्यो न्यत्पश्यतीति तदल्पमविद्याकालभावीत्यर्थः। यथा स्वप्नदृश्यं वस्तु प्राक्प्र
बोधात्कालभावीति तद्वत्तदेव तन्मर्त्यं विनाशि स्वप्नवस्तुवदेव तद्विपरीतो भूमा यस्तदमृतं तच्छब्दोऽमृतत्वपरः स तर्हि एवं ल

८७

र्नामान्तस्योत्पत्तिप्रलयावभूतां सदात्मविज्ञाने तु सतीदानीं स्वात्मत एव संवृत्तौ तथा सर्वोऽप्ययं व्यवहार आत्मत एव विदुषः॥
किं च तदेतस्मिन्नर्थे एष श्लोको मन्त्रोऽपि भवति न पश्यः पश्यतीति पश्यो यथोक्तदर्शी विद्वानित्यर्थः मृत्युं मरणं रोगं ज्वरादि दुः
खतां दुःखभावं चापि न पश्यति सर्वं ह सर्वमेव स पश्यः पश्यत्यात्मानमेव सर्वं ततः सर्वमाप्नोति सर्वशः सर्वप्रकारैरिति। किं
च स विद्वान्प्राक्सृष्टिप्रभेदादेकधैव भवत्येकधैव सन् त्रिधादिभेदैरनन्तभेदप्रकारो भवति सृष्टिकाले पुनः संहारकाले मू
लमेव स्वं पारमार्थिकमेकधाभावं प्रतिपद्यते स्वतन्त्र एवेति विद्याफलं प्ररोचयन् स्तौति। अथेदानीं यथोक्ताया विद्यायाः सम्य
गवभासकारणं सुखावभासकारणस्य चादर्शस्य विशुद्धिकारणं साधनमुपदिश्यते। आहारशुद्धौ आह्रियत इत्याहारः श
ब्दादिविषयज्ञानं भोक्तुर्भोगायाह्रियते तस्य विषयोपलब्धिलक्षणस्य विज्ञानस्य शुद्धिराहारशुद्धिः रागद्वेषमोहदोषैरसंसृ
ष्टं विषयज्ञानमित्यर्थः। तस्यामाहारशुद्धौ सत्यां तद्वतोऽन्तःकरणस्य सत्त्वस्य शुद्धिर्नैर्मल्यं भवति सत्त्वशुद्धौ च सत्यां यथावगते
भूमात्मनि ध्रुवा अविच्छिन्ना स्मृतिरविस्मरणं भवति तस्यां च लब्धायां स्मृतिलम्भे सति सर्वेषामविद्याकृतानर्थपाशरूपाणाम
नेकजन्मान्तरानुभवभावनाकठिनीकृतानां हृदयाश्रयाणां ग्रन्थीनां विप्रमोक्षो विशेषेण प्रमोक्षणं विनाशो भवतीति॥

छां०ना०

यत्तदुत्तरोत्तरं यथोक्तमाहारशुद्धिमूलं तस्मात्कार्यमित्यर्थः॥ सर्वशास्त्रार्थमशेषतस्त्वाख्यायिकामुपसंहरति श्रुतिः तस्मै मृदितकषायाय वार्क्षादिरिव कषायो रागद्वेषादिदोषः सत्त्वस्य रंजनारूपत्वात्तं ज्ञानवैराग्याभ्यासक्षारेण क्षालितवते मृदितो विनाशितो यस्य नारदस्य तस्मै योग्याय मृदितकषायाय तमसोऽविद्यालक्षणात्पारं परमार्थतत्त्वं दर्शयति दर्शितवानित्यर्थः॥ भगवानुत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति एवंधर्मा सनत्कुमारस्तमेव सनत्कुमारं देवं स्कंद इत्याचक्षते कथयंति तद्विदो द्विर्वचनमध्यायपरिसमाप्त्यर्थम्॥ ॥इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ छांदोग्योपनिषद्विवरणे सप्तमोध्यायः समाप्तः॥ ॥श्रीकृष्ण॥ ॥यद्यपि दिग्देशकालादिभेदशून्यं ब्रह्म सदेकमेवाद्वितीयमात्मैवेदं सर्वमिति षष्ठसप्तमयोरधिगतं तथापीह मंदबुद्धीनां दिग्देशादिभेदवद्वस्त्विति एवं भाविता बुद्धिर्न शक्यते सहसा परमार्थविषया कर्तुमिति अनधिगम्य च ब्रह्म न पुरुषार्थसिद्धिरिति तदधिगमाय हृदयपुंडरीकदेश उपदेष्टव्यो यद्यपि सम्यक्प्रत्ययैकविषयं निर्गुणं चात्मतत्त्वं तथापि मंदबुद्धीनां गुणवत्त्वस्येष्टत्वात्सत्यकामादिगुणवत्त्वं च

९९ ९९

ख१

वक्तव्यं तथा यद्यपि ब्रह्मविदां स्त्र्यादिविषयेभ्यः स्वयमुपरमो भवति तथाप्यनेकविषयसेवाभ्यासजनिता विषयविषया
तृष्णा न सहसा निवर्तयितुं शक्या इति ब्रह्मचर्यादिसाधनविशेषो विधातव्यः। तथा यद्यप्यात्मैकत्वविदां गंतृगमनगंतव्याभा
वाद् विद्यादिशेषस्थितिनिमित्तक्षये गगना इव विद्युदुद्भूत इव वायुर्दग्धेंधन इवाग्निः स्वात्मन्येव निवृत्तिस्तथापि गंतृ
गमनादिवासितबुद्धीनां हृदयदेशगुणविशिष्टब्रह्मोपासकानां मूर्द्धन्यया नाड्या गतिर्वक्तव्येत्यष्टमः प्रपाठक आर
भ्यते दिग्देशगुणगतिफलशून्यं हि परमार्थसदद्वयं ब्रह्म मंदबुद्धीनामसदिव प्रतिभाति मार्गस्थास्तावद्भवंतु ततः परमार्थ
सदपि ग्राहयिष्यामीति मन्यते श्रुतिः। अथानंतरं यदिदं वक्ष्यमाणं दहरमल्पं पुंडरीकं पुंडरीकसदृशं वेश्म इव वेश्म द्वा
रपालादिमत्त्वादस्मिन्ब्रह्मपुरे ब्रह्मणः परस्य पुरं राज्ञोनेकप्रकृतिमद्यथा पुरं तथेदमनेकेंद्रियमनोबुद्धिभिः स्वाम्य
र्थकारिभिर्युक्तमिति ब्रह्मपुरं पुरे च वेश्म राज्ञो यथा तथा तस्मिन्ब्रह्मपुरे शरीरे दहरं वेश्म ब्रह्मण उपलब्ध्यधिष्ठानमित्य
र्थः। यथा विष्णोः शालग्रामोऽस्मिन्हि स्वविकारसुंगे देहे नामरूपव्याकरणाय प्रविष्टं सदस्ति ब्रह्म जीवेनात्मनेत्युक्तं तस्माद
स्मिन्हृदयपुंडरीके वेश्मन्युपसंहृतकरणैर्बाह्यविषयविरक्तैर्विशेषतो ब्रह्मचर्यसत्यसाधनाभ्यां युक्तैर्वक्ष्यमाणगुणवद्ध्या व-

यस्मान्नैवब्रह्मोपलभ्यतइतिप्रकरणार्थः॥दहरोल्पतरोवेश्मनोल्पतरत्वाद्दहरोस्मिन्नंतराकाशआकाशाख्यंब्रह्मआकाशोवैना
मेतिहिवक्ष्यतिआकाशइवाशरीरत्वात्सूक्ष्मत्वसर्वगतत्वसामान्याच्चतस्मिन्नाकाशाख्येयदंतर्मध्येतदन्वेष्टव्यंतद्वावतद्व
वविशेषेणविजिज्ञासितव्यंगुर्वाश्रयश्रवणाद्युपायैरन्विष्यचसाक्षात्करणीयमित्यर्थः॥तंचेदेवमुक्तवंतमाचार्यंयदिब्रू
युरंतेवासिनश्चोदयेयुःकथंयदिदमस्मिन्ब्रह्मपुरेपरिछिन्नेदहरंपुंडरीकंवेश्मततोप्यल्पतरएवआकाशःपुंडरीके

१००

एववेश्मनितावत्किंस्यात्किंततोल्पतरेखेयद्भवेदित्याहदहरोस्मिन्नंतराकाशःकिंतदत्रविद्यतेनकिंचनविद्यतइत्यभि
प्रायःयदिनामबदरमात्रंकिमपिविद्यतेकिंतस्यान्वेषणेनविजिज्ञासनेनवाफलंविजिज्ञासितुःस्यादतोयत्तत्रान्वेष्टव्यं
विजिज्ञासितव्यंवानततःप्रयोजनमित्युक्तवतःसआचार्योब्रूयादितिश्रुतेर्वचनंशृणुततत्रयच्चोद्यंपुंडरीकांतःस्थस्या
ल्पत्वात्तत्स्थमल्पतरंस्यादितितदसन्नहिखंपुंडरीकवेश्मगतंपुंडरीकादल्पतरंमत्वावोचंदहरोस्मिन्नंतराकाशइतिकिंत
र्हिपुंडरीकमल्पंतदनुविधायितत्स्थमंतःकरणंपुंडरीकाकाशपरिछिन्नंतस्मिन्विशुद्धेसंहृतकरणानांयोगिनांस्वच्छइ
वादर्शेप्रतिबिंबरूपमादर्शइवस्वच्छंशुद्धंविज्ञानज्योतिःस्वरूपावभासंतावन्मात्रंब्रह्मोपलभ्यतइतिदहरोस्मिन्नं

द्यपि देहसंबंधिन्यां जरामृत्यू त्वयां न संबध्यातेऽन्यथापि संबंधस्ताभ्यां स्यादित्याशंकानिवृत्त्यर्थं विशोको विगतशोकः शोको नामेष्टादिवियोगनिमित्तो मानसः संतापो विजिघत्सो विगताशनेच्छोऽपिपासोऽपानेच्छो न त्वपहतपाप्मत्वेन जरादयः शोकांताः प्रतिषिद्धा एव भवंति कारणप्रतिषेधाद्धर्मो धर्मकार्यो हि त इति जरादिप्रतिषेधेन वा धर्माधर्मयोः कार्याभावे विद्यमानयोरप्यसत्समत्वमिति पृथक्प्रतिषेधो नर्थकः स्यात्सत्यमेवं तथापि धर्मकार्याणां द्व्यतिरेकेण स्वाभाविकानंदो यथेश्वरे विज्ञानमानंदमिति श्रुतेस्तथा धर्मजरादिव्यतिरेकेणाजरादिदुःखस्वरूपं स्वाभाविकं स्यादित्याशंक्यतेऽतो युक्तस्तन्निवृत्तये जरादीनां धर्माधर्मेभ्यां पृथक्प्रतिषेधो जरादिग्रहणं सर्वदुःखोपलक्षणार्थं पापनिमित्तानां तु दुःखानामानंत्यात्प्रत्येकं च तत्प्रतिषेधस्याशक्यत्वात्सर्वदुःखप्रतिषेधार्थं युक्तमेवापहतपाप्मत्ववचनं सत्या अवितथाः कामा यस्य सोऽयं सत्यकामो वितथा हि संसारिणां कामा ईश्वरस्य तु तद्विपरीतास्तथा कामहेतवः संकल्पा अपि सत्या यस्य स सत्यसंकल्पः संकल्पाः कामाश्च शुद्धसत्त्वोपाधिनिमित्ता ईश्वरस्य चित्रगुवन्नस्वतो नेति नेतीत्यात्मत्वाद्यथोक्तलक्षण एवात्मा विज्ञेयो गुरुभ्यः शास्त्रतश्चात्मसंवेद्यतया च स्वाराज्यकामैर्न चेद्विज्ञायते को दोषः स्यादिति शृणु तु दोषं दृष्टांतेन यथा ह्येवेह लोके प्रजा अन्वाविशंति यथानुशासनं यथे

छां०भा०

हप्रजाअन्यंस्वामिनंमन्यमानाःस्वस्यस्वामिनोयथायथानुशासनंतथाचाविशंति किंयंयमंतंप्रत्ययंजनपदंक्षेत्रभागंवा
भिकामाअर्थिनोभवंतिआत्मबुद्ध्यनुरूपंतंतमेवचप्रत्यंतादिमुपजीवंति। एषदृष्टांतोस्वातंत्र्यदोषंप्रतिपुण्यफलोपभोगेऽ
थान्योदृष्टांतस्तस्यायंभवतितद्यथेहेत्यादिस्तत्रयथेहलोकेतासामेवस्वाम्यनुशासनवर्त्तिनीनांप्रजानांसेवादिजितोलो
कःपराधीनोपभोगःक्षीयतेऽन्नवान्भवति। अथेदानींदार्ष्टांतिकमुपसंहरतिएवमेवामुत्राग्निहोत्रादिपुण्यजितोलोकःप
राधीनोपभोगःक्षीयतएवेत्युक्तोदोषएषामितिविषयंदर्शयतितद्यइत्यादिनातत्रयेहास्मिंल्लोकेज्ञानकर्मणोरधिकृतायो
ग्याःसंतआत्मानंयथोक्तलक्षणंशास्त्राचार्योपदिष्टमननुविद्ययथोपदेशमनुस्वसंवेद्यतामकृत्वाव्रजंतिदेहादस्मा
त्प्रयन्तियएतांश्चयथोक्तान्सत्यान्सत्यसंकल्पकार्यांश्चस्वात्मस्थान्कामाननुविद्यव्रजन्तितेषांसर्वेषुलोकेष्वकामचारो
स्वतंत्रताभवतियथाराजानुशासनानुवर्त्तिनीनांप्रजानामित्यर्थः अथयेऽन्यइहलोकात्आत्मानंशास्त्राचार्योपदेशमनु
विद्यस्वात्मसंवेद्यतामापाद्यव्रजंतियथोक्तांश्चसत्यान्कामांस्तेषांसर्वेषुलोकेषुकामचारोभवतिराज्ञइवसार्वभौमस्येहलो
के। कथंसर्वेषुलोकेषुकामचारोभवतीत्युच्यतेयआत्मानंयथोक्तलक्षणंहृदिसाक्षात्कृतवान्वक्ष्यमाणब्रह्मचर्यादिसाध

१०२

१०२

१७०

नसंपन्नस्तं तत्स्थाँश्च सत्यान्कामान्स त्यक्तदेहो यदि पितृलोककामः पितरो जनयितारस्त एव सुखहेतुत्वेन भोग्यत्वाल्लोका
उच्यन्ते तेषु कामो यस्य स्यात्सः पितृभिः संबंधेच्छा यस्य भवति तस्य संकल्पमात्रादेव पितरः समुत्तिष्ठंत्यात्मसंबंधितामापद्यन्ते वि
शुद्धसत्वतया सत्यसंकल्पत्वादीश्वरस्येव तेन पितृलोकेन गतेन भोगेन संपन्नः संपत्तिरिष्टप्राप्तिस्तया समृद्धो महीयते व
र्धते वर्द्धते वा महिमानमनुभवति समानमन्यत् ॥ मातरो जनयित्र्योऽतीताः सुखहेतुभूताः सामर्थ्यान्न हि दुःखहेतुभूतासु
या मसूकरादिजन्मनिमित्तासु मातृषु विशुद्धसत्वस्य योगिन इच्छासंबंधो वा युक्तो यं यमंतं प्रदेशमभिकामो भवति यं च का
मं कामयते यथोक्तव्यतिरेकेणापि सोऽस्यांतः प्राप्तुमिष्टकामश्च संकल्पादेव समुत्तिष्ठत्यस्य तेनेछाऽर्थितेन तयाऽभिप्रेतार्थप्रा
प्त्यावसंपन्नो महीयत इत्यर्थः यथोक्तात्मध्यानसाधनानुष्ठानं प्रति साधकानामुत्साहजननार्थमनुक्रोशन्नाह कष्ट
मिदं खलु वर्तते यतः स्वात्मस्था शक्याप्राप्या अपि त इमे सत्याः कामा अनृतापिधानास्तेषामात्मस्थानां स्वाश्रयाणामेव सतामनृ
तं बाह्यविषयेषु स्त्र्यन्नपानाच्छादनादिषु तृष्णा तन्निमित्तं वा स्वेच्छाचारत्वं मिथ्याज्ञाननिमित्तत्वादनृतमित्युच्यते तन्निमि
त्तं सत्यानां कामानामप्राप्तिरित्यपिधानमिवापिधानं कथमनृतापिधाननिमित्तं तेषामलाभ इत्युच्यते योऽन्यो हि यस्मादस्य ज

छां०भा०

प्र४

१०३

तो ऽस्य पुत्रो भ्राता वेष्ट इतोऽस्माल्लोकात्प्रैति प्रगच्छति म्रियते तं मृतं पुत्रं भ्रातरं वा स्वहृदयाकाशे विद्यमानमपीह पुनर्दर्शनाय ऽच्छन्न
पि न लभते ऽथ पुनर्ये चास्य विदुषो जीवंति जीवंतीह पुत्रा भ्रात्रादयो ये वास्य प्रेता मृता इष्टाः संबंधिनो यच्चान्यदिह लोके व
स्त्वन्नपानादि रत्नादि वा वस्त्विच्छन्न लभते तत्सर्वमत्र हृदयाकाशाख्ये ब्रह्मणि गत्वा यथोक्तेन विधिना विंदते लभते ऽत्रास्मिन् हृ
र्द्याकाशे हि तस्माद्यथोक्ताः सत्याः कामा वर्त्तंते ऽनृतापिधानाः कथमिव तदन्यायमित्युच्यते तत्र यथा हिरण्यनिधिं हिरण्य
मेव पुनर्ग्रहणाय निधातृभिर्निधीयत इति निधिस्तं हिरण्यनिधिं निहितं भूमेरंतर्निधिक्षमदेशज्ञा निधिशास्त्रेनापि विदे
त्रमजानंतस्तं निधेरुपर्युपरि संचरंतोपि निधिं न विंदेयुः शक्यवेदनमप्येवमेवेमा अविद्यावत्यः सर्वाः प्रजा इमा यथोक्तं हृद
याकाशाख्यं ब्रह्मलोकं ब्रह्मैव लोकस्तमहरहः प्रत्यहं गच्छंत्योपि सुषुप्तकाले न विंदंति न लभंते एषोऽहं ब्रह्मलोकमावमापन्नोऽस्मी
त्यनृतेन हि यथोक्तेन हि यस्मात्प्रत्यूढा हृताः स्वरूपादविद्यादिदोषैर्बहिरपकृष्टा इत्यर्थः अतः कष्टमिदं वर्त्तते जंतूनां यत्स्वा
यत्तमपि न लभ्यत इत्यभिप्रायः ।।सवा एष आत्माऽपहतपाप्मेति प्रकृतो वाशब्देन संस्मारयत्येष विवक्षित आत्मा हृदि हृदय
पुंडरीके आकाशशब्देनाभिहितस्तस्यैतस्य हृदयस्य तदेव निरुक्तं निर्वचनं नान्यद्धृदयआत्मा वर्त्तत इति यस्मात्तस्माद्धृदयं

१०३

170

हृदयनाम निर्वचनप्रसिद्ध्यापि स्वहृदय आत्मेत्यवगंतव्य इत्यभिप्रायः॥ अहरहर्वै एवंवित्प्रहमेवंविद्धृदयमात्मेति जानन्स्वर्गं लो
कं हार्दं ब्रह्मेति प्रतिपद्यते। नन्वनेवंविदपि सुषुप्तकाले हार्दं ब्रह्म प्रतिपद्यत एव सुषुप्तकाले सता सोम्य तदा संपन्नो भवतीत्युक्त-
त्वात्। बाढमेवं तथाप्यस्ति विशेषो यथा जानन्नजानंश्च सर्वो जंतुस्तु ब्रह्मैव तथापि तत्त्वमसीति प्रतिबोधितो विद्वान्सदेव नान्योऽस्मी
ति जानन्सदेव भवत्येवमेव विद्वानविद्वांश्च यद्यपि सुषुप्ते सत्संपद्यते तथाप्येवंविदेव स्वर्गं लोकमेतीत्युच्यते देहपातेऽपि विद्याफ
लस्यावश्यंभावित्वादित्येष विशेषः सुषुप्तकाले स्वेनात्मना सता संपन्नः सन्सम्यक्प्रसीदतीति जाग्रत्स्वप्नयोर्विषयेंद्रियसंयो
गजातं कालुष्यं जहातीति संप्रसादशब्दो यद्यपि सर्वजंतूनां साधारणस्तथाप्येवंवित्स्वर्गं लोकमेतीति प्रकृतत्वादेष संप्रसाद
इति संनिहितवद्वचनाद्विशेषात्सोऽथेदं शरीरं हित्वास्माच्छरीरात्समुत्थाय शरीरात्मभावनां परित्यज्येत्यर्थः। नत्वासनादिवस-
मुत्थायेति हि युक्तं स्वेन रूपेणेति विशेषणात्। न ह्यन्यत उत्थाय स्वरूपं संपत्तव्यं स्वरूपमेव हि तन्न भवति प्रतिपत्तव्यं चेत्स्यात्परंप
रमात्मलक्षणं विज्ञप्तिस्वभावं ज्योतिःस्वरूपं संपद्य स्वां स्वाभाव्यमुपगम्येत्येतत्तत्स्वेनात्मीयेन रूपेणाभिनिष्पद्यते प्रागेतस्याः स्वरूपसं
पत्तेरविद्यया देहमेवापरं रूपमात्मत्वेनोपगत इति तदपेक्षयेदमुच्यते स्वेन रूपेणेत्यशरीरता ह्यात्मनः स्वरूपं यत्स्वं परं ज्योतिः

तिद्दुर

छां॰ भा॰

स्वरूपमापद्यते संप्रसाद एष आत्मेति होवाच स ब्रूयादिति यत् ॥ श्रुत्यानियुक्तो तेंवासिभ्यः ॥ किं चैतदमृतमविनाशि भूमायो वै भू
मा तदमृतमित्युक्तमत एवाभयं भूम्नो द्वितीयाभावादत एव ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नामाभिधानं किं तत्सत्यमिति सत्यं ह्य
वितथं ब्रह्म तत्सत्यं स आत्मेत्युक्तं ॥ अथ किमर्थमिदं नाम पुनरुच्यते तदुपासनविधिस्तुत्यर्थं तानि वा एतानि ब्रह्मणो नामाक्षराणि
त्रीण्येतानि सतीयमिति सकारस्तकारो यमिति तीत्यत्र ईकारस्तकार उच्चारणार्थोऽनुबंधो ह्रस्वेनैवाक्षरेण पुनः प्रतिनिर्देशात्तेषां तत्र
च यत्सकारस्तदमृतं सद्ब्रह्मामृतवाचकत्वादमृत एव सकारस्तकारांतो निर्दिष्टोऽथ यत्तकारस्तन्मर्त्यं मर्त्यमथ यद्यमक्षरं तेनाक्षरेण
मृतमर्त्याख्ये पूर्वे उभे अक्षरे यच्छति यमयति नियमयति वशीकरोतीत्यात्मनेत्यर्थः ॥ यद्यस्माद्येन यमित्येतेनोभे यच्छति तस्माद्यंय
ते ह्यवध्येते नयमालदन्तैब्रह्मनामाक्षरस्यापीदममृतत्वादि धर्मैवंविदहरहर्वा एवंवित्स्वर्गं लोकमेतीत्युक्तार्थम् ॥ अथ य आत्मोक्तल
क्षणो यः संप्रसादस्य स्वरूपं वक्ष्यमाणैरुक्तैश्च गुणैः पुनः स्तूयते ब्रह्मचर्यसाधनसंबंधार्थं स एव यथोक्तलक्षण आत्मा स से
तुरिव सेतुर्विधृतिर्विधरणस्तेन हि सर्वं जगद्वर्णाश्रमादि क्रियाकारकफलादि भेद नियमेः कर्तुरूपं विदधता विधृतमधियमाणं ह्य
धरणे दं विश्वं विनश्येत यतस्तस्मात्स सेतुर्विधृतिः किमर्थमसंभेदायेत्याह ॥ एषां भूरादीनां लोकानां कर्तृकर्मफलाश्रयाणामसंभे
दं ॥ सर्व व ... किं मृत नामवत इत्यपा सह्या यस्त्यूयते ब्रह्मनामनिर्वचनेन पूर्वं नाम

स्तुर

१०४

रामः

दाद्याविदारणायाविनाशायेत्येतत्॥ किंविशिष्टश्चासौ सेतुरित्याह॥ नैतं सेतुमात्मानमहोरात्रे सर्वस्य जनिमतः परिच्छेदके सती
नैवं तरतो यथान्ये संसारिणः कालेनाहोरात्रादिलक्षणेन परिच्छेद्या न तथायं कालपरिच्छेद्य इत्यभिप्रायः यस्मादर्वाक्संवत्सरोऽहो
भिः परिवर्त्तत इति श्रुत्यंतरात् तत एवैनं न जरा तरति न प्राप्नोति न तथा मृत्युर्न शोको न सुकृतं न दुःकृतं सुकृतदुःकृते धर्माधर्मौ प्रा
प्तिरत्र तरणशब्देनाभिप्रेता नातिक्रमणं कारणं ह्यात्मा न शक्यं हि कारणातिक्रमणं कर्तुं कार्येणाहोरात्रादि च सर्वं कार्यमतोन्येन ह्यन्यस्य
प्राप्तिरतिक्रमणं वा क्रियेत न तु तेनैव तस्य न हि घटेन मृत्प्राप्यतेऽतिक्रम्यते वा यद्यपि पूर्वं य आत्मापहतपाप्मेत्यादिना पाप्मादिप्रति
षेध उक्त एव तथापीहायं विशेषो न तरतीति प्राप्तिविषयत्वं प्रतिषिध्यते तत्राविशेषेण जराद्यभावमात्रमहोरात्राभ्यामुक्ता उक्ताश्चा
न्ये सर्वे पाप्मान उच्यंतेऽतोऽस्मादात्मनः सेतोर्निवर्त्तन्तेऽप्राप्येवेत्यर्थः॥ अपहतपाप्मा ह्येष ब्रह्मैव लोको ब्रह्मलोक उक्तो यस्माच्च पाप्मकार्यं
मन्धत्वादि शरीरवतः स्यान्न त्वशरीरस्य तस्माद्वा एतमात्मानं सेतुं तीर्त्वा प्राप्यान्धो भवति देहवत्वे पूर्वमन्धोऽपि सन् तथा विद्धः सन् दे
हवत्वे स देहवियोगे सेतुं प्राप्याविद्धो भवति तथोपतापी रोगाद्युपतापवान्सन्ननुपतापी भवति किं च यस्मादहोरात्रे न स्तः सेतौ तस्मा
द्वा एतं सेतुं तीर्त्वा प्राप्य नक्तमपि तमोरूपं रात्रिरपि सर्वमहरेवाभिनिष्पद्यते विज्ञप्त्यात्मज्योतिर्महरिवाहः सदैकरूपं संपद्यत इत्यर्थः॥

स्मा ४

स्वरूपं

सकृद्विभातः सदा विभातः स्वेन रूपेणैष ब्रह्मलोकस्तत्रैवं सत्येतं यथोक्तं ब्रह्मलोकं ब्रह्मचर्येण स्त्रीविषयतृष्णात्यागेन शास्त्राचार्योप
देशमनुविंदंति स्वात्मसंवेद्यतामापादयंति ये तेषामेव ब्रह्मचर्यसाधनवतां ब्रह्मविदामेष ब्रह्मलोको नान्येषां स्त्रीविषयसंपर्कजाततृष्णा
नां ब्रह्मविदामपीत्यर्थः तेषां सर्वेषु लोकेषु कामचारो भवतीत्युक्तार्थम्। तस्मात्परममेतत्साधनं ब्रह्मचर्यं ब्रह्मविदामित्यभिप्रायः॥ आत्मा
सकृत्त्वादिगुणैः स्तुतस्तस्यात्मप्राप्तये ज्ञानकारिसाधनांतरं ब्रह्मचर्याख्यं विधातव्यमित्याह। यज्ञादिभिश्च तत्स्तौति कर्तव्यार्थम्। अथ यद्यज्ञ इति

लोके आचक्षते परमपुरुषार्थसाधनं कथयंति शिष्टास्तद्ब्रह्मचर्यमेव यज्ञस्यापि यत्फलं तद्ब्रह्मचर्यवाँल्लभते ततो यज्ञोपि ब्रह्मचर्यमेवे
ति प्रतिपत्तव्यं कथं ब्रह्मचर्यं यज्ञ इत्याह ब्रह्मचर्येणैव हि यस्माद्यो ज्ञाता स ब्रह्मलोकं यज्ञस्यापि पारंपर्येण फलभूतं विंदते लभते यो
ज्ञातेत्यक्षरानुवृत्तेर्यज्ञो ब्रह्मचर्यमेव। अथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तत्कथं ब्रह्मचर्येणैव साधनेन तमीश्वरमिष्ट्वा पूजयित्वाथ
वैषणामात्मविषयां कृत्वा तमात्मानमनुविंदते। एषणादिष्टमपि ब्रह्मचर्यमेव। अथ यत्सत्त्रायणमित्याचक्षते ब्रह्मचर्यमेव तत्तथा स
तः परस्मादात्मन आत्मनस्त्राणं रक्षणं ब्रह्मचर्यसाधनेन विंदते तत्सत्त्रायणशब्दमपि ब्रह्मचर्यमेव। अथ यन्मौनमित्याचक्षते ब्रह्म
चर्यमेव तद्ब्रह्मचर्येणैव साधनेन युक्तः सन्नात्मानं शास्त्राचार्याभ्यामनुविद्य पश्चान्मनुते ध्यायति अतो मौनशब्दमपि ब्रह्मचर्यमेवा

१०५

थयदनाशकायनमित्याचक्षतेब्रह्मचर्यमेवतद्ध्यमात्मानंब्रह्मचर्येणविंदतेसएषह्यात्माब्रह्मचर्यसाधनवतोननश्यतितस्माद्दनाशका
यनमपिब्रह्मचर्यमेवाथयदरण्यायनमित्याचक्षतेब्रह्मचर्यमेवतदरण्यशब्दयोरर्णवयोर्ब्रह्मगत्स्वतोऽयनादरण्यायनंब्रह्मचर्यंय
ज्ञानाद्यज्ञएषणादिष्टंसतस्त्राणात्सत्रायणंमननान्मौनंमनाशनादनाशकायनमरण्ययोर्गमनादरण्यायनमित्यादिभिर्महद्भिःपुरुषा
र्थसाधनैःस्तुतत्वाद्ब्रह्मचर्यंज्ञानसहकारिकारणसाधनमित्यतोब्रह्मविदायत्नतोरक्षणीयमित्यर्थःतत्रचाहिब्रह्मलोकेऽरश्चहवै
प्रसिद्धोण्यश्चार्णवौसमुद्रौसमुद्रोपमौवास्सरसीतृतीयस्यांभुवमंतरिक्षंचापेक्ष्यतृतीयाद्यौस्तस्यांतृतीयस्यामित्यतोस्माल्लोकाद्दा
रभ्यगण्यमानायांदिवितत्रैवाचैरमिरान्नंतन्मयऐरोमंडस्तेनपूर्णमैरंमदीयंतदुपयोगिनांमदकरंहर्षोत्पादकंसरस्तत्रैवचाश्व
त्थोवृक्षःसोमसवनोनामतश्चसोमोऽमृतंतन्निस्रवोमृतस्रवइतिवातत्रैवचब्रह्मलोकेब्रह्मचर्यसाधनरहितैर्ब्रह्मचर्यसाधनव
द्भ्योन्यैर्नजीयतइतिअपराजितानामपूःपुरीब्रह्मणोहिरण्यगर्भस्यब्रह्मणाचप्रभुणाविशेषेणमितंनिर्मितंतत्रहिरण्मयंसौवर्णं
प्रभुविमितंमंडपमितिवाक्यशेषःतत्रचब्रह्मलोकएतावर्णवौयावरण्याख्यावुक्तौब्रह्मचर्येणसाधनेनानुविंदंतियेतेषामेवैषया
व्याख्यातोब्रह्मलोकस्तेषांचब्रह्मचर्यसाधनवतांब्रह्मविदांसर्वेषुलोकेषुकामचारोभवतिनान्येषामब्रह्मचर्यपराणांबाह्यविषया

१०६

णीसक्तबुद्धीनां कदाचिदपीत्यर्थः ॥ ननु त्वमिंद्रस्त्वं यमस्त्वं वरुण इत्यादिभिर्यथा कश्चित्स्तूयते महाराज एवमिष्टादिभिः शब्दैर्न स्त्र्यादि
विषयतृष्णानिवृत्तिमात्रं स्तुत्यर्हं किं तर्हि ज्ञानस्य मोक्षसाधनत्वात्तदेवेष्टादिभिः स्तूयत इति केचित् न स्त्र्यादिविषयतृष्णापहतचित्ता
नां प्रत्यगात्मविवेकविज्ञानानुपपत्तेः पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नांतरात्मन्नित्यादिश्रुतिस्मृतिभ्यो ज्ञानस
हकारिकारणं स्त्र्यादिविषयतृष्णानिवृत्तिसाधनं विधातव्यमिममेवेति युक्तैवं तत्स्तुतिर्ननु च यज्ञादिभिः स्तुतं ब्रह्मचर्यमिति यज्ञा
दीनां पुरुषार्थसाधनत्वं गम्यते सत्यं गम्यते न त्विह ब्रह्मलोकं प्रति यज्ञादीनां साधनत्वमभिप्रेत्य यज्ञादिभिर्ब्रह्मचर्यं स्तूयते किं तर्हि
तेषां प्रसिद्धं पुरुषार्थसाधनत्वमपेक्ष्य यथेंद्रादिभी राजा न तु यथेंद्रादीनां व्यापारस्तत्रैव राज्ञ इति तद्व्रायश्च मेऽर्णवाद्यो ब्रह्म
लौकिकाः ॥ संकल्पजाश्च पित्रादयो भोगास्ते किं पार्थिवा आप्याश्च यथेहलोके दृश्यंते तद्वदर्णववृक्षपूः स्वर्णमंडपाद्याहोस्विन्मा
नसप्रत्ययमात्राणीति किंचातो यदि पार्थिवा आप्याश्च स्थूलाः स्युर्दहराकाशे समाधानानुपपत्तिः पुराणे च वैश्लेमयानि ब्रह्मलो
के शरीरादीनीति वाक्यं विरुध्येत तारोकमहिमेत्याद्याश्च श्रुतयो नद्यः समुद्राः सरितः सरांसि वाप्यः कूपा यज्ञा वेदा मंत्रादयश्च मू
र्तिमंतो ब्रह्माणमुपतिष्ठंत इति मानसत्वे विरुध्येत पुराणस्मृतिर्न मूर्तिमत्त्वे प्रसिद्धरूपाणामेव तत्र गमनानुपपत्तेस्तस्मात्प्रसि

१०६

मनो

ध्मूर्त्तिव्यतिरेकेण सागरादीनां मूर्त्यंतरं सागरादिभिरूपान्तं ब्रह्मलोकगंतृ कल्पनीयं ल्पायां च कल्पनायां यथाप्रसिद्धा एवमा
नस्य आकारवत्यो मूर्त्तयो युक्ताः॥ कल्पयितुं मानसदेहानुरूपसंबंधोपपत्तेर्दृष्टा हि मानस्य एवाकारमैत्र्य॥ पुंस्त्र्याद्यामूर्त्तय॥ स्वप्ने
ननु ता अनृता एवं तर्हि मे सत्या॥ कामा इति श्रुतिस्तथा सति विरुद्ध्येत न मानसप्रत्ययस्य सत्त्वोपपत्तेर्मानसा हि प्रत्यया॥ स्त्रीपुरु
षाद्याकारा॥ स्वप्ने दृश्यन्ते ननु जाग्रद्वासनारूपा॥ स्वप्ने दृश्या ननु तत्र स्त्र्यादयो विद्यंते तुल्यमिदमुच्यते जाग्रद्विषया अपि मान
सप्रत्ययाभिर्निर्वृत्ता एव सदीप्ताभिर्निर्वृत्ते तेजोबन्नमयत्वाज्जाग्रद्विषयाणां संकल्पमूला हि लोका इति चोक्तं समक्लृप्तां द्यावापृ
थिवीत्यत्र सर्वश्रुतिषु प्रत्यगात्मन उत्पत्तिः॥ प्रलयश्च तत्रैव स्थितिश्च यथा वा अरा नाभावित्यादिनोच्यते तस्मान्मानसानां बाह्यानां च
विषयाणामितरेतरकार्यकारणत्वमिष्यत एव बीजांकुरवद्यद्यपि बाह्या एव मानसा मानसा एव च बाह्या नानृतत्वं वा तेषां कदाचिद
पि स्वात्मनि भवति ननु स्वप्ने दृष्टा॥ प्रतिबुद्धस्यानृता भवंति विषया॥ सत्यमेव जाग्रद्बोधापेक्षं तु तदनृतत्वं न स्वतस्तथा स्वप्नबोधा
पेक्षं च जाग्रद्दृष्टविषयानृतत्वं न स्वतो विशेषाकारमात्रं तु सर्वेषां मिथ्याप्रत्ययनिमित्तमिति वाचारंभणं विकारो नामधेयमनृतं
त्रीणि रूपाणीत्येव सत्यं तान्यपाकारविशेषतोऽनृतं स्वतः॥ सन्मात्ररूपतया सत्यं प्राक्सदात्मप्रतिबोधात्स्वविषयेपि सर्वं सत्यमेव

छां०ज्ञा० स्वप्नदृश्यस्येवेति न कश्चिद्विरोधस्तस्मान्मानसा एव ब्रह्मलोकिका अरण्यादयः संकल्पजाश्वत्थादयः कामा बाह्यविषयभोग
वदशुद्धिरहितत्वाच्छुद्धसत्वसंकल्पजन्या इति निरतिशयसुखाः सत्याश्चेश्वराणां तु वत्नीत्यर्थः सत्यसत्यात्मप्रतिबोधेपि रज्ज्वामि
व कल्पिताः सर्पादयः सदात्मस्वरूपतामेव प्रतिपद्यंत इति सदात्मना सत्या एव ते वर्तंति॥ यस्तु हृदयपुंडरीकगतं मध्यात्मगुणवि
शिष्टं ब्रह्म ब्रह्मचर्यादिसाधनसंपन्नस्त्यक्तबाह्यविषयानृततृष्णः सन्नुपास्ते तस्येयं मूर्धन्यया नाड्या गतिर्वक्तव्येति खंड आरभ्य
ते। अथ या एता वक्ष्यमाणा हृदयस्य पुंडरीकाकारस्य ब्रह्मोपासनस्थानस्य संबंधिन्यो नाड्यो हृदयमांसपिंडात्सर्वतो विनिःसृ १०७
१०७ ता आदित्यमंडलादिव रश्मयस्ताश्चैताः पिंगलस्य वर्णविशेषविशिष्टस्याणिम्नः सूक्ष्मरसस्य पूर्णास्तदाकारा एव तिष्ठंति
वर्तंत इत्यर्थः। तथा शुक्लस्य नीलस्य पीतस्य लोहितस्य च रसस्य पूर्णा इति सर्वत्राध्याहार्यं। सौरेण तेजसा पित्ताख्येन पाका
ति निर्वृत्तेन कफेनाल्पेन संपर्कात्पिंगलं भवति सौरं तेजः पित्ताख्यं तदेव च वातभूयस्त्वान्नीलं भवति तदेव च कफभूयस्त्वा
च्छुक्लं कफेन समतायां पीतं शोणितबाहुल्येन लोहितं वैद्यकाद्वा वर्णविशेषा अन्वेष्टव्याः। कथं भवंतीति श्रुतिस्त्वाह। आदि
त्यसंबंधादेव तत्तेजसो नाडीष्वनुगतस्यैते वर्णविशेषा इति कथं असौ वा आदित्यः पिंगल एष वर्णतः एष आदित्यः शुक्ल एष नी

लस्य पीतस्य लोहितस्य आदित्य एव तस्याध्यात्मं नाडीभिः॥ कथं संबंध इत्यत्र दृष्टांतमाह। तत्तत्र यथा लोके महान्विस्तीर्णः पंथा
महापंथा आततो व्याप्त उभौ ग्रामौ गच्छतीमं च संनिहितममुं च विप्रकृष्टं दूरस्थमेवं यथा दृष्टांतो महापथ उभौ ग्रामौ प्रविष्ट
एवमेवैता आदित्यरश्मय उभौ लोकावादित्यमंडलमिमं च पुरुषं गच्छंत्युभयत्र प्रविष्टा यथा महापथः॥ कथममुष्मादादि
त्यमंडलात्प्रतायंते संतता भवंति ता अध्यात्ममासु पिंगलादिवर्णासु यथोक्तासु नाडीषु सृप्ता गताः प्रविष्टा इत्यर्थः॥ आभ्यो
नाडीभ्यः प्रतायंते प्रवृत्ता अमुष्मिन्नादित्ये सृप्ताः संतानभूताः॥ सत्यस्ते मुष्मिन्नादित्ये रश्मीनामुभयलिंगत्वात् इत्यत्रोच्यते तत्तत्रैवं सति यत्रैतस्मिन्काले
अयं जीवः सुप्तो भवति स्वापस्य द्विप्रकारत्वाद्विशेषणं समस्त इत्युपसंहृतसर्वकरणवृत्तिरित्येतत् अतो बाह्यविषयसंप
र्कजनितकालुष्याभावात्सम्यक्प्रसन्नो भवति अत एव स्वप्नं विषयाकाराभासं मानसं स्वप्नप्रत्ययं न विजानाति नानुभवती
त्यर्थः॥ यदैवं सुप्तो भवत्यासु तदा भूर्णासु यथोक्तासु नाडीषु तदा सृप्तः प्रविष्टो नाडीभिर्द्वारभूताभिर्हृदयाकाशं गतो
भवतीत्यर्थः॥ न ह्यन्यत्र सत्संपत्तेः स्वप्नादर्शनमस्तीति सामर्थ्यान्नाडीभिरिति सप्तमी तृतीयया परिणम्यते तं सता संपन्नं न कश्चन
कश्चिदपि धर्माधर्मरूपः पाप्मा स्पृशतीति न तु सत्संपन्नं स्वरूपावस्थं कश्चिदपि पाप्मा स्प्रष्टुमुत्सहते अविषयत्वादन्यो ह्यन्यस्य
स्वरूपावस्थितश्चातो दात्मनो देहेंद्रियविशिष्टं हि सुखदुःखप्रदानेन पाप्मा स्पृशतीति ॥

छां०भा०

विषयो भवति न त्वन्यस्य केनचित्कुतश्चिदपि सतः संपन्नस्य स्वरूपावस्थानं वा मनोभायत्वभावस्त्वप्रतिगमनं बाह्यविषय प्रतिबोधोऽविद्याकामकर्मबीजस्य ब्रह्मविद्याऽतारात्हितनिमित्तमित्यवोचाम षष्ठ एव तदिहापि अत्येतव्यं यदैवं सुप्तः सोरे णतेजसा नाड्यंतर्गतेन सर्वतः संपन्नो व्याप्तो भवति अतो विशेषेण चक्षुरादिनाडीद्वारैर्बाह्यविषयभोगाय प्रसृतानि करणान्य स्य तदा न भवंति यस्मादस्य करणानां निरोधात्स्वात्मन्येवावस्थितः स्वप्नं न विजानातीति युक्तं तत्रैवं सत्यथ यत्र यस्मिन्काले ऽबलि मानमबलभावं देहस्य रोगादिनिमित्तं जरादिनिमित्तं वा कृशीभावमेतन्नीतः प्रापितो देवदत्तो भवति मुमूर्षुर्यदा भवतीत्यर्थः

१०८

तमभितः सर्वतो वेष्टयित्वासीना ज्ञातय आहुर्जानासि मां तव पुत्रं जानासि मां पितरं चेत्यादि स मुमूर्षुर्यावदस्माच्छरीरादुत्क्राम त्यथ तदैतैरेव यथोक्ताभी रश्मिभिरूर्ध्वमाक्रमते यथाकर्मजितं लोकं प्रत्यविद्वानितरस्तु विद्वान्यथोक्तसाधनसंपन्नः स ओ मित्योंकारेणात्मानं ध्यायन्यथापूर्वं वा ह एवोर्ध्वं वा विद्वांश्चेदितरस्तिर्यग्वेत्यभिप्रायः मीयते प्रमीयते गच्छतीत्यर्थः स विद्वानुत्क्रमिष्यन्यावत्क्षिप्येन्मनो यावता कालेन मनसः क्षेपः स्यात्तावता कालेनादित्यं गच्छति प्राप्नोतीति क्षिप्रं गच्छतीत्यर्थः न तु तावतैव कालेनेति विवक्षितं किमर्थमादित्यं गच्छतीत्युच्यते एतद्वै खलु प्रसिद्धं ब्रह्मलोकस्य द्वारं य आदित्यस्तेन द्वा

१०८

रेण तेन ब्रह्मलोकं गछति विद्वानतो विदुषां प्रपदनं प्रपद्यते ब्रह्मलोकगमनेन द्वारेणेति प्रपदनं निरोधनं निरोधोस्मादादित्या
द विदुषां भवतीति निरोधः ॥ सौरेण तेजसा देहएव निरुद्धः ॥ संतो मूर्द्धन्यया नाड्या नोत्क्रामंतएवेत्यर्थः ॥ विष्वङ्ङन्या इति श्लोकानंदे
तस्मिन्नुक्तेर्थे एष श्लोको मंत्रो भवति शतं चैका चैकोत्तरशतं नाड्यो हृदयस्य मांसपिंडस्य संबंधिन्यः ॥ प्रधानतो भवंत्यानंत्या
द्देहनाडीनां तासामेका मूर्द्धानमभिनिःसृता निर्गता तयोर्द्ध्वमायन् गच्छन्नमृतत्वममृतत्वभावमेति विष्वङ्ङ्नानागतयस्तिर्यग्विस
र्पिण्य ऊर्द्ध्वगाश्चान्या नाड्यो भवंति संसारगमनद्वारभूता नाम तस्माद्याः किं तर्हि उत्क्रमण एवोत्क्रांत्यर्थमेव भवंतीत्यर्थः ॥ द्विरभ्यासः
प्रकरणसमाप्त्यर्थः ॥ अथ य एष संप्रसादोस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति हो
वाचैतदमृतमभयमेतद्ब्रह्मेत्युक्तं तत्र कोसौ संप्रसादः ॥ कथं वा तस्याधिगमो यथासौस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वे
न रूपेणाभिसंपद्यते येन रूपेणाभिनिष्पद्यते स किंलक्षण आत्मा संप्रसादस्य च देहसंबंधीनि पररूपाणि ततो यत्स्व कथं स्व
रूपमित्येतेर्था वक्तव्या इत्युत्तरो ग्रंथ आरभ्यते आख्यायिका तु विद्याग्रहणसंप्रदायविधिप्रदर्शनार्था विद्याग्रहणस्तुत्यर्था च राज
सेवितं पानीयमितिवत् य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोपिपासः ॥ सत्यकामः सत्यसंकल्पः सोन्वेष्टव्यः स

छा०भा०

नायोपलब्धव्यंहृदयपुंडरीकमनिहितंयस्मिन्कामाःसमाहिताःसत्याअनृतापिधानायउपासनसहकारिब्रह्मचर्यंसाधनमुक्तमुपा
सनफलभूतकामप्रतिपत्तयेचमूर्द्धन्यानाड्यागतिरातेहिहितासोऽन्वेष्टव्यःशास्त्राचार्योपदेशैर्ज्ञातव्यःसविशेषेणज्ञातुमेष्टव्योविजि
ज्ञासितव्यःस्वसंवेद्यतामापादयितव्यःकिंतस्यान्वेषणाद्विज्ञानाद्वास्यादित्युच्यतेससर्वांश्चलोकानाप्नोतिसर्वांश्चकामान्यस्तमात्मानं
यथोक्तेनप्रकारेणशास्त्राचार्योपदेशेनान्विष्यविजानातिस्वसंवेद्यतामापादयतितस्यैतत्सर्वलोककामावाप्तिस्सर्वात्मताफलंभवती
तिहकिलप्रजापतिरुवाचान्वेष्टव्योविजिज्ञासितव्यइतिवैषनियमविधिर्नापूर्वविधिरेवमन्वेष्टव्योविजिज्ञासितव्यइत्यर्थःदृष्टार्थत्वा
दन्वेषणविजिज्ञासनयोर्दृष्टार्थत्वंचदर्शयिष्यतिनाहमत्रभोग्यंपश्यामीत्यनेनासत्यपररूपेणचदेहादिष्वेवमेवगम्यमानस्यात्मनः
स्वरूपाधिगमेविपरीताधिगमनिवृत्तिर्दृष्टंफलमितिनियमार्थतैवास्यविधेर्युक्तानत्विहाग्निहोत्रादीनामिवापूर्वविधित्वमिहसंभ
वतितद्धोभयइत्याद्याख्यायिकाप्रयोजनमुक्तंतद्धकिलप्रजापतेर्वचनमुभयेदेवासुरादेवाश्चासुराश्चदेवासुराअनुपरंपरागतंस्वकर्ण
गोचरापन्नमनुबुबुधिरेअनुबुद्धवन्तस्तेतत्प्रजापतिवचोबुध्वाकिमकुर्वन्नित्युच्यतेतेहोचुःकृतवन्तोऽन्योन्यंदेवाश्चपरिषत्यसुराश्चहन्तय
मनुमतिर्भवतांप्रजापतिनोक्तंतमात्मानमन्विच्छामोऽन्वेषणंकुर्मोयमात्मानमन्विष्यसर्वांश्चलोकानाप्नोतिसर्वांश्चकामानित्युक्त्वाइंद्रोहवा

१०९

१०९

जैव स्वयं देवानामितरा देवाश्च भोगपरिच्छेदं च सर्वं स्थापयित्वा शरीरमात्रेणैव प्रजापतिं प्रत्यभिप्रवव्राज प्रगतवान् तथा विरोच
नोऽसुराणां विनयेनम्य स्वोपिंगं तथा इत्येतद्दर्शयति त्रैलोक्यराज्याद्गुरुतरा विद्येति यतो देवासुरराजौ महार्हौ गार्हस्थ्ये हि किं
लासंविदानावेवान्योन्यं संविदमकुर्वाणौ विद्याफलं प्रति अन्योन्यमीर्ष्यां दर्शयन्तौ समित्पाणी समिद्भारहस्तौ प्रजापतिसका
शमाजग्मतुरागतवन्तौ तौ ह गत्वा द्वात्रिंशतं वर्षाणि शुश्रूषापरौ भूत्वा ब्रह्मचर्यमूषतुरुषितवन्तौ अभिप्रायज्ञः प्रजापतिस्तावु
वाच किमिच्छन्तौ किंप्रयोजनमभिप्रेत्य इच्छन्ताववास्तमुषितवन्तौ युवामिति तौ होचतुर्य आत्मेत्यादि भगवतो वचो वेदयं
ते शिष्टा अतस्तमात्मानं ज्ञातुमिच्छन्ताववात्स्वेति यद्यपि प्राक्प्रजापतेः समीपागमनादन्योन्यमीर्ष्यायुक्तौ वज्रतां तथापि विद्या
प्राप्तिप्रयोजनगौरवात्त्यक्तरागद्वेषमोहेर्ष्यादिदोषावेव भूत्वोषतुर्ब्रह्मचर्यं प्रजापतौ तेनेदं प्रख्यापितमात्मविद्यागौरवं तावेवं त
पस्विनौ शुद्धकल्मषौ योग्यावुपलक्ष्य प्रजापतिरुवाच ह य एषोऽक्षिणि पुरुषो निवृत्तचक्षुर्भिर्मृदितकषायैर्दृश्यते योगिभिर्द्द
ष्ट आत्मापहतपाप्मादिगुणो यमवोचं पुराहं यद्विज्ञानात्सर्वलोककामावाप्तिरेतदमृतं भूमाख्यमत एवाभयमत एव ब्रह्म बृहत्त
ममिति। अथ तत्प्रजापतिनोक्तमक्षिणि पुरुषो दृश्यत इति वचः श्रुत्वा छायारूपं पुरुषं जगृहतुर्गृहीत्वा च दृढीकरणाय प्रजापतिं

छां॰भा॰

दृष्टवंतौ अथ योयं हे भगवोप्सु परिख्यायते परिसमंताज्ज्ञायते यश्चायमादर्शे आत्मनः प्रतिबिंबाकारः परिख्यायते खड्गादौ च कतम
एष एषां भवद्भिरुक्तः किं वा एक एव सर्वेष्वित्येवं पृष्टः प्रजापतिरुवाचैष उ एव यश्चक्षुषि द्रष्टा मयोक्त इत्येतन्मनसि कृत्वैषु सर्वेषु अ
न्तेषु मध्येषु परिख्यायत इति होवाच ननु कथं युक्तं शिष्ययोर्विपरीतग्रहणमनुज्ञातुं प्रजापतेर्विगतदोषस्याचार्यस्य सतः नानुज्ञातं
कथं आत्मन्यध्यारोपितपांडित्यमहत्त्वबोद्धृत्वौ हीन्द्रविरोचनौ तथैव च प्रथितौ लोके तौ यदि प्रजापतिना मूढौ युवां विपरीतग्राहिणा
वित्युक्तौ स्यातां ततस्तयोश्चित्ते दुःखं स्यात् तज्जनिताच्च चित्तावसादात् पुनः प्रश्नश्रवणावधारणप्रत्युत्पन्नज्ञानविघातः स्यादतो रक्षणीयौ ११०
शिष्याविति मन्यते प्रजापतिर्गृहीतां तावत्तदुदशरावदृष्टान्तेनापनेष्यामीति ननु न युक्तमेष उ एवेत्यनृतं वक्तुं न चानृतमुक्तं कथ
मात्मनोक्षिपुरुषो मनसि संनिहितः तत्र शिष्यगृहीतच्छायात्मनः सर्वेषां वा अन्तरः सर्वान्तर इति श्रुतेस्तमेवावोचदेष उ एवे
त्यतो नानृतमुक्तं प्रजापतिना तथा च यथेवावां हे भगवो लोमनखादिमंतौ स्व एवमेवेदं लोमनखादिसहितमावयोः प्रतिरूपमुद
शरावे पश्याव इति तौ ह पुनः प्रजापतिरुवाच छायात्मनिश्चयापनयाय साध्वलंकृतौ यथा स्वगृहे सुवसनौ महार्हवस्त्रपरि
धानौ परिष्कृतौ छिन्नलोमनखौ च भूत्वोदशरावे पुनरीक्षेतां यथामिति ह वचनादि देशाय दृष्ट्वा तत्तथैव भूतमिति कथ पुनरनेन सा

१८६

ध्वलंकारादि कृत्वोदशरावादिवेक्षणेन तयोश्छायात्मग्रहोपनीतश्च स्यात्साध्वलंकृतं कारस्सुवसनादीनामागंतुकानां मुच्छायाकरत्वमुदश
राव यथाशारीरसंबद्धानामेवं शारीरस्यापि छायाकरत्वं पूर्वं बभूवेति निगम्यते शारीरैकदेशानां च लोमनखादीनां नित्यत्वेनाभिप्रेतानाम
खंडितानां छायाकरत्वमासीच्छिन्नेषु च नैव लोमनखच्छाया दृश्यते रोमनखादिवच्छरीरस्याप्यागमापायित्वं सिद्धमित्युदशरावादौ दृश्यमा
नस्य तन्निमित्तस्य च देहस्यानात्मत्वं सिद्धमुदशरावादौ छायाकरत्वाद्देहसंबंधालंकारादिवदेतेन यावत्किंचिदात्मीयत्वाभिमतं सुखदुःख
रागाद्वेषमोहादि च कादाचित्कत्वान्नखरोमादिवदनात्मेति प्रत्येतव्यमेवमशेषमिथ्याग्रहापनयनिमित्ते साध्वलंकारादिदृष्टांते प्रजापतिनो
क्तौ कृत्वा तथा कृतवतोरपि छायात्मविपर्यासो विपरीतग्रहणनिवृत्त्यर्थं ह्याह । उदशरावे उदकपूर्णे शरावे वा आत्मानमवेक्षेथां यत्तत्रा
त्मानं पश्यतो न विजानीथास्तन्मे मम प्रब्रूतमाचक्षीयाथामित्युक्तौ तथैवोदशरावेऽवेक्षांचक्राते ऽवेक्षणं चक्रतुस्तथा कृतवंतौ ह प्रजा
पतिरुवाच किं पश्यथ इति ननु तन्मे प्रब्रूतमित्युक्तत्वादुदशरावेक्षणं कृत्वा प्रजापतये न निवेदितमिदमावाभ्यां न विदितमि
त्यनिवेदिते चाज्ञानहेतौ ह प्रजापतिस्तावुवाच किं पश्यथ इति तत्र को ऽभिप्राय इत्युच्यते नैव तयोरिदमावयोरविदितमित्याशंका पूर्वं छाया
त्मन्यात्मप्रत्ययो निश्चित एवासीद्येन वक्ष्यतीति तौ ह शांतहृदयौ प्रवव्रजतुरिति न ह्यनिश्चिते ऽभिप्रेतार्थे प्रशांतहृदयत्वमुपपद्यते तेन नो

छां०भा०

चक्षुरिद्भ्यां मा वाभ्याम विदितमिति विपरीतग्राहिणो वशिष्या वक्तुं प्रेक्षणीयाविति स्वयमेव पप्रच्छ किं पश्यथ इति विपरीतनिश्चयापन
यायवक्ष्यति साध्वलंकृताविताद्यादि तौ हो चतुर्विपरीतग्रहो नापजगाम यस्मात्तस्मात्स्वदोषेणैव केनचित्प्रतिबद्धविवेकविज्ञानाविन्द्र
विरोचनावभूतामिति गम्यते तौ ह पूर्ववदेव दृढनिश्चयौ पप्रच्छ किं पश्यथेति तथैव प्रतिपन्नौ यथैवेदमिति ह पूर्ववद्यथा साध्वलंका
रादिविशिष्टावावां स्व एवमेव तौ छायात्मानाविति सुतरां विपरीतनिश्चयौ बभूवतुर्यस्मान्नो लक्षणं य आत्मापहतपाप्मा इत्युक्त्वा पुन

१११

स्तद्विशेषमन्विष्यमाणयोर्य एषोऽक्षिणि दृश्यत इति साक्षादात्मनि निर्दिष्टे तद्विपरीतग्रहापनयायोदशरावे साध्वलंकारदृष्टान्तेनापि

१११

हितआत्मस्वरूपावबोधाद्विपरीतग्रहो नापगतो तः स्वदोषेण केनचित्प्रतिबद्धविवेकविज्ञानसामर्थ्यौ इति मत्वा यथाभिप्रेतमेवात्मा
नमेष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति प्रजापतिः पूर्ववन्न तु तदभिप्रेतमात्मानं य आत्मेत्याद्यात्मलक्षणश्रवणेनाक्षिपुरु
षश्रुत्या चोदशरावाद्युपपत्त्या च संस्कृतौ तावन्मद्वचनं सर्वं पुनः पुनः स्मरतोः प्रतिबन्धक्षयात्स्वयमेवात्मविषये विवेको भविष्य
तीति मत्वा नः पुनर्ब्रह्मचर्यादेशो वचतयोश्चित्तदुःखोत्पत्तिं परिजिहीर्षकृतार्थबुद्धितया गच्छतावप्युपेक्षितवान्प्रजापतिस्तौ हेन्द्रवि
रोचनौ शान्तहृदयौ कृतार्थबुद्धी इत्यर्थः ॥ न तु राम एव रामश्चैतयोर्जातो विपरीतग्रहो विगतोऽभविष्यत्तजन्यज्ञजगुर्गतवन्तौ एवं तयोर्गं

188

तयोरिंद्रविरोचनयो राज्ञोर्भोगासक्तयोर्यथोक्तविस्मरणंस्यादित्याशंक्याप्रत्यक्षंप्रत्यक्षवचनेनचविन्नउ॥एवंपरिजिहीर्षुस्तौदूरंग
छन्नावन्नीक्ष्यय आत्मापहतपाप्मा इत्यादिवचनवदेतदपि नयोः॥श्रवणगोचरत्वमेष्यतीतिमत्वोवाचप्रजापतिरनुपलभ्ययथा
कलक्षणमात्मानमननुविद्यस्वात्मप्रत्यक्षं वा कृत्वा विपरीतनिश्चयो च यूयं इन्द्रविरोचनावतो व्रजतो गच्छेयातां मतो यतरे देवा वाऽ
सुरावा किं विशेषितेन त्वद्उपनिषदआचार्याया गृहीतात्मविद्यासेयमुपनिषद्येषां देवानामसुराणांवा त एतदुपनिषद एवं विज्ञा
नाः एतन्निश्चयाःभविष्यन्तीत्यर्थः॥ ते किं पराभविष्यंतिश्रेयोमार्गोत्सराभूता बहिर्भूताविनष्टाभविष्यन्तीत्यर्थः॥ स्वगृहं गच्छतोः॥सु
रासुरराजयोर्यः सुरराजः॥ स ह शान्तहृदय एव स विरोचनोऽसुरान् जगाम गत्वा च तेभ्योऽसुरेभ्यः॥ शारीरात्मबुद्धिर्योपनिषत्तामेतामुप
निषदं प्रोवाचोक्तवान् देहमात्रमेवात्मा पित्रोक्त इति तस्मादात्मैव देह इहलोके महय्यः॥ पूजनीयस्तथोपचर्यः॥ परिचरणीयस्तथा
त्मानमेवेहलोके देहं महयन् परिचरंश्चोभौ लोकाववाप्नोतीमं चामुं चेहलोकपरलोकयोरेवसर्वलोकाः॥ कामाश्चान्तर्भवन्तीति॥ श
ओगिरायः॥ तस्मात्तत्संप्रदायोऽद्याप्यनुवर्त्तत इतीहलोकेऽददानमविभागशीलमश्रद्दधानं सत्कार्येषु श्रद्धारहितं यथाशक्त्ययज
मानमयजनस्वभावमाहुरासुर आसुरः॥ खल्वयं यदेवं स्वभावो बतेति खिद्यमाना आहुः॥ शिष्टा असुराणां हि यस्मादश्रद्दधान

छां०भा०

ताललक्षणैषोपनिषत्त्रयोनिपनिषदासंस्कृताः॥सन्तः॥प्रेतस्यशरीरंकुणपंभिक्षयागंधमाल्यान्नादिलक्षणयावसनेनवस्त्रा
दिनाछादनादिप्रकारेणालंकारादिकरणेनध्वजपताकादिकरणेनेत्येवंसंस्कुर्वन्त्यनेनकुणपसंस्कारेणामुंप्रेत्यप्रतिपत्तव्यंलो
कंजेष्यन्तोमन्यन्ते॥अथहकिलेन्द्रोऽप्राप्येवदेवान्देव्याऽचार्योक्तिसंपदायुक्तोगुरोर्वचनंपुनःपुनःस्मरन्नपगच्छन्नेतद्वक्ष्यमाणं
भयंछायात्मग्रहणनिमित्तंददर्शदृष्टवानुदशरावदृष्टान्तेनप्रजापतिनायदर्थोऽध्यायत्तकाललदेकदेशोमघवन्*तःप्रत्यगात्तुद्धो
येनछायात्मग्रहणेदोषंददर्शकथंयथैवखल्वयमस्मिंछरीरेसाध्वलंकृतेछायात्मापिपरिष्कृतोभवतिनखलोमादिरहितोभव
तिएवमेवायंछायात्माप्यस्मिंछरीरेनखलोमादिनिर्देहावयवत्वस्यतुल्यत्वादंधेचक्षुषोपगमेंधोभवतिस्रामेस्रामः॥किलैकने
त्रस्रस्यांधत्वेनगतत्वाद्यलुनोसिकावायस्यसदास्रवतिसस्रामःपरिवृक्णःछिन्नहस्तःछिन्नपादोवास्रामेपरिवृक्णेवादेहे
छायात्मापितथाभवतितथास्यदेहस्यनाशमन्वेषनश्यत्यतोनाहमत्रास्मिंछायात्मदर्शनेदेहात्मदर्शनेवाभोग्यंफलंपश्यामी
त्येवंदोषंदेहछायात्मदर्शनेध्यायन्स्वसमित्पाणिर्ब्रह्मचर्यंवस्तुंपुनरेयायतंहप्रजापतिरुवाचमघवन्यच्छान्तहृदयःप्राव्रा
जीःप्रगतवानसिविरोचनेनसार्द्धंकिमिच्छन्पुनरागमःइतिविजानन्नपिपुनःपप्रच्छेंद्रास्तिआयातिव्यक्तायेयद्धेतुस्तेनमोपसीदे

२

११२

११२

190 188

तियद्वत्तथा वख्यास्यामिति प्रजापतिः पंचदाटमकरोद्यथैव खल्वयमित्यादि एवमेवैति होवाचेमोदप्रजापतिर्मनुतुल्यादिरूपश्रवणे देहच्छायामि
त्यग्रहीदात्मेति देहं तु विरोचनस्तत्किंनिमित्तं तत्र मन्यंते यथेंद्रस्योदशरावादि प्रजापतिवचनं स्मरतो देवानप्रासस्यैवाचार्योक्तबु
द्ध्या छायात्मग्रहणं तत्र दोषदर्शनं यान्नूनं तथा विरोचनस्य देह एवात्मदर्शनं नापि तत्र दोषदर्शनं बभूव तद्वदेव विद्याग्रहणसा
मर्थ्यप्रतिबंधदोषाल्पत्वबहुत्वापेक्षमिंद्रविरोचनयोः छायात्मदेहयोर्ग्रहणमिंद्रोल्पदोषत्वाद्दूरपत इति श्रुत्यर्थमेवस्वबुद्ध्या नतया
न्याहेतरश्छायानिमित्तं देहं द्विवाक्यत्वार्थे लक्षणया जग्राह प्रजापतिनोक्तोयमिति दोषत्रयस्त्वाद्यथा किल नीलानीलयोरादर्शे दृश्यमा
नयोर्वाससोर्यन्नीलं तन्महार्हमिति छायानिमित्तं वास एवोच्यते न छाया तद्वद्विरोचनाभिप्रायः स्वचित्तदुर्गुणदोषवशाद्बहिश्छावधा
रणं तुल्येपि श्रवणे ख्यापितं दाम्यत दत्त दयध्वमिति तदकारमात्रश्रवणाद्भूत्यंतरे निमित्तान्यपि तद्गुणान्येव सहकारीणि भवंत्येवमे
वैष मघवन्सम्यक्तौ यात्वयावगतं न छायात्मेत्युवाच प्रजापतिर्यो मघवन् आत्मा एतमेवात्मानं तु ते भूयः पूर्वं व्याख्यातमप्यनुव्याख्यास्यामि
यस्मात्सकृद्व्याख्यातं दोषरहितानामवधारणविषयप्राप्तामपि न्यग्रहीरत्केनचिद्दोषेण प्रतिबद्धग्रहणसामर्थ्यस्त्वमतस्त्वं दर्पणाय
वसापराणि द्वात्रिंशतं वर्षाणि स्वकक्षा तथोषितवते दर्पितवते दर्पितदोषाय तस्मै होवाचायमात्मापहतपाप्मादिलक्षणो य एकोक्तिणीत

दिनाव्याख्यातएषसकौसोयः स्वप्नेमहीयमानः स्व्यादिभिः पूज्यमानश्चरत्यनेकविधान्स्वप्नभोगाननुभवतीत्यर्थः॥ एषआत्मेत्यादिहोवाचे
त्यादिसमानम्॥ सहैवमुक्त इंद्रः शांतहृदयः प्रवव्राजसहाप्राप्यैवदेवान्पूर्ववदस्मिन्नप्यात्मनि भयंददर्शकथं तदिदंशरीरंयद्यप्यंधं
भवतिस्वप्नात्मायोनंधः सभवतियदिस्राममिदंशरीरमस्रामः सभवतिनैवैषस्वप्नआत्मास्यदेहस्यदोषेणदुष्यतिनाप्यस्यवधेनसह
न्यतेछायात्मवन्नचास्यस्रामेणस्रामः स्वप्नात्माभवतियद्यप्यायादावागममात्रेणोपन्यस्तंनास्यजरयैतज्जीर्यतीत्यादितदिहन्यायेनोप

पादयितुमुपन्यस्तंनतावदयंछायात्मवद्देहदोषयुक्तः किंतु घ्नंतित्वेवैनं एवशब्द इवार्थे घ्नंतीवैनंकेचनेतिद्रष्टव्यंनतुघ्नंत्येवेत्यतरे
षुसर्वेष्विवशब्ददर्शनादस्यवधेननहन्यतइतिविशेषणाच्च घ्नंतित्वेवेतिचेन्नैवंप्रजापतिंप्रमाणीकुर्वतोऽनृतवादित्वापादनानुपपत्ते
रेतदमृतमित्येतत्प्रजापतेर्वचनंकथंमृषाकुर्यादिंद्रस्तंप्रमाणीकुर्वन्॥ ननुछायापुरुषेप्रजापतिनोक्तेस्यशरीरस्यनाशमन्वेषनर
तीतिदोषमद्राक्षीत्तथेहापिस्यान्नैवंकस्माद्यएषोक्षिणिपुरुषोदृश्यतइतिनछायात्माप्रजापतिनोक्त इतिमन्यतेमघवाकथमपहतपा
प्मादिलक्षणेदृष्टेयदिछायात्माप्रजापतिनोक्त इतिमन्येततदाकथंप्रजापतिंप्रमाणीकृत्यपुनः श्रवणायसमित्पाणिर्गच्छेज्जगामच
तस्मान्नछायात्माप्रजापतिनोक्त इतिमन्यतेतथाचव्याख्यातंद्रष्टाक्षिणिदृश्यतइतितथाविछाययंतीवविद्रावयंतीवतथाचपुत्रादि

मरणनिमित्तमप्रियवेत्तेव भवति अप्रियं स्वयमपि रोदितीव नन्वप्रियं वेत्येव कथं वर्त्तते उच्यते नामृताभयत्ववचना उपपत्तेर्घोय
तीवेति च अकृत्यं तरां ॥ नन्वप्रत्यक्षं विरोध इति चेन्न शारीरात्मप्रत्यक्षवदुक्तौ इति संभवात् दृष्टं तु तावदप्रियवेत्तेव नैवेति नाहमत्र
भोग्यं पश्यामि स्वप्नात्मज्ञानेपीष्टं फलं नोपलभ इत्यभिप्राय एवमेवैष तवाभिप्रायेणेति वाकारोषः ॥ आत्मनो मृताभयगुणवत्त्व
स्याभिप्रेतत्वाद्द्विरुक्तमपि न्यायतो यथावन्नावधारयति तस्मात्सर्ववदस्याद्यापि ज्ञातिर्बन्धकारणमस्तीति मत्वा नस्ते रूपणाय
वसापराणि ब्रह्मचर्यमित्यादिदेश प्रजापतिः तथोषितवते चापितकल्मषाय ह पूर्ववद्घोतं त्वेवत इत्याद्यक्रान्तद्यत्त्वेतत्सुप्त इत्यादि
व्याख्यातं वा कुमध्निणियेन दृष्टा स्वप्ने न महीयानश्चरति स एष सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृ
तमभयमेतद्ब्रह्मेति स्वाभिप्रेतमेव मघवांस्तत्रापि दोषं ददर्श कथमयमहमस्मीति नो एवेमानि भूतानि चेति यथा जाग्रत्स्वप्ने
वातो विनाशमेव विनाशमिवेति पूर्ववद्दृष्टव्यमप्यपितोपिगतो भवति विनष्ट इव भवतीत्यभिप्रायः ॥ ज्ञाने हि सति ज्ञातुः सद्भावो
गम्यते नासति ज्ञाने न च सुषुप्तस्य ज्ञानं दृश्यते तो विनष्ट इवेत्यभिप्रायः ॥ ननु विनाशमेवात्मनो मन्यते मृताभयवचनस्याप्रामा
ण्यमिति पूर्ववदेवमेवैतन्मघवन्नियामयोक्तः त्रिः स्त्रिपर्याये स्वमेवैतं नो एवान्यत्रैतस्मादात्मनो न्यत्किं च न किं तर्हि एतमेव व्याख्या
कथं नान्यत्र नैव सुषुप्ताप्यामाव... संप्रति सम्यगिदानीं चात्मानं जानाति नैव कदा

छां० भा०

स्यामि स्वल्पत्वाद्दोषस्त्वावशिष्टस्तत्क्षपणाय वसापराणि अन्यानि पंच वर्षाणी। उक्तः स चकार तस्मै मृदितकषायायै दिदोषा
यस्थानत्रयदोषसंबंधरहितमात्मनः स्वरूपमपहतपाप्मादिलक्षणं मघवते तस्मै होवाच ताश्चैकशतं वर्षाणि संपेदुः संपन्ना
नि बहूकुर्युर्यदाहुर्लोके शिष्टाः एकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवासेति तदेतद्द्वात्रिंशतमित्यादिना दर्शितमित्या
ख्यायिकातो पस्तत्यश्रुत्योच्यते। एवं किलैतदिंद्रत्वादपि गुरुतरमिंद्रेणापि महता यत्नेनैकोत्तरवर्षशतं तायासेन प्राप्तमात्म

११४

ज्ञानमतो नातः परं पुरुषार्थांतरमस्तीत्यात्मज्ञानं स्तौति। मघवन्मर्त्यं वै मरणधर्मीदं शरीरं यन्मन्यसे त्वमक्ष्यादिलक्षणसंप्र
सादलक्षण आत्मा मयोक्तो विनाशमेवापीतो भवतीति शृणु तत्र कारणं यदिदं शरीरं त्वं यत्पश्यसि तदेतन्मर्त्यं विनाशि तद्धं
तं मृत्युना ग्रस्तं सततमेव कदाचिदेव म्रियत इति मर्त्यमित्युक्ते न तथा संत्रासो भवति यथा ग्रस्तमेव सदा प्राप्तमेव मृत्युनेत्यु
क्त इति वैराग्यार्थं विशेष इत्युच्यते। आत्तं मृत्युनेति कथं नाम देहाभिमानतो विरक्तः सन्निवर्त्तत इति शरीरमप्यत्र सहेंद्रियमनो
भिरुच्यते तच्छरीरमस्य संप्रसादस्य त्रिस्थानतया गम्यमानस्यामृतस्य मरणादिदेहेंद्रियमनोधर्मवर्जितस्येत्येतदमृतस्येत्य
नेनैवाशरीरत्वे सिद्धे पुनरशरीरस्येति वचनं यथा वाय्वादिवत्सावयवत्वमूर्त्तिमत्त्वमा भूदित्यात्मन आत्मनो भोगाधिष्ठानमात्म

११४

192

ध्रि२

नो वा स तर्हि इत्युक्ते जीवो ब्रह्मादिक्रमेणोत्पन्नमधिष्ठानं जीवरूपेण प्रविश्य स देवो धितिष्ठत्यस्मिन्निति वा अधिष्ठानं यस्येदमीदृशं नित्यमेव सत्त्या
अस्तं धर्माधर्मजनितत्वात् प्रियाप्रियवद्दुःखानन्तदधिष्ठितस्तद्वाऽयं सशरीरो भवत्यशरीरस्वभावस्यात्मनस्तदेवाहं शरीरं शरीरमेव चाह
मित्यविवेकात्मभावः सशरीरत्वं सशरीरस्य नाते यत्तः प्रियाप्रिययोः प्रसिद्धमेतत्तस्य च नैव सशरीरस्य सतः प्रियाप्रिययोर्बाह्यविषयसं
योगवियोगनिमित्तयोर्बाह्यविषयसंयोगावियोगौ ममेति मन्यमानस्यापहतिर्विनाश उच्छेदः संततिरूपयोर्नास्तीत्यं तं पुनर्देहाभिमानाद्दश
रीरस्वरूपविज्ञानेन निवर्तिताविवेकज्ञानमशरीरं सन्तं प्रियाप्रिये न स्पृशतः स्पृशिः प्रत्येकं संबध्यत इति प्रियं न स्पृशत्यप्रियं न स्पृशती
ति वा काक्वद्वयं भवति नत्विह छान्दसत्वाद्धार्मिकैः सह संभाषेतेति यद्यद्धर्माधर्मकार्ये हि ते शरीरता तु स्वरूपमिति तव धर्माधर्मयोरसंभवा
त्कार्यं नावा द्वरतएव त्यतो न प्रियाप्रिये स्पृशतः ननु यदि प्रियमपशरीरं न स्पृशतीति यन्मघवतोक्तं सुषुप्तस्थो विनाशमेवापीतो भव
तीति तदेवेहाप्यापन्नं नैष दोषो धर्माधर्मकार्ययोः शरीरसंबन्धिनोः प्रियाप्रिययोः प्रतिषेधस्य विवक्षितत्वाद्दशरीरं न प्रियाप्रिये स्पृ
शत इत्यागमापायिनोर्हि स्पर्शशब्दो यथा शीतस्पर्श उष्णस्पर्श इति न च वस्तु स्वप्रकाशयोः स्वभावभूतयोरग्निनास्पर्श इति भवति
तथाग्नेः सवितुर्वा स्वप्रकाशवत्स्वरूपभूतस्यानन्दस्य प्रियस्यापि नेह प्रतिषेधो विज्ञानमानन्दं ब्रह्मेत्यादिश्रुति ...

छां०भा०

२२५

खमित्युक्त्वा रानन्तु भूम्नः प्रियस्यैकत्वेऽसंवेद्यत्वात्स्वरूपेणैव वा नित्यसंवेद्यत्वान्निर्विशेषतेति नेन्द्रस्य तद्दिष्टं नाह खल्वयं संप्रत्यात्मा
नं जानाति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीत्युक्त्वा तदिदं इन्द्रस्येष्टं यद्भूतानि चात्मानं च जानाति तत्त्वापि
यं किं विद्वानिति स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तज्ज्ञानेन सत्यमेतद्दिष्टमिन्द्रस्येमानि भूतानि मत्तोऽन्यानि लोकांश्च कामांश्च सर्वैर्मत्तोऽन्येऽह
मेषां स्वामीति न त्वेतदिदमिन्द्रस्य हितं हि तत्त्वेन्द्रस्य प्रजापतिना वक्तव्यं यो भवदशरीरात्मतया सर्वभूतलोककामात्मत्वोपगमेन यामिस्तद्धि
तमिन्द्राय वक्तव्यमिति प्रजापतिनाभिप्रेतं ननु राज्ञो राज्याभिवदन्यत्वेन तच्चैवं सति कं केन विजानीयादात्मैकत्वे इमानि भूतान्ययमहमस्मीति न
त्वस्मिन्पक्षे स्त्रीभिर्वा यानैर्वा स यदि पितृलोककामः स एकधा भवतीत्याद्यैश्वर्यश्रुतयोऽनुपपन्नाः न सर्वात्मनः सर्वफलसंबन्धोपपत्ते
रविरोधान्मृदिव सर्वघटचरुकुड्याद्यात्मनैव सर्वात्मत्वे दुःखसंबन्धोऽपि स्यादिति चेन्न दुःखस्यापि आत्मत्वोपगमान्न विरोधः आत्मन्यविद्या
कल्पितानि दुःखानि रज्ज्वामिव सर्पादिकल्पनानिमित्तानि सा चाविद्याऽशरीरात्मैकत्वस्वरूपदर्शनेन दुःखनिमित्तोच्छिन्नेति दुःखव
संबन्धाशङ्का न संभवति शुद्धसत्त्वसंकल्पनिमित्तानां कामानामीश्वरदेहसंबन्धः सर्वभूतेषु मानसानां पर एव सर्वसत्त्वोपाधिद्वारेण भो
क्तेति सर्वा विद्याकृतसंव्यवहाराणां पर एवात्मास्पदो नान्योऽस्तीति वेदान्तसिद्धान्तः अथ य एषोऽक्षिणि पुरुषो दृश्यत इत्याद्युक्तरूपेणैव प्रजा

२२५

196

पतिनोक्तः स्वप्नसुषुप्तयोश्चान्य एव न परोऽपहतपाप्मादिलक्षणो विरोधादिति केचिन्मन्यन्ते छायात्म्यात्मनोश्चोपदेशप्रयोजनमाचक्ष
ते। आदावेवोच्यमाने किल दुर्विज्ञेयत्वात्परस्यात्मनोऽत्यंतबाह्यविषयासक्तचेतसोऽत्यंतसूक्ष्मवस्तुश्रवणे व्यामोहो मा भूदिति यथा कि
ल द्वितीयायां सूक्ष्मं चंद्रमसं दिदर्शयिषुर्वृक्षं कं चित्प्रत्यक्षमादौ दर्शयति पश्यामुमेष चंद्र इति ततोऽन्यं ततोऽप्यन्यं गिरिमूर्द्धानं तत्र चंद्रस
मीपस्थमेष चंद्र इति ततोऽसौ चंद्रं पश्यति एवमेव तद्य एषोऽक्षिणीत्याद्युक्तः प्रजापतिना त्रिभिः पर्यायैर्न पर इति चतुर्थेऽपि पर्याये देहान्म
त्यात्मसमुच्छ्रायाऽच्छरीरतामापन्नो ज्योतिः स्वरूपं यस्मिन्नुत्तमपुरुषे स्यादिति जक्षत्क्रीडन्रममाणो भवति स उत्तमः पुरुषः पर इति चाक्षु
स्सत्यं रमणीया तावदियं व्याख्या श्रोतुर्न त्वर्थोऽस्य ग्रंथस्यैवं संभवति कथमक्षिणि पुरुषो दृश्यत इत्युपक्रम्यस्य शिष्याभ्यां छायात्मनि गृही
ते तयोस्तद्विपरीतग्रहणमवेत्य तदपनयायोदशरावोपन्यासः किं पश्यथ इति च प्रश्नः साध्वलंकारोपदेशश्चानर्थकः स्याद्यदि छा
यात्मैव प्रजापतिनाक्षिणि दृश्यत इत्युपदिष्टः किं च यदि स्वयमुपदिष्ट इति ग्रहणस्याप्यपनयकारणं वक्तव्यं स्यात्स्वप्नसुषुप्तात्मग्रहण
यारपित तदपनयकारणं च स्वयं ब्रूयान्न चोक्तं तेन मन्यामहे नाक्षिणि छायात्मा प्रजापतिनोपदिष्टः किं वान्यदक्षिणि द्रष्टा चेद् दृश्यत इत्यु
पदिष्टः स्यात्तत इदं युक्तमेतं त्वेव त इत्युक्त्वा स्वप्नद्रष्टुरेवोपदेशः स्वप्नेन द्रष्टोपदिष्ट इति चेन्नापिरोदीति वाप्रियवेत्तेवेत्युपदेशान्न च

छां०भा०

११८

इष्टुरन्यः कश्चित्स्वप्ने महीयमानश्चरत्येषोयंपुरुषः स्वयंज्योतिरित्यादिश्यायतः अत्यंतरोसिद्धत्वाद्यद्यपि स्वप्ने स धीर्न भवतीति तथा
पिन धीः स्वप्ने गोपलब्धिप्रतिकरणत्वं न जाते किं तर्हि पद विचक्षण्यो यद्वा सनाश्रयादत्रैव धीर्न भवतीति न द्रष्टुः स्वयंज्योतिष्ट्वे बाधा
स्यात्किंचान्यज्ज्ञात्रत्वमन्यैर्नृतानि वा मानं ज्ञानातीमानि भूतान्यहं ममहमस्मीति प्राप्तो सत्यां प्रतिषेधोयुक्तः सो न हि स त्वयमित्या
दिः तथाचेतनस्यैवाविद्यानिमित्तयोः सशरीरत्वे सति प्रियाप्रिययोरपहतिर्नास्तीत्युक्ता तस्यैवाशरीरस्य सतो विद्यायां सत्यां स
शरीरत्वे प्राप्तयोः प्रतिषेधोयुक्तो शरीरं वा वसंतं प्रियाप्रिये न स्पृशतः एकश्चात्मा स्वप्नबुद्धांतयोर्महामत्याद्विवदसंगश्चरतीति
अत्यंतरेसिद्धं यद्योक्तं संप्रसादः शरीराउच्छाय यस्मिन्स्त्र्यादिभी रममाणो भवति सोन्यः संप्रसादादधिकरणानिर्दिष्टउत्तमः पुरु
षइति तदप्यसत् तुर्थेपि पर्याये एतं त्वेव त इति वचनाद्यदि ततोन्योभिप्रेतः स्यात्सर्ववेदे तं त्वेव त इति न ब्रूयान्मृषा प्रजापतिः किंचान्य
त्रेजोबन्नादीनां स्रष्टुः सतः स्वविकारदेहशुंगे प्रवेशं दर्शयित्वा प्रविष्टाय पुनस्तत्त्वमसीत्युपदेशो मृषा प्रसज्येत तस्मिंश्चस्वा
दिभीरं ता न विष्यसीति युक्त उपदेशो न विष्यद्यदि संप्रसादादन्य उत्तमः पुरुषो भवेत्तथा नूनं अहमेवेत्यादिरूपात्मैवेदं सर्वमिति नो
पसमहरिष्यद्यदि भूमाजीवादन्यो भविष्यन्नाम्यदतोस्ति द्रष्टेत्यादिश्रुत्यंतराच्च सर्वश्रुतिषु च परस्मिन्नात्मशब्दप्रयोगान्नात्मविषयस्व

११८

198

त्यागात्मावेत्सर्वज्ञं तन्नां परमात्मानं जवेत्तस्मान्न जवेत्तस्मादेकएवात्मा प्रकरणासिद्धो न चात्मनः ॥ संसारित्वमविद्याध्यस्तत्वादा
त्मनि संसारस्य न हि रज्जुशुक्तिकागगनादिषु सर्परजतमलादीनि मिथ्याज्ञानाध्यस्तानि तेषां रविष्यन्ती त्वेतेन सशरीरस्य प्रि
याप्रिययोरपहस्तिन्न तिनो स्तीत्येतद्व्याख्यातं यद्यस्ति तमप्रियं वेत्ति नाप्रियं वेत्ती वेति सिद्धमेवं च सति सर्वपर्यायेषु तदमृत
मजयमेतद्ब्रह्मेति प्रजापतेर्वचनं यदि वा प्रजापतिछद्मरूपायाभ्यक्तेर्वचनं सत्यमेव जवेन्न च तच्छुतर्के खुद्या मृषा कर्तुं युक्तं त
तो गुरुतरस्य प्रमाणान्तरस्यानुपपत्तेः ॥ ननु प्रत्यक्षं दुःखाद्यप्रियवेदनं मयाजिनार्यनुभूयत इति चेन्न जरादिरहितो जीर्णो ह ज्ञातो
हमायुष्मान्गौरः ॥ कृष्णोऽहं तद् इत्यादि प्रत्यक्षानुभववत्तदुपपत्तेः ॥ सर्वमपेतत्सत्यमिति चेद्दृष्टो वेत्तदेवं दुःखगमं येन देवराज्योपु
दरारावादि दर्शिताविनाशायुक्तिरपि मुमोहे वाचविनाशमेवापीतो नवतीति तथाविरोचनो महाप्राज्ञः ॥ प्राजापत्यो पिन्देह मात्रा
त्मदर्शनो बभूव तथेन्द्रस्यात्मविनाशजयसागरएव वैनाशिकान्यमज्ञं स्तथा सांख्या द्रष्टारं देहादिव्यतिरिक्तमवगम्यापि लक्षणप्र
प्रमाणत्वान्मूर्तत्वविषयए वा यत्वदर्शने तस्तु स्तत्तोन्यकाणादादि दर्शी नाः कषायरक्तमिव वासादि निर्वस्त्वं च निरालम्बगुणयुक्त
मात्मद्रव्यं विशेषापि तु प्रवृत्तास्तथा कर्मिणो बाह्यविषयापहृतचेतसो वेदप्रमाणा अपि परमार्थसत्यमात्मैकत्वविनाशमिवेन्द्र

छां॰ भा॰

११७

वध्यमाना घटीयंत्रवदारोहावरोहप्रकारैरनिशं बंभ्रमीति किमन्येऽल्पजंतवो विवेकहीनाः॥ स्वभावत एव बहिर्विषयप
ह्वचेतसस्तस्मादिदं त्यक्त्वा सर्वबाह्यैषणैरनन्यशरणैः परमहंसपरिव्राजकैरत्याश्रमिभिर्वेदांतविज्ञानपरैरेव वेदनीयं प्र
ज्यतमेः प्राजापत्यं चेमं संप्रदायमनुसरद्भिरुपनिबद्धं प्रकरणचतुष्टयेन तथानुशासत्यद्यापि तत एव नान्यदिति॥ तत्राशरीर
स्यसंप्रसादस्याविद्ययाशरीरेणाविशेषतां सशरीरतामेवं संप्राप्तस्य शरीरात्समुत्थाय स्वेन रूपेण यथाभिनिष्पत्तिस्तथा
वक्तव्येति दृष्टान्त उच्यते। अशरीरो वायुरविद्यमानं शिरःपाण्यादिमच्छरीरमस्येत्यशरीरः किं चाभ्रं विद्युत्स्तनयित्नुरित्येतानि
चाशरीराणि तत्रैवं सति वर्षादिप्रयोजनावसाने यथामुष्मादिति भूमिष्ठात्काशादिति द्युलोकसंबंधिनमाकाशदेशं व्यपदिशत्येता
नि यथोक्तान्याकाशसमानरूपतामापन्नानि स्वेन वाय्वादिरूपेणागृह्यमाणान्याकाशाख्यतां गतानि यथायं संप्रसादो विद्याप्र
त्तौ शरीरात्मभावमेवापन्नस्तानि च तथाभूतान्यमुष्माद्द्युलोकसंबंधिन आकाशदेशात्समुत्तिष्ठंति वर्षणादिप्रयोजनाभि
निर्वृत्तये कथं शिशिरापाये सावित्रं परं ज्योतिः प्रकृष्टं ग्रैष्मिकमुपसंपद्य सावित्रमभितापं प्राप्येत्यर्थः। आदित्याभितापेन पृथग्भा
वमापादिताः स्वेन स्वेन रूपेण पुरोवातादिवायुरूपेणाभिनिमित्तं तावं वहित्वाभ्रं भू॰ विपर्वतहस्त्यादिरूपेण विद्युदपि स्वेन

११७

200
~~198~~

ज्योतिर्लतावपलरूपेण स्तनयित्नुरपि स्वेन गर्जिताशनिरूपेणाल्येवं प्रावृडागमे स्वेन स्वेन रूपेणाभिनिष्पद्यन्ते यथायं दृष्टान्तो वाय्वा
दीनामाकाशादिसाम्यगमनवदविद्यया संसारावस्थायां शारीरसाम्यमापन्नोऽहममुष्य पुत्रो जातो जीर्णो मरिष्य इत्येवं प्रकारं स ज्ञाप
तिनैवं मघवान्यथोक्तक्रमेण नासि त्वं देहेन्द्रियादिधर्मा तत्त्वमसीति प्रबोधितः स न्स एष संप्रसादो जीवोऽस्माच्छरीरादाकाशादिव
वाय्वादयः समुत्थाय देहादिभ्यो विलक्षणमात्मनो रूपमवगम्य देहात्मभावनां हित्वेत्येतत्स्वेन रूपेण सदात्मनैवाभिनिष्पद्यत इति व्या
ख्यातं पुरस्तात् स येन स्वेन रूपेण संप्रसादोऽभिनिष्पद्यते प्राक्प्रतिबोधाद्भ्रान्तिनिमित्तात्सर्पो भवति यथा रज्जुः पश्चाद्धृतप्रकाशार
ज्ज्वात्मना स्वेन रूपेणाभिनिष्पद्यते तद्वत् स उत्तमः पुरुषः उत्तम एवासौ पुरुषश्चेति उत्तमपुरुषः स एवोत्तमपुरुषो हि स्वप्नपुरुषो
व्यक्ताव्यक्तश्च सुषुप्तः समस्तः संप्रसन्नो शारीरश्च स्वेन रूपेणेत्येषामेष स्वेन रूपेण तत्त्वस्वात्मनि स्वस्थतया सर्वात्मभूतः पर्येति क्वचि
दिन्द्राद्यात्मना जक्षद्धसन्भक्षयन्वा पद्यानुच्चावचानीप्सितांश्च विन्मनोमात्रेण संकल्पादेव समुत्थितैः स्त्रीभिर्लौकिकैर्वा क्रीडन्रमादि
दिभी रममाणश्च मनसैव नोपजनं स्त्रीपुंसोरन्योन्योपगमेन जायत इत्युपजनमात्मभावेन वात्मसामीप्येन जायत इत्युपजनमिदं शारीरं
तन्न स्मरंस्तत्स्मरणे हि दुःखमेवस्या दुःखात्मकत्वात्तस्य न च तद्वस्तुतो न स्मरेदसर्वज्ञत्वं मुक्तस्य नैव दोषोऽस्य येन मिथ्याज्ञानादिना जनितं तं ते

छां०भा०

तन्मिथ्याज्ञानादिविषयोच्छेदितमतस्तन्नानुभूतमेवेति न तत्स्मरणे सर्वज्ञत्वहानिर्नहि तन्मतेनयहयदृहीते नवायदनुभूतं तदुक्तमादावपगा
मेपि स्मर्तव्यं स्यात्तथेहापि संसारित्वे अविद्यादोषवर्जितं यदनुभूयते तत्सर्वात्मानमशरीरं न स्पृशति अविद्यानिमित्ताभावाच्चेतुछिन्नदोषे
र्यदितकषाये मनसाः सत्याः कामा अनृतापिधाना अनुभूयन्ते विद्याभिव्यंग्यत्वात्त एवमुक्तेन सर्वात्मभूतेन संबध्यन्ते इत्यात्मज्ञानस्तु
तये निर्दिश्यन्तेऽतः साध्वेतद्विशिनष्टि य एते ब्रह्मलोक इति यत्र क्वचन जवंतोपि ब्रह्मणो वहितेलोके जववीति सर्वात्मत्वाद्ब्रह्मणः स च

११८

ते न तु कथमेकः सन्नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा कामांश्च ब्राह्मलौकिकान्पश्यन्नमत इति च विरुद्धं यद्येकोय
स्मिन्नवस्तुनि पश्यति सतस्मिन्नेव वस्तुनि न पश्यति चेति नैष दोषोऽश्रुतान्तरे परिहृतत्वाद्दृष्टुर्दृष्टेर्विपरिलोपात्पश्यन्नेव न पश्यति द्रष्टु
रन्यत्वेन कामानामभावान्न पश्यति विति यच्चापि सुषुप्ते तदुक्तं मुक्तस्यापि सर्वैकत्वात्समानो द्वितीयाभावः केन कं पश्येदिति वोक्तमेवा
शरीरत्वरूपोपहतपाप्मादिलक्षणः स कथमेष पुरुषो दक्षिणेऽक्षिणि दृश्यत इत्युक्तः प्रजापतिना तत्र यथास्मात्दक्षिणिसादाहृश्यते तदुक्तव्य
मितीहामारभ्यते तत्र को हेतुरक्षिणि दर्शन इत्याह स दृष्टान्तः यथा प्रयोग्य प्रयोग्यपरो वा सर्वाहः प्रयुज्यत इति प्रयोग्योऽश्वो बलीवर्दो वा
यथा लोक आचरणे नेनेति आचरणो रथोऽनो वा तस्मिन्नाचरणे मुक्तस्तत्प्राकर्षणाय एवमस्मिञ्छरीरे रथस्थानीये प्राणः पंचवृत्तिरि

११८

202

द्रियमनोबुद्धिसंयुक्तः प्रज्ञात्मा विज्ञानक्रियाशक्तिद्वयसंमूर्छितात्मा युक्तः स्वकर्मफलभोगनिमित्तं युक्तः कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्या
मि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीतीश्वरेण राज्ञ इव सर्वाधिकारी दर्शनश्रवणचेष्टाव्यापारे विकृतस्तस्यैव वस्तुमात्रैकदेशस्य स्थूलरिं द्रि
यरूपोपलब्धिद्वारभूतमयमयमन्नकल्लसारोपलक्षितमाकारं देहच्छिद्रमनुविषण्णमनुविषण्णमनुपक्रममनुगतं तत्र स प्रकृतो शारीरस्या
त्मा चक्षुषि भवति वा चक्षुषश्चक्षुष्यभिभवति वा चक्षुषस्तस्य दर्शनाय रूपोपलब्धये चक्षुः करणं यस्य तद्देहादिभिः संहतत्वात्परस्य द्रष्टुर
र्थं सो ऽत्र चक्षुषि दर्शनेन लिंगेन दृश्यते परो ऽसंहतो शारीरो ऽक्षिणि दृश्यत इति प्रजापतिनोक्तं सर्वेंद्रियद्वारोपलक्षणार्थं सर्वविषयोपलब्धा
हि स एवेति स्फुटोपलब्धिहेतुत्वादक्षिणीति विशेषदर्शनं सर्वश्रुतिष्वहमदर्शमिति तत्सत्यं भवतीति च श्रुतिरथापि यो ऽस्मिंश्चे देहे वेदाकथ
मिदं सुगंधि दुर्गंधि वा जिघ्राणीत्यस्य गंधविज्ञानं ॥ यामिति स आत्मा तस्य गंधाय गंधविज्ञानाय घ्राणमथ यो वेद वचनमभिव्याहराणीति
वदिष्यानीति स आत्मा ऽभिव्याहरणक्रियासिद्धये करणं वागिंद्रियमथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रमथ यो वेदेदं मन्वा
नीति मननव्यापारमिंद्रियासंस्पृष्टं केवलं मन्वानीति वेद स आत्मा यो वेद स आत्मेत्येवं सर्वत्र प्रयोगाद्वेदनमस्य स्वरूपमित्यवगम्यते
यथायः पुरस्तात्प्रकाशयति स आदित्यो यो दक्षिणतो यः पश्चाद्य उत्तरतो य ऊर्द्ध्वं प्रकाशयति स आदित्य इत्येकैकप्रकाशस्वरूपः स इति गम्य

नि दर्शनादिक्रियानिर्वृत्त्यर्थानि तु चक्षुरादीनि करणानीदं चास्यात्मनः सामर्थ्यादवगम्यते आत्मनः सत्तामात्र एव ज्ञानकर्तृत्वं न तु
व्यापृततया यथा सवितुः सत्तामात्र एव प्रकाशनकर्तृत्वं न तु व्यापृततयेति तद्वन्मनोऽस्यात्मनो दैवमप्राकृतमितरेन्द्रियैरसाधारण
वस्तुश्चष्टे पश्यत्यनेनेति वर्त्तमानकालविषयाणि चेन्द्रियाण्यतो दैवानि तानि मनस्तु त्रिकालविषयोपलब्धिकारणं स्मृदितदोषं च सू
क्ष्मव्यवहितादिसर्वोपलब्धिकारणं चेति दैवं चक्षुरुच्यते स वै मुक्तः स्वरूपापन्नोऽविद्याकृताद्देहेन्द्रियमनोवियुक्तः सर्वात्मभावमा

पन्नः सन्नेष व्योमवद्विशुद्धः सर्वेश्वरोऽमनउपाधिः सन्नेतेनैश्वरेण मनसैतान्कामान्सवितृप्रकाशवन्नित्यप्रवृत्तेन दर्शनेन पश्य

न्रमते का कामानिति विशिनष्टि य एते ब्रह्मणि लोके ब्रह्मलोके हिरण्यनिधिवद्ब्रह्मविषयासंगात्तेनापिहिताः संकल्पमात्रलभ्या
स्तानित्यर्थः यस्मादेष इन्द्रियः प्रजापतिनोक्त आत्मा तस्मात्तं श्रुत्वा तमात्मानमद्यत्वेऽपि देवा उपासते तदुपासनाच्च तेषां सर्वे च लो
का आप्ताः श्रमाः सर्वे च कामा यदर्थं हीन्द्र एकशतं वर्षाणि प्रजापतौ ब्रह्मचर्यमुवास तत्फलं प्राप्तं देवैरित्यभिप्रायस्तथोक्तं देवाना
महाभाग्यत्वात् न त्विदानीं मनुष्याणामल्पजीवितत्वान्मन्दतरप्रज्ञत्वाच्च न संभवतीति प्राप्त इदमुच्यते स सर्वांश्च लोकानाप्नोति सस
र्वांश्च कामानिदानींतनोऽपि कोऽसावींद्रादिवच्छास्त्रतमात्मानमनुविद्य विजानातीति ह स्माऽमन्येन किल प्रजापतिरुवाचातः सर्वथा मात्म

ज्ञानं तत्फलप्राप्तिश्च तुल्यैव भवतीत्यर्थः॥ द्विर्वचनं प्रकरणसमाप्त्यर्थं॥ श्यामाच्छबलं प्रपद्य इत्यादिमंत्राम्नायः॥ पावनो जपार्थश्च ध्याना
र्थो वा श्यामो गंभीरो वर्णः॥ श्याम इव श्यामः हार्दं ब्रह्मात्यंतदुरवगाह्यत्वात्तद्धार्दं ब्रह्म ज्ञात्वा ध्यानेन तस्माच्छ्यामाच्छबलं शबल इव शबलो
ऽरण्याद्यनेककाममिश्रत्वाद्ब्रह्मलोकस्य शाबल्यं ब्रह्मलोकं शबलं प्रपद्ये मनसा शरीरपाताद्वोर्ध्वं गच्छेयं यस्माद्दहं शबलाद्ब्रह्मलो
कान्नामरूपव्याकरणाय श्यामं प्रपद्ये हार्दं भावं प्रपन्नोऽस्मीत्यभिप्रायो तस्तमेव प्रकृतिस्वरूपमात्मानं शबलं प्रपद्य इत्यध्य इत्यर्थः॥
कथं शबलं ब्रह्मलोकं प्रपद्य इत्युच्यते॥ अश्व इव स्वानि लोमानि विधूय कंपनेन श्रमं पांस्वादि चरोमतो पनीय यथा निर्मलो भवतीत्येवं
हार्दं ब्रह्मज्ञानेन विधूय पापं धर्माधर्माख्यं चंद्र इव च राहुग्रस्तः तस्माद्राहोः॥ प्रमुच्य भास्वरो भवति यथैवं धूत्वा प्रहाय शरीरं सर्वा
नर्थाश्रयमिहैव ध्यानेन कृतात्मा कृतकृत्यः॥ सन्नकृतं नित्यं ब्रह्मलोकमभिसंभवामीति द्विर्वचनं मंत्रसमाप्त्यर्थं॥ आकाशो वै इ
त्यादि ब्रह्मणो लक्षणनिर्देशार्थमाख्यानायाकाशो वै नाम श्रुतिषु प्रसिद्ध आत्माकाश इवाशरीरत्वात्सूक्ष्मत्वाच्च स आकाशो नामरूप
योः स्वात्मस्थयोर्जगद्बीजभूतयोः सलिलस्येव फेनस्थानीययोर्निर्वहिता निर्वोढा व्याकर्तेति नामरूपे यदंतरा यस्य ब्रह्मणो मध्ये
तरा वर्तेते तयोर्वा नामरूपयोरंतरा मध्ये यन्नामरूपाभ्यामसंस्पृष्टं यदित्येतत्तद्ब्रह्म नामरूपविलक्षणं नामरूपाभ्यामस्पृष्टं तथापि

छां०भा०

तयोर्निर्वोढ्वेवंलक्षणं ब्रह्मेत्यर्थः ॥ इदमेव च मैत्रेयीब्राह्मणेनोक्तं चिन्मात्रानुगमात्सर्वत्र चित्स्वरूपतैवेति गम्यते एकवाक्यता कथं तदव
गम्यत इत्याह स आत्मात्मा हि नाम सर्वजंतूनां प्रत्यक्चेतनः ॥ स्वसंवेद्यः ॥ प्रसिद्धस्तेनैव स्वरूपेणानीयाशरीरो व्योमवत्सर्वगत आत्मा ब्रह्मेत्ये
वगंतव्यं तच्चात्मा ब्रह्मामृतोऽमरणधर्मा ॥ तदुक्तं मंत्रः ॥ प्रजापतिश्चतुर्मुखस्तस्य सभां वेश्म प्रभुविमितं वेश्म प्रपद्ये गच्छेयं किं च यशोहं
यशो नामात्माहं भवामि ब्राह्मणानां ब्राह्मणा एव हि विशेषतस्तमुपासते ततस्तेषां यशो भवामि तथा राज्ञां विशां च तेप्यधिकृता एव

१२०

इति तेषामप्यात्मा भवामि सहाहं यशसामात्मना देहेंद्रियमनोबुद्धिलक्षणानामात्मा किमर्थमहमेवं प्रपद्य इत्युच्यते श्वेतं वर्णतः ॥
पक्वबदरवत्सम रोहितं तत्थाद्त्वं दंतरहितमप्यदत्वं न दायितं तेजोबलवीर्यविज्ञानधर्माणामपहंतृ विनाशयितृ इत्येतत्तत्सो विन
खावांज्ञनं यद्येवंलक्षणं श्येतं लिंदु पिच्छिलमातिगामातिगच्छेयं द्विर्वचनमत्यंतानर्थहेतुत्वप्रदर्शनार्थमुक्ता तद्वैतदात्मज्ञानं सोप
करणमोमित्येतदक्षरमित्याद्यैः ॥ सहोपासनेन तच्चावकेन यंथेनाष्टाध्यायलक्षणं स ब्रह्मा हिरण्यगर्भः ॥ परमेश्वरो वा तद्वारेण
प्रजापतये कश्यपायो वाचवासावपि मनवे स्वपुत्राय मनुः प्रजाभ्य इत्येवं श्रुत्यर्थसंप्रदायपरंपरयागतमुपनिषद्विज्ञानमद्या
पि विद्वत्स्ववगम्यते यथेह षष्ठाद्यध्यायत्रये प्रकाशितात्मविद्याफलसफलावगम्यते तथा कर्मणा न कश्चनार्थ इति प्राप्ते तदा

१२०

206

नर्थकप्राप्तिपरिजिहीर्षयेदं कर्मणो विद्वद्भिरनुष्ठीयमानस्य विशिष्टफलवत्त्वेनार्थवत्त्वमुच्यते। आचार्यकुलाद्वेदमधीत्य स
हार्थतोऽध्ययनं कृत्वा यथाविधानं यथास्मृत्युक्तनियमैर्युक्तः सन्नित्यर्थः। सर्वस्यापि विधेः स्मृतत्वात्तस्योपकुर्वाणकं प्रति कर्तव्य
त्वे गुरुशुश्रूषायाः प्राधान्यप्रदर्शनार्थमाह। गुरोः कर्मपरकर्तव्यं तत्कृत्वा कर्मशेषे यातिशिष्टः कालस्तेन कालेन वेदमधीये
तेत्यर्थः। एवं नियमवताधीतो वेदः कर्मज्ञानफलप्राप्तये भवति नान्यथेत्यभिप्रायः। अतिसमावृत्तस्य धर्मजिज्ञासायां स मा
पयित्वा गुरुकुलान्निवृत्य न्यायतो दारानाहृत्य कुटुम्बे स्थित्वा गार्हस्थ्यविहितकर्माणि तिष्ठन्नित्यर्थः। तत्रापि गार्हस्थ्यवृत्ति
तानां कर्मणां स्वाध्यायस्य प्राधान्यप्रदर्शनार्थमुच्यते शुचौ विविक्तेऽभ्यादिरहिते देशे यथावदासीनः स्वाध्यायमधीयानो
नैत्यकमाह्निकं च यथाशक्ति तद्वद्गाधयन्यासं च कुर्वन् धार्मिकान्पुत्रांश्छिष्यांश्च धर्मयुक्तान्विदध्याद्धार्मिकत्वेन तान्नियमयन्नात्म
निस्वहृदये हार्दे ब्रह्मणि सर्वेन्द्रियाणि प्रतिष्ठाप्योपसंहृत्येन्द्रियग्रहणात्कर्माणि च संन्यस्याहिंसन्नहिंसां परपीडामकुर्वन्स
सर्वभूतानि स्थावरजंगमानि भूतान्यपीडयन्नित्यर्थः। भिक्षानिमित्तमटनादिनापि पिडा स्यादित्यत आह। अन्यत्र तीर्थेभ्यस्त
र्थं नाम शास्त्रानुज्ञाविषयस्ततोऽन्यत्रेत्यर्थः। सर्वाश्रमिणां चैतत्समानं तीर्थेभ्योऽन्यत्राहिंसैवेत्यन्ये वर्णयन्ति कुटुंब एव तस्य

छां०भा०

वैं कुर्वन्सर्वं खल्वेवमित्यक्तो यावदायुषं यावज्जीवं यथोक्तेन प्रकारेणैवं वर्त्तयन्ब्रह्मलोकमभिसंपद्यते देहान्ते न च पुनरा व

र्त्तते पुनरावर्त्तते प्राप्ताया ॥ प्रतिषेधात्कार्यं ब्रह्मलोकमभिसंपद्य यावद्ब्रह्मलोकस्थितिस्तावत्तत्रैव तिष्ठति प्राक्ततो नाव

र्त्तत इत्यर्थः ॥ द्विरभ्यास उपनिषद्विद्यापरिसमाप्त्यर्थः ॥ ॥ इति श्रीमद्गोविंद भगवत्पूज्यपादशिष्यस्य परमहंसप

रिव्राजकाचार्यस्य श्रीमच्छंकर भगवतः कृतौ छांदोग्योपनिषद्विवरणे अष्टमोध्यायः समाप्तः ॥ ॥ श्रीकृष्ण ॥ ॥ श्रीराम

२१ १२१

ग्रंथः ४०००

ग्रंथ ४०००

[OrderDescription]
,CREATED=15.10.20 14:03
,TRANSFERRED=2020/10/15 at 14:27:40
,PAGES=208
,TYPE=STD
,NAME=S0004013
,Book Name=M-1437-HAGANDOGYOPNISHDVASHYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,